MANUSCRIPT NO.	**171**
NAME OF MANUSCRIPT	**Upanishad Sangrah**
AUTHOR	**N.A.**
SUBJECT	**Religion**
LANGUAGE	**Sanskrit**
SCRIPT	**Devnagiri**
BRIEF EXPLANATORY NOTE	**Bringing together the upnashadic literature.**

1

उपनिषद संग्रह
१०२ पत्रक॥ ले०प्र० १३पं०प्र०पृ०

ह० ले०

(52)

171

17

ॐ· उपनि· १

ॐ श्रीगणेशाय नमः ॥ अथाथर्वणीयेउपनिषद्ब्रह्मयाशाखांतरीयाश्च लिख्यते प्रारभ्यते ॐ ब्र
ह्मादेवानांप्रथमःसंबभूवविश्वस्यकर्त्ताभुवनस्यगोप्ता सब्रह्मविद्यांसर्वविद्यांसर्वविद्याप्रति
ष्ठामथर्वायज्येष्ठपुत्रायप्राह अथर्वणेयांप्रवदेतब्रह्माथर्वातांपुरोवाचांगिरेब्रह्मविद्यांसभा
रद्वाजायसत्यवहायप्राहभारद्वाजोंगिरसेपरावरां शौनकोहवैमहाशालोंगिरसंविधिवदु
पसन्नःपप्रच्छकस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीतितस्मैसहोवाचद्वेविद्येवेदित
व्येइतिहस्मयद्ब्रह्मविदोवदंतिपराचैवापराच तत्रापराऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदः
शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमितिअथपरायया तदक्षरमधिगम्यते यत्त
दद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रंतदपाणि
पादंनित्यंविभुंसर्वगतंसुसूक्ष्मंतदव्ययं यद्भूतयोनिंपरिपश्यंतिधीरायथोर्णनाभिःसृजते
गृह्णतेच यथापृथिव्यामोषधयःसंभवंतियथासतःपुरुषात्केशलोमानितथाक्षरात्सं
भवतीहविश्वं तपसाचीयतेब्रह्मततोन्नमभिजायते अन्नात्प्राणोमनःसत्यंलोकाःकर्मसु
चामृतं यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः तस्मादेतद्ब्रह्मनामरूपमन्नंचजायते तदेत
त्सत्यं प्रथममुंडके मंत्रेषुकर्माणिकवयोयान्यपश्यंस्तानित्रेतायांबहुधासंततानि सा ।

१

स्याचातुर्मास्यनियतंसततंकामायएषवःपंथाःसुकृतस्यलोकेयदालेलायतेह्यर्चिःसमिद्धेहव्य
वाहनेतदाज्यभागावंतरेणाहुतीःप्रतिपादयेत् यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्य
मनाग्रयणमतिथिवर्जितंचाहुतमवैश्वदेवमविधिनाहुतमासप्तमांस्तस्य
लोकान्हिनस्ति कालीकरालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा स्फुलिंगिनीवि
श्वरुचीचदेवीलेलायमानाइतिसप्तजिह्वाः एतेषुयश्चरतेभ्राजमानेषुयथाकालंचाहुतयोह्या
ददायन् तंनयंत्येताःसूर्यस्यरश्मयोयत्रदेवानांपतिरेकोऽधिवासः एह्येहीतितमाहु
तयःसुवर्चसःसूर्यस्यरश्मिभिर्यजमानंवहंति प्रियांवाचमभिवदंत्योर्चयंत्यएषवःपुण्यः
सुकृतोब्रह्मलोकः
ः प्लवाह्येतेअदृढायज्ञरूपाअष्टादशोक्तमवरंयेषुकर्म एतच्छ्रेयो
येऽभिनंदंतिमूढाजरामृत्युंतेपुनरेवापियंति अविद्यायामंतरेवर्त्तमानाःस्वयंधीराःपंडितंमन्य
मानाःजंघन्यमानाःपरियंतिमूढाअंधेनैवनीयमानायथांधाः अविद्यायांबहुधावर्त्तमानाव
यंकृतार्थाइत्यभिमन्यंतिबालाः यत्कर्मिणोनप्रवेदयंतिरागात्तेनातुराःक्षीणलोकाश्च्यवंते इ १२
ष्टापूर्त्तंमन्यमानावरिष्ठंनान्यच्छ्रेयोवेदयंतेप्रमूढाः नाकस्यपृष्ठेतेसुकृतेनुत्वेमंलोकंहीनतं
भू

रंचाविशंति तपःश्रद्धे ये ह्युपवसंत्यरण्ये शांता विद्वांसो भैक्षचर्यां चरंतः सूर्यद्वारेण ते वि
रजाः प्रयांति यत्रामृतः स पुरुषो ह्यव्ययात्मा परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेद
मायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं
उप॰ २ तस्मै स विद्वानुपसन्नाय सम्यक्प्रशांतचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच
तां तत्त्वतो ब्रह्मविद्यां तदेतत्सत्यं द्वितीयमुंडके २ यथा सुदीप्तात्पावकाद्विस्फुलिंगाः
सहस्रशः प्रभवंते सरूपाः तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंति दि
व्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः एतस्मा
ज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी अग्निर्मूर्द्धा च
क्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष स
र्वभूतांतरात्मा तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्यां पुमान्रेतः सिं ५४
चति योषितायां बह्वीः प्रजाः पुरुषात्संप्रसूताः तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्र
तवो दक्षिणाश्च संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः तस्माच्च देवा बहु
धा संप्रसूताः साध्या मनुष्याः पशवो वयांसि प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्म २

र्च्चिषिविधिश्च सप्तप्राणाःप्रभवंतितस्मात्सप्तार्चिषःसमिधःसप्तहोमाःसप्तइमेलोकायेषुचरं
तिप्राणागुहाशयानिहिताःसप्तसप्त अतःसमुद्रागिरयश्चसर्वेअस्मात्स्यंदंतेसिंधवःसर्वरू
पाः अतश्चसर्वाओषधयोरसाश्चयेनेषभूतैस्तिष्टतेह्यंतरात्मा पुरुषएवेदंविश्वंकर्मतपो
ब्रह्मपरामृतं एतद्योवेदनिहितंगुहायांसोऽविद्याग्रंथिंविकरतीहसोम्य द्वतीयमुंडके १
आविःसंनिहितंगुहाचरंनाममहत्पदं अत्रैतत्समर्पितमेजत्प्राणन्निमिषच्चयत् एत
ज्जानीथसदसद्वरेण्यंपरंविज्ञानाद्यद्वरिष्टंप्रजानां यदर्चिमद्यदणुभ्योऽणुच यस्मिन्
लोकानिहितालोकिनश्च तदेतदक्षरंब्रह्मसप्राणस्तदुवाङ्मनः तदेतत्सत्यंतदमृतंतद्वे
द्धव्यंसोम्यविद्धिधनुर्गृहीत्वौपनिषदंमहास्त्रंशरंह्युपासानिशितंसंधयीत आयम्यतद्भा
वगतेनचेतसालक्ष्यंतदेवाक्षरंसोम्यविद्धिप्रणवोधनुः शरोह्यात्माब्रह्मतल्लक्ष्यमुच्यते अ
प्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेत् लक्षंसर्वगतंचैवशरामेसर्वतोमुखः वेद्धासर्वगत
श्चैवविद्धिलक्षंनसंशयः अगस्त्वषायजवेणानसामस्माद्योषणादिना ब्रह्मवेदमपयुश्च
परिविंहतिनिस्पशः यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः तमेवैकंजा
नीथआत्मानमन्यावाचोविमुंचथामृतस्यैषसेतुः अराइवरथनाभौसंहतायत्रनाड्यःस

एषोंतश्चरतेबहुधाजायमानः ओमित्येवंध्यायथआत्मानंस्वस्तिवः परायतमसः परस्तात्
यः सर्वज्ञः सर्वविद्यस्यैषमहिमाभुवि दिव्येब्रह्मपुरेह्येषव्योम्न्यात्माप्रतिष्ठितः मनोमयः
प्राणशरीरनेताप्रतिष्ठितोन्नेहृदयंसन्निधाय तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृतं
यद्विभाति भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे
उप. ३ हिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलं तच्छुभ्रंज्योतिषांज्योतिस्तद्यदात्मविदोविदुः नतत्र
चंद्रार्कवपुः प्रकाशतेनवांतिवाताः नचयांतिदेवताः यत्रदेवःकृत्तभिर्भूतिभावनः स्वयं
विभूत्याविरजः प्रकाशते नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः
तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति ब्रह्मैवेदममृतंपुरस्ताद्ब्रह्मपश्चाद्ब्रह्मदक्षि
णतश्चोत्तरेणअधश्चोर्ध्वंप्रसृतंब्रह्मैवेदंविश्वमिदंवरिष्ठं इतिचतुर्थमुंडकम् ५ द्वासुप
र्णासयुजासखायासमानंवृक्षंपरिषस्वजाते तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाक
शीति समानेवृक्षेपुरुषोनिमग्नोऽनीशयाशोचतिमुह्यमानः जुष्टंयदापश्यत्यन्यमीशमस्य
महिमानमितिवीतशोकः यदापश्यःपश्यतेरुक्मवर्णंकर्तारमीशंपुरुषंब्रह्मयोनिं तदाविद्वा
न्पुण्यपापेविधूयनिरंजनः परमंसाम्यमुपैति प्राणोह्येषसर्वभूतैर्विभातिविजानन्विद्वानभ

वतेनातिवादी आत्मक्रीड आत्मरतिः क्रियावानेषब्रह्मविदांवरिष्ठः सत्येनलभ्यस्तपसाह्येष
आत्मासम्यग्ज्ञानेनब्रह्मचर्येणनित्यंअंतः शरीरेज्योतिर्मयोहिशुभ्रोयंपश्यंतियतयः क्षीण
दोषाः सत्यमेवजयतिनानृतंसत्येनपंथाविततोदेवयानः येनाक्रमंत्यृषयोह्याप्तकामाय
त्रतत्सत्यस्यपरमंनिधानं बृहच्चतद्दिव्यमचिंत्यरूपंसूक्ष्माच्चतत्सूक्ष्मतरंविभाति दूरात्सुदूर
तदिहांतिकेचपश्यंत्विहैवनिहितंगुहायां नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसा
कर्मणावा ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तुतंपश्यतेनिष्कलंध्यायमानः एषोणुरात्मा
चेतसावेदितव्योयस्मिन्प्राणः पंचधासंविवेश प्राणैश्चित्तंसर्वमोतंप्रजानांयस्मिन्विशु
द्धेविभवत्येषआत्मा यंयंलोकंमनसासंविभातिविशुद्धसत्वः कामयतेयांश्चकामान् तंतं
लोकंजयतेतांश्चकामान् तस्मादात्मज्ञंह्यर्चयेद्भूतिकामः इतिपंचमंमुंडकं ५ सवेदैतत्प
रमंब्रह्मधामयत्रविश्वंनिहितंभातिशुभ्रं उपासतेपुरुषंयेह्यकामास्तेशुक्रमेतदतिवर्त्तंति
धीराः कामान्यःकामयतेमन्यमानःसकामभिर्जायतेतत्रतत्र पर्याप्तकामस्यकृतात्मनस्
त्विहैवसर्वेप्रविलीयंतिकामाः नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन यमे
वैषवृणुतेतेनलभ्यः तस्यैषआत्माविवृणुतेतनुंस्वां नायमात्माबलहीनेनलभ्योनचप्रमा

सन्यासयोगाद्यतयःशुद्धसत्वाःतेब्रह्मलोकेषुपरांतकालेपरा
मृताःपरिमुच्यंति २

दातपसोवाप्यलिंगात् एतैरुपायैर्यजतेयस्तुविद्वांसस्तस्यैषआत्माविशतेब्रह्मधामसंप्राप्यैन
मृषयोज्ञानतृप्ताःकृतात्मानोवीतरागाःप्रशांताः तेसर्वगंसर्वतःप्राप्यधीरायुक्तात्मानःसर्व
मेवाविशंति वेदांतविज्ञानसुनिश्चितार्थाःसर्वेगताःकलापंचदशप्रतिष्ठादेवाश्चसर्वेप्रति
देवतासु कर्माणिविज्ञानमयश्चआत्मापरेव्ययेसर्वएकीभवंति यथानद्यःस्यंदमानाःस
३प- मुद्रेस्तंगच्छंतिनामरूपेविहायतथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यं स
४ योहवैतत्परमंब्रह्मवेदब्रह्मैवभवति नास्याब्रह्मवित्कुलेभवतितरतिशोकंतरतिपाप्मानं
गुहाग्रंथिभ्योविमुक्तोमृतोभवति तदेतदृचाभ्युक्तंक्रियावंतःश्रोत्रियाब्रह्मनिष्ठाःस्वयंजु
ह्वतएकर्षिंश्रद्धयंतःतेषामेवैतांब्रह्मविद्यांवदेतशिरोव्रतंविधिवद्यैस्तुचीर्णं तदेतत्स
त्यमृषिरंगिरापुरोवाचनैतदचीर्णव्रतोधीते नमःपरमऋषिभ्योनमःपरमऋषिभ्यः ॥ ३ ॥ २ ॥ ३के
इ॥ इतिमुंडकोपनिषत्समाप्ता ॥ १ ॥ ओंसुकेशाचभारद्वाजःशैब्यश्चसत्यकामःसौर्यायणीचगा
र्ग्यःकौशल्यश्चाश्वलायनोभार्गवोवैदर्भिःकबंधीकात्यायनस्तेहैतेब्रह्मपराब्रह्मनिष्ठाःपरं
ब्रह्मान्वेषमाणाएषहवैतत्सर्वंवक्ष्यतीतितेहसमित्पाणयोभगवंतंपिप्पलादमुपसन्ना
स्तान्हसऋषिरुवाच भूयएवतपसाब्रह्मचर्येणश्रद्धयासंवत्सरंसंवत्स्यथयथाकामंप्र

श्नान् पृच्छथ यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति अथ कबंधी कात्यायन उपेत्य पप्रच्छ भगवन्
कुतो ह वा इमाः प्रजाः प्रजायंत इति तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत स त
पस्तप्त्वा स मिथुनमुत्पादयते रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इत्यादित्यो ह वै प्रा
णो रयिरेव चंद्रमा रयिर्वा एतत्सर्वं यन्मूर्त्तं चामूर्त्तं च तस्मान्मूर्त्तिरेव रयिः अथादित्य उदयन्यत्
प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान् रश्मिषु संनिधत्ते यद्दक्षिणां यत्प्रतीचीं यदुदीचीं य
दधो यदूर्ध्वं यदंतरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान्प्राणान् रश्मिषु संनिधत्ते स एष वै
श्वानरो विश्वरूपः प्राणोऽग्निरुदयते तदेतदृचाभ्युक्तम् विश्वरूपं हरिणं जातवेदसं परायणं
ज्योतिरेकं तपंतं सहस्ररश्मिः शतधा वर्त्तमानः प्राणः प्रजानामुदयत्येष सूर्यः संवत्सरो वै प्र
जापतिस्तस्यायने दक्षिणं चोत्तरं च तद्ये ह वै तदिष्टापूर्त्ते कृतमित्युपासते ते चांद्रमसमेव लोकमभि
जयंते त एव पुनरावर्त्तंते तस्मादेत ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यंते एष ह वै रयिर्यः पितृ
याणः अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयंते एतद्वै प्रा
णानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्त्तंत इति एष निरोधस्तदेष
श्लोकः पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्द्धे पुरीषिणं अथेमे अन्य उपरे विच

ह्राणेसप्तचक्रेषडरआहुरर्पितमितिमासोवैप्रजापतिस्तस्यकृष्णपक्षएवरयिः शुक्लःप्राणस्त
स्मादेतऋषयःशुक्लइष्टंकुर्वंतीतरइतरस्मिन्नहोरात्रोवैप्रजापतिस्तस्याहरेवप्राणोरात्रिरेवरयि
प्राणंवाएतेप्रस्कंदंति येदिवारत्यासंयुज्यंतेब्रह्मचर्यमेवतद्यद्रात्रौरत्यासंयुज्यंतेअन्नंवैप्रजाप
उप· तिस्ततोहवैरेतस्तस्मादिमाःप्रजाःप्रजायंतइति तद्येहवैतत्प्रजापतिव्रतंचरंतितेमिथुनमुत्पा
५ दयंते तेषामेवैषब्रह्मलोकोयेषांतपोब्रह्मचर्यंयेषुसत्यंप्रतिष्ठितंतेषामसौविरजोब्र
ह्मलोकोयेषांतपोब्रह्मचर्यंयेषुसत्यंप्रतिष्ठितंतेषामसौविरजोब्रह्मलोकोनयेषुजिह्मम
नृतंमायाचेति १ अथहैनंभार्गवोवैदर्भिःपप्रच्छभगवन्कत्येवदेवाःप्रजांविधारयंते क
तरएतत्प्रकाशयंते कःपुनरेषांवरिष्ठइति तस्मैसहोवाचाकाशोहवाएषदेवोवायुर
ग्निरापःपृथिवीवाङ्मनश्चक्षुःश्रोत्रंचतेप्रकाश्याभिवदंतिवयमेतद्बाणमवष्टभ्यविधार
यामस्तान्वरिष्ठः प्राणउवाच मामोहमापद्यथाहमेवैतत्पंचधात्मानंप्रविभज्यैतद्बाणम
वष्टभ्यविधारयामीति तेऽश्रद्दधानाबभूवुःसोऽभिमानादूर्ध्वमुत्क्रमतइवतस्मिन्नुत्क्राम
त्यथेतरेसर्वएवोत्क्रामंते तस्मिंश्चप्रतिष्ठमानेसर्वएवप्रतिष्ठंते तद्यथामक्षिकामधुकररा
जानमुत्क्रामंतंसर्वाएवोत्क्रमंतेतस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रतिष्ठंते एवंवाङ्मनश्चक्षुःश्रोत्र

चैते प्रीताः प्राणांस्तुन्वंति एषोग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्दे
वः सदसच्चामृतं च यत् अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितं ऋचो यजूंषि सामानि यज्ञः क्ष
त्रं ब्रह्म च प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे तुभ्यं प्राण प्रजास्त्विमा बलिं हरंति यः प्राणैः प्रतिष्ठसि
देवानामसि वह्नितमः पितॄणां प्रथमा स्वधा ऋषीणां चरितं सत्यमथर्वांगिरसामसि इंद्रस्त्वं
प्राण तेजसा रुद्रोसि परिरक्षिता त्वमंतरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः यदा त्वमभिवर्ष
स्यथेमाः प्राण ते प्रजाः आनंदरूपास्तिष्ठंति कामायान्नं भविष्यतीति व्रात्यस्त्वं प्राणैकऋषि
रत्ता विश्वस्य सत्पतिः वयमाद्यस्य दातारः पिता त्वं मातरिश्वनः या ते तनूर्वाचि प्रतिष्ठिता
या श्रोत्रे या च चक्षुषि या च मनसि संतता शिवां तां कुरु मोत्क्रमीः प्राणस्येदं वशे सर्वं त्रिदिवे
यत्प्रतिष्ठिते मातेव पुत्रान् रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति तेमंता ऋचोभिप्रवदंति प्राणा
यनमः इति अथ हैनं कौशल्यश्चाश्वलायनः पप्रच्छ भगवन् कुत एष प्राणो जायते कथमायात्य
स्मिन् शरीर आत्मानं वा प्रविभज्य कथं प्रतिष्ठते केनोत्क्रमते कथं बाह्यमभिधत्ते कथमध्यात्म
मिति तस्मै स होवाचातिप्रश्नान् पृच्छसि ब्रह्मिष्ठोसीति तस्मात्तेहं ब्रवीमि आत्मन एष प्राणो जाय
ते यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिन् शरीरे यथा सम्राडेवाधिकृतानि

नियुंक्तएतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसंन्निधत्ते पा
यूपस्थेपानंचक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रातिष्ठतेमध्येतुसमानएषह्येतद्धुतमन्नं
समंनयति तस्मादेताःसप्तार्चिषोभवंति हृदिह्येषआत्माअत्रैतदेकशतंनाडीनांतासांशतं
शतमेकैकस्यांद्वासप्ततिप्रतिशाखानाडीसहस्राणिभवंत्यासुव्यानश्चरत्यथैकयोर्ध्वउदानःपुण्ये
उप· ६ नपुण्यंलोकंनयति पापेनपापमुभाभ्यामेवमनुष्यलोकमादित्योहवैबाह्यःप्राणउदय
त्येषह्येनंचाक्षुषंप्राणमनुगृह्णानःपृथिव्यांयादेवतासैषापुरुषस्यापानमवष्टभ्यांतराय
दाकाशःससमानोवायुर्व्यानस्तेजोहवावउदानस्तस्मादुपशांततेजाःपुनर्भवमिंद्रियैर्म
नसिसंपद्यमानैर्यच्चित्तस्तेनैषप्राणमायाति प्राणस्तेजसायुक्तःसहात्मनायथासंकल्पि
तंलोकंनयति यएवंविद्वान्प्राणंवेदनहास्यप्रजाहीयतेऽमृतोभवति तदेषश्लोकः उत्प
त्तिमायातिंस्थानंविभुत्वंचैवपंचधा अध्यात्मंचैवप्राणस्यविज्ञायामृतमश्नुतेविज्ञायामृतम
श्नुतइति ३ अथहैनंसौर्यायणीगार्ग्यःपप्रच्छ भगवन्नेतस्मिन्पुरुषेकानिस्वपंतिकान्यस्मिंजा प
ग्रतिकतरएषदेवःस्वप्नान्पश्यति कस्यैतत्सुखंभवतिकस्मिन्नुसर्वेसंप्रतिष्ठिताभवंतीति
तस्मैसहोवाच यथागार्ग्यमरीचयोऽर्कस्यास्तंगच्छतःसर्वाएतस्मिंस्तेजोमंडलएकीभवंति

ताः पुनः पुनरुदयतः प्रचरंत्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति तेन तर्ह्येष पुरुषो न शृ-
णोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानंदयते न विसृजते नेया-
यते स्वपितीत्याचक्षते प्राणाग्नय एवैतस्मिन्पुरे जाग्रति गार्हपत्यो ह वा एषोऽपानो व्यानोऽ-
न्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः यदुच्छ्वासनिःश्वासावेता-
वाहुती समं नयतीति स समानः मनो ह वाव यजमान इष्टफलमेवोदानः स एनं यजमानम-
हरहर्ब्रह्म गमयत्यत्रैष देवः स्वप्ने महिमानमनुभवति यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनु-
शृणोति देशदिगंतरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चान-
नुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति स यदा तेजसाभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्य-
त्यथैतदेतस्मिञ्छरीर एतत्सुखं भवति स यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठंते एवं ह वै तत्स-
र्वं पर आत्मनि संप्रतिष्ठते पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च
वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च र-
सयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ चादातव्यं च पादौ च गंतव्यं च पायुश्च विसर्ज-
यितव्यं चोपस्थश्चानंदयितव्यं च मनश्च मंतव्यं च बुद्धिश्च बोद्धव्यं च अहंकारश्चाहंकर्तव्यं च चित्तं

च वेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं चैष हि द्रष्टा स्प्रष्टा श्रोता घ्राता
रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रम
क्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति तदेष श्लोकः विज्ञानात्मा सह देवैश्च सर्वैः प्राणा
भूतानि संप्रतिष्ठन्ति यत्र तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति अथ हैनं शै
३५ ब्यः सत्यकामः पप्रच्छ स यो ह वै तद्भगवन् मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत कत
मं वाव स तेन लोकं जयतीति तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्मा
द्विद्वानेतेनैवायतनेनैकतरमन्वेति स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जग
त्यामभिसंपद्यते तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महि
मानमनुभवति अथ यदि द्विमात्रेण मनसि संपद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकं स
सोमलोके विभूतिमनुभूय पुनरावर्तते यः पुनरेतं पुनरावर्तते यः पुनरेव महद्वचनं त्रिमात्रे
णोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये अथ यदि त्रिमात्रेण मनसि संपद्य
ते स सामभिरुन्नीयते सूर्यलोकं स सूर्यलोके विभूतिमनुभूय परमभिध्यायीत स तेजसि सूर्ये सं
पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः सोऽथर्वभिरुन्नीयते ब्रह्म

लोकंसएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षते तदेतौश्लोकोभवतः तिस्रोमात्रा
मृत्युमत्यःप्रयुक्ताअन्योन्यसक्ताअनविप्रयुक्ताः क्रियासुवाह्याभ्यंतरमध्यमासुसम्यक्प्रयुक्ता
सुनकंपतेज्ञः ऋग्भिरेतंयजुर्भिरंतरिक्षंसामभिर्यत्तत्कवयोवेदयंते तमोंकारेणैवायतनेनान्वे
तिविद्वान्यत्तच्छांतमजरममृतमभयंपरंपरायणंचेति अथहैनंसुकेशाभारद्वाजःपप्रच्छ
भगवन्हिरण्यनाभःकौशल्योराजपुत्रोमामुपेत्यैतंप्रश्नमपृच्छत षोडशकलंभारद्वाजपु
रुषंवेत्थत महंकुमारमब्रुवंनाहमिमंवेदयद्यहमिममवेदिषं कथंतेनावक्ष्यमितिसमूलोवाएष
परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतंवक्तुं सतूष्णींरथमारुह्यप्रवव्राज
तंत्वापृच्छामिक्वासौपुरुषइति तस्मैसहोवाच इहैवांतःशरीरेसोम्यसपुरुषोयस्मिन्नेताःषोडश
कलाःप्रभवंतीति सईक्षांचक्रेकस्मिन्नहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठा
स्यामीति सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापःपृथिवीमिंद्रियमनोन्नमन्नाद्वीर्यं
तपोमंत्राःकर्मलोकालोकेषुचनामसयथेमानद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंग
च्छंति भिद्येतेतासांनामरूपेसमुद्रइत्येवंप्रोच्यतेएवमेवास्यपरिद्रष्टुरिमाःषोडशकलाःपुरु
षायणाःपुरुषंप्राप्यास्तंगच्छंतिभिद्येतेचासांनामरूपेपुरुषइत्येवंप्रोच्यतेसएषोषोडशक

सोऽमृतोभवति तदेषश्लोकः अराइवरथनाभौकलायस्मिन् प्रतिष्ठिताः तंवेद्यंपुरुषंवे
दयथामावोमृत्युःपरिव्यथइति तानहोवाचैतावदेवाहमेतत्परंब्रह्मवेदनातःपरमस्ती
तितेतमर्चयंतस्त्वंहिनः पितायोस्माकमविद्यायाःपरंपारंतारयसीति नमःपरमऋषि
उप. ८
भ्योनमःपरमऋषिभ्यः ६ इतिप्रश्नोपनिषत्समाप्ता ॥२॥ ओंब्रह्मविद्यांप्रवक्ष्यामिसर्वज्ञा
नमनुत्तमं यत्रोत्पत्तिंलयंचैवब्रह्मविष्णुमहेश्वराः ओंप्रसादात्तममुग्रस्यविष्णोरद्भुतक
र्मणः रहस्यंब्रह्मविद्यायाध्रुवाग्निःसंप्रचक्ष्यते ओमित्येकाक्षरंब्रह्मयदुक्तंब्रह्मवादिभिः
शरीरं तस्यवक्ष्यामिस्थानंकालत्रयंतथा यत्रदेवास्त्रयःप्रोक्तालोकावेदास्त्रयोग्नयः ति
स्रोमात्रार्द्धमात्राश्चत्र्यक्षरस्यशिवस्यच ऋग्वेदोगार्हपत्यश्चपृथिवीब्रह्मएवच अकारस्यश
रीरंतुव्याख्यातंब्रह्मवादिभिः यजुर्वेदांतरिक्षंचदक्षिणाग्निस्तथैवच विष्णुश्चभगवान्दे
वउकारःपरिकीर्तितः सामवेदस्तथाद्यौश्चाहवनीयस्तथैवच ईश्वरःपरमोदेवोमकारःप
रिकीर्तितः सूर्यमंडलमाभातिह्यकारःशंखमध्यगः उकारश्चंद्रसंकाशस्तस्यमध्येव्यव
स्थितः मकारस्त्वग्निसंकाशोविधूमोविद्युतोपमः तिस्रोमात्रास्तथाज्ञेयाःसोमसूर्याग्नि
तेजसः शिखाचदीपसंकाशायस्मिन्नुपरिवर्तते अर्द्धमात्रातथाज्ञेयाप्रणवस्योपरिस्थि

ता पद्मसूत्रनिभा सूक्ष्मा शिखाभा दृश्यते परा सा नाडी सूर्यसंकाशा सूर्यं भित्वा तथापरं द्वासप्त
तिसहस्राणि सूर्यं भित्वा तु मूर्द्धनि वरदः सर्वभूतानां सर्वं व्याप्यैव तिष्ठति कांस्यघंटानिनाद
स्तु यथा लीयति शांतये ॐकारस्तु तथा योज्यः शांतये सर्वमिच्छता यस्मिन्संलीयते शब्दस्त
त्परं ब्रह्म गीयते धियं हि चिंतयेद्ब्रह्म सोमृतत्वाय कल्पते सोमृतत्वाय कल्पत इति इत्यथ
९ र्ववेदे ब्रह्मविद्योपनिषत्समाप्ता १ ॐ क्षुरिकां संप्रवक्ष्यामि धारणां योगसिद्धये यं प्रा
प्य न पुनर्जन्म योगयुक्तः स जायते वेदतत्वार्थविहितं यथोक्तं हि स्वयंभुवा निःशब्दं देशमास्थाय
तत्रासनमवस्थितः कूर्मोंगानीव संहृत्य मनो हृदि निरुध्य च मात्राद्वादशयोगेन प्रणवेन शनैः
शनैः पूरयेत्सर्वमात्मानं सर्वद्वाराणि निरुध्य च उरोमुखकटिग्रीवं किंचिद्धृदयमुन्नत प्राणान्सं
धारयेत्तस्मिन्नासाभ्यंतरचारिणः भूत्वा तत्र गतः प्राणः शनैरथ समुत्सृजेत् स्थिरमात्रादृढं कृ
त्वा अंगुष्ठेन समाहितः द्वे गुल्फे तु प्रकुर्वीत जंघे चैव त्रयस्त्रयः द्वे जानुनी तथोरुभ्यां गुदे शि
श्ने त्रयस्त्रयः वायोरायतनं चात्र नाभिदेशे समाश्रयेत् तत्र नाडी सुषुम्ना तु नाडीभिर्बहु
भिर्वृता अणुरक्ताश्च पीताश्च कृष्णास्ताम्रा विलोहिताः अतिसूक्ष्मां च तन्वीं च शुक्लां नाडीं समा
श्रयेत् ततः संचारयेत्प्राणानूर्णनाभीव तंतुना ततो रक्तोत्पलाभासं पुरुषायतनं महत्

त् दहरं पुंडरीके तु वेदांतेषु निगद्यते तद्भित्वा कंठमायाति तां नाडीं श्रयन् शनैः मनसस्तु क्षुरं
उप. ५ गृह्य सुतीक्ष्णं बुद्धिनिर्मलं पादस्योपरि मध्ये तु तद्रूपं नाम कृंतयेत् १ मनोद्वारेण तीक्ष्णेन
योगमाश्रित्य नित्यशः इंद्रवज्र इति प्रोक्तो मर्मजंघानुकीर्तिते तद्ध्यानबलयोगेन धारणा-
भिर्निकृंतयेत् ऊर्वोर्मध्ये तु संस्थाप्य मर्मप्राणविमोचनं चतुरभ्यासयोगेन छिंद्येदनवशं-
कितः ततः कंठांतरे योगी समूहं नाडिसंचयं एकोत्तरं नाडिशतं तासां मध्ये वराः स्मृताः इडा
रक्षतु वामेन पिंगला दक्षिणेन तु तयोर्मध्ये वरं स्थानं यस्तं वेद स वेदवित् सुषुम्ना तु परे
लीना विरजा ब्रह्मरूपिणी द्वासप्ततिसहस्राणि प्रतिनाडीषु तैतिलं छिद्यते ध्यानयोगेन सु-
षुम्नैका न छिद्यते योगनिर्मलधारेण क्षुरेणानलवर्चसा छिंद्यान्नाडीशतं धीरः प्रभावादिह ज-
न्मनि २ जातीपुष्पसमायोगैर्यथा वास्यति तैतिलं एवं शुभाशुभैर्भावैः सा नाडी तां विभावये-
त् तद्भाविताः प्रपद्यंते पुनर्जन्मविवर्जिताः ततो विदितचित्तस्तु निःशब्दं देशमास्थितः निः-
संगस्तत्वयोगज्ञो निरपेक्षः शनैः शनैः पाशं छित्वा यथा हंसो निर्विशंकः खमुत्क्रमेत् छिन्न-
पाशस्तथा जीवः संसारं तरते तदा यथा निर्वाणकाले तु दीपो दग्ध्वा लयं व्रजेत् तथा सर्वाणि
कर्माणि योगी दग्ध्वा लयं व्रजेत् प्राणायामसुतीक्ष्णेन मात्राधारेण योगवित् वैराग्योपलघृष्टे

नच्छिन्नातेतेनवध्यते अमृतत्वंसमाप्नोतियदाकामात्ममुच्यते सर्वेषणाविनिर्मुक्तोछित्वा
तेतन्नवध्यते छिन्नातेतनवध्यतइति ३ इतिचूलिकोपनिषत्समाप्ता ४ ॐअष्टपादंशुचिंहंस
त्रिसूत्रमणिमव्ययं त्रिवर्त्मानंतेजसंतंसर्वतःपश्यन्नपश्यति भूतसंमोहनेकालेभिन्नेतमसिवैख
रे अंतःपश्यतिसत्वस्थंनिर्गुणोगुणगह्वरे अशक्योसावन्यथाद्रष्टुंध्यायमानःकुमारकैः विकारजननी
मायामष्टरूपामयांध्रुवां ध्यायतेध्यासितातेनतन्यतेप्रेरिता पुनः सूयतेपुरुषार्थंचतेनैवाधिष्ठि
ताः पुरा गौरनादवतीसातुजनित्रीभूतभाविनी असितासितरक्ताचसर्वकामदुघाविभोः पिबंते
नाममृविषयमज्ञाताःकुमारकाः एकस्तुपिबतेदेवःस्वच्छंदेनवशानुगः ध्यानक्रियाभ्यांभगवा
न्भुंक्तेसावप्रसभंप्रभुः सर्वसाधारणीदोग्ध्रीमिज्यमानासुयज्वभिः पश्यंत्यस्यांमहात्मानःसुवर्णंपिप्प
लाशनंउदासीनंध्रुवंहंसंस्नातकाध्वर्यवोजगुः शंसंतमनुशंसंतिवह्वृचःशास्त्रकोविदाः रथंतरंबृ
हत्सामसप्तवैतेचगीयते मंत्रोपनिषदंब्रह्मपदक्रमसमन्वितंपठंतेभार्गवाह्येतदथर्वाणोभृगूत्त
माः १ ब्रह्मचारीचव्रात्यश्चस्कंभोथपलितस्तथा अनड्वानरोहितोच्छिष्टःपठ्यमभ्युविस्तरःकालःप्राण
श्चभगवान्नात्मापुनस्सप्तदशच शर्वोभवश्चरुद्रश्चश्यावश्यापुरुषस्तथा प्रजापतिर्विराट्चैवपालि
सलिलमेवच स्तूयतेमंत्रसंयुक्तैरथर्वविदितैर्विभुः तंषड्विंशकमित्येकेसप्तविंशंतथापरेपुरुषंनि

गुणं सांख्यमथर्वाणाशिरोविदः चतुर्विंशतिसंख्याकमव्यक्तं व्यक्तदर्शने अद्वैतं द्वैतमित्येतत्त्रि-
धात पंचधा तथा ब्रह्माद्यं स्थावरांतं च पश्यंते ज्ञानचक्षुषः तमेकमेव पश्यंति परिशुभ्रं विभुं द्वि-
जाः यस्मिन्सर्वमिदं प्रोतं ब्रह्म स्थावरजंगमं तस्मिन्नेव लयं यांति स्रवंत्यः सागरे यथा यस्मिन्भावाः
प्रलीयंते लीनाश्चाव्यक्ततां ययुः पश्यंते व्यक्ततां भूयो जायंते बुद्बुदा इव क्षेत्रज्ञाधिष्ठितं चैव कारणै-
र्व्यंजयेद्युः एवं सहस्रशो देवं पश्यंते पुनः पुनः य एवं श्रावयेच्छ्राद्धे ब्राह्मणो नियतव्रतः अक्ष-
य्यमन्नपानं च पितृणां चोपतिष्ठते ब्रह्म ब्रह्मविधानेन ये विदुर्ब्राह्मणादयः ते लयं यांति तत्रैव ली-
नाः स्याद्ब्रह्मशापि न लीनाः स्याद्ब्रह्मशापिन इति २ अथर्ववेदचूलिकोपनिषत्समाप्तः ५ ॐ
देवा ह वै स्वर्गं लोकमायंस्ते रुद्रमपृच्छन्को भवानिति सोऽब्रवीदहमेकः प्रथममासीद्वर्तामि च भवि-
उप॰ ष्यामि नान्यः कश्चिन्मत्तो व्यतिरिक्त इति सोंऽतरादंतरं प्राविशद्दिशश्चांतरं प्राविशत्सोऽहं नित्यानित्यो
१० व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्रांचः प्रत्यंचोऽहं दक्षिणांच उदंचोऽहमधश्चोर्ध्वश्चाहं दिशश्च प्रतिदिशश्चा-
हं पुमानपुमान्स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप्चाहं छंदोऽहं सत्योऽहं दक्षिणाग्नि-
राहवनीयोऽहं गार्हपत्योऽहं गौर्यहं ऋगहं यजुरहं सामाहमथर्वांगिरसोऽहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमा-
पोऽहं तेजोऽहं गुह्योऽहमरण्योऽहमक्षरमहं क्षरमहं पुष्करमहं पवित्रमहमग्रं च बहिश्च पुरस्ताज्ज्यो-

त्तिरित्यहमेवसर्वेभ्योमामेवससर्वंसमांयोमांवेदसदेवान्वेदसर्वांश्चवेदान्सांगानपिब्रह्मब्राह्मणैश्चगां
गोभिर्ब्राह्मणान्ब्राह्मण्येनहविर्हविषाआयुरायुषासत्येनसत्यंधर्मेणधर्मंतर्पयामिस्वेनतेजसात
तोहवैतेदेवारुद्रमपृच्छंस्तेदेवारुद्रमपश्यंस्तेदेवारुद्रमध्यायंस्तेदेवाऊर्ध्वबाहवोरुद्रंस्तुवंति २
योवैरुद्रःसभगवान्यश्चब्रह्मातस्मैवैनमोनमः १ योवैरुद्रःसभगवान्यश्चविष्णुस्तस्मैवैनमोन
मः २ योवैरुद्रःसभगवान्यश्चस्कंदस्तस्मैवैनमोनमः ३ योवैरुद्रःसभगवान्यश्चेंद्रस्तस्मैवैन
मोनमः ४ योवैरुद्रःसभगवान्यश्चाग्निस्तस्मैवैनमोनमः ५ योवैरुद्रःसभगवान्यश्चवायुस्त
स्मैवैनमोनमः ६ योवैरुद्रःसभगवान्यश्चसूर्यस्तस्मैवैनमोनमः ७ योवैरुद्रःसभगवान्यश्च
सोमस्तस्मैवैनमोनमः ८ योवैरुद्रःसभगवान्यश्चग्रहास्तस्मैवैनमोनमः ९ योवैरुद्रःसभग
वान्यश्चाष्टौप्रतिग्रहास्तस्मैवैनमोनमः १० योवैरुद्रःसभगवान्यश्चभूस्तस्मैवैनमोनमः ११ योवै
रुद्रःसभगवान्यश्चभुवस्तस्मैवैनमोनमः १२ योवैरुद्रःसभगवान्यश्चस्वस्तस्मैवैनमोनमः १३
योवैरुद्रःसभगवान्यश्चमहस्तस्मैवैनमोनमः १४ योवैरुद्रःसभगवान्याचपृथिवीतस्मै॰ योवै॰
यश्चांतरिक्षंतस्मै॰ योवै॰ याचद्यौस्तस्मै॰ योवैरुद्रःसभगवान्यश्चापस्तस्मै॰ योवै॰ यश्चतेज
स्तस्मै॰ योवै॰ यश्चाकाशंतस्मै॰ योवै॰ यश्चकालस्तस्मै॰ योवै॰ यश्चयमस्तस्मै॰ योवै॰ यश्चम

उप॰ ११

यस्तस्मै॰ योवै॰ यच्चाक्षरंतस्मै॰ योवै॰ यच्चविश्वंतस्मै॰ योवै॰ यच्चस्थूलंतस्मै॰ योवै॰
यच्चसूक्ष्मंतस्मै॰ योवै॰ यच्चशुक्लंतस्मै॰ योवै॰ यच्चकृष्णंतस्मै॰ योवै॰ यच्चकृत्स्नंतस्मै॰
योवै॰ यच्चसत्यंतस्मै॰ योवैरुद्रःसभगवान्यच्चसर्वंतस्मैवैनमोनमः ३ भूस्त्वमादिर्मध्यं
भुवस्तेस्वस्तेशीर्षंविश्वरूपोसिब्रह्मैकस्त्वंद्विधात्रिधास्त्वंशान्तिस्त्वंपुष्टिस्त्वंहुतमहुतंद
त्तमदत्तंसर्वमसर्वंविश्वमविश्वंकृतमकृतंपरमपरंपरायणंचत्वंअपामसोमममृताअ
भूमागमज्योतिरविदामदेवान् किंनूनमस्मान्कृणवदरातिःकिमुधूर्तिरमृतमर्त्यस्य
सोमसूर्यपुरस्तात्सूक्ष्मःपुरुषःसर्वंजगद्धितंवाएतदक्षरंप्राजापत्यंसौम्यं सूक्ष्मंपुरुषंग्रा
ह्यमग्राह्येनभावंभावेनसौम्यंसौम्येनसूक्ष्मंसूक्ष्मेनवायव्यंवायव्येनग्रसतितस्मैमहाग्रासा
यवैनमोनमः हृदिस्थादेवताःसर्वाःहृदिप्राणाःप्रतिष्ठिताः हृदित्वमसियोनित्यंति
स्रोमात्राःपरस्तुसः तस्योत्तरतःशिरोदक्षिणतःपादौयउत्तरतःसओंकारःयओंकारःस
प्रणवोयःप्रणवःसर्वगोयःसर्वगः ससर्वव्यापीयःसर्वव्यापीसोनंतोयोनंतस्तत्तारं
यत्तारंतत्शुक्लंयच्छुक्लंतत्सूक्ष्मंयत्सूक्ष्मंतद्वैद्युतंयद्वैद्युतंतत्परंब्रह्मसएकोयएकः
सरुद्रोयोरुद्रःसईशानोयईशानःसभगवान्महेश्वरः ३ अथकस्मादुच्यते ॥ ओंकारोय

११

स्माडुच्चार्यमाणएवप्राणान ऊर्द्ध्वमुत्क्रामयतितस्माडुच्यतेॐकारो अथकस्माडुच्यते
प्रणवोयस्माडुच्चार्य्यमाणएवऋग्यजुःसामाथर्वांगिरसोब्रह्मब्राह्मणेभ्यः प्रणामयति
नामयतिचतस्माडुच्यतेप्रणवोअथकस्माडुच्यतेप्राणः यस्माडुच्चार्यमाणएवप्राणान्स-
र्वान्परमात्मनिप्रणामयतितस्माडुच्यतेप्राणः अथकस्माडुच्यतेसर्वव्यापीयस्माडुच्चार्य-
माणएवसर्वान्लोकान्व्याप्नोतियथास्नेहेनपलपिंडमिवशान्तरूपमोतप्रोतमनुप्राप्तो-
व्यतिषक्तश्चतस्माडुच्यतेसर्वव्यापी अथकस्माडुच्यतेनंतोयस्माडुच्चार्यमाणएवतिर्य्य-
गूर्द्ध्वमधस्ताच्चास्यांतोनोपलभ्यतेतस्माडुच्यतेनंतो अथकस्माडुच्यतेतारंयस्माडुच्चार्य्यमा-
णएवगर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयतित्रायतेतस्माडुच्यतेतारमथक-
स्माडुच्यतेशुक्लंयस्माडुच्चार्य्यमाणएवक्लंदतेक्लामयतेतस्माडुच्यतेशुक्लमथकस्माडुच्यते
सूक्ष्मंयस्माडुच्चार्य्यमाणएवसूक्ष्मोभूत्वाशरीराण्यधितिष्ठतिसर्वाणिचांगान्यधितिष्ठतिस-
र्वाणिचांगान्यभिमृशतितस्माडुच्यतेसूक्ष्मं अथकस्माडुच्यतेवैद्युतंयस्माडुच्चार्य्यमाणएवव्य-
क्तेमहतितमसिद्योतयतेतस्माडुच्यतेवैद्युतमथकस्माडुच्यतेपरंब्रह्मयस्मात्परमपरंपराय-
णंचबृहद्बृहत्याबृंहयतितस्माडुच्यतेपरंब्रह्म अथकस्माडुच्यतेएकोयः सर्वान्कामान्संभ

उप०
१२

ग्रसानाजः संसृजति विसृजति च तीर्थमेके व्रजंति तीर्थमेके दक्षिणाः प्रत्यंचोदंच प्रांचोभिव्रजंत्ये
के तेषां सर्वेषामिह संगतिः साकं स एको भूतश्चरति प्रजानां तस्मादुच्यत एकः अथ कस्मादु
च्यते रुद्रः यस्मादृषिभिर्नान्यैर्भक्तैर्न तमस्य रूपमुपलभ्यते तस्मादुच्यते रुद्रः अथ कस्मादुच्य
त ईशानः यः सर्वान्देवानीशत ईशनीभिर्जननीभिश्च शक्तिभिः अभित्वा शूर नोनुमो दु
ग्धा इव धेनवः ईशानमस्य जगतः स्वः दृशमीशानमिंद्र तस्थुष इति तस्मादुच्यत ईशानः अ
थ कस्मादुच्यते भगवान्महेश्वरः यस्माद्भक्ता ज्ञानेन भजंत्यनुगृह्णाति च वाचं संसृजति वि
सृजति च यः सर्वान्भावान्परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते तस्मादुच्यते
भगवान्महेश्वरस्तदेतद्रुद्रचरितं ४ एको ह देवः प्रदिशो नु सर्वाः पूर्वो ह जातः स उ गर्भे अं
तः स एव जातः स जनिष्यमाणः प्रत्यग्जनास्तिष्ठति सर्वतोमुखः एको रुद्रो न द्वितीयाय तस्थे
य इमांल्लोकानीशत ईशनीभिः प्रत्यङ्जनास्तिष्ठति सर्वतः चांतकाले संसृज्य विश्वा भुवनानि
गोप्ता यो योनिं योनिमधितिष्ठत्येको येनेदं सर्वं विचरति सर्वं तमीशानं वरदं देवमीड्यं निचा
य्येमां शांतिमत्यंतमेति क्षमां हित्वा हेतुजालस्य मूलं बुद्ध्या संचितं स्थापयित्वा तु रुद्रे रुद्रमेक
त्वमाहुः शाश्वतं वै पुराणमिषमूर्जेण पशवोनुनामयंतं मृत्युपाशान् तदेतेनात्मन्नेतेना

ई चतुर्थी मात्रा ईशानो तिसंसृजन्ति पशुपाशविमोक्षणं या सा प्रथमा मात्रा ब्रह्मदेवत्या रक्ता व
र्णेन यस्तां ध्यायते नित्यं स गच्छेद्ब्राह्मं पदं या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णा वर्णेन यस्तां
ध्यायते नित्यं स गच्छेद्वैष्णवं पदं या सा तृतीया मात्रा ईशानदेवत्या कपिला वर्णेन यस्तां ध्यायते नि
त्यं स गच्छेदैशानं पदं या सार्द्धचतुर्थी मात्रा सर्वदेवत्याव्यक्तीभूता खं विचरति शुद्धस्फटिकस
न्निभा वर्णेन यस्तां ध्यायते नित्यं स गच्छेत्पदमनामकं एतदेतदुपासीत मुनयो वाग्वदंति न तस्य ग्र
हणमयं पंथा विहित उत्तरेण येन देवा यांति येन पितरो येन ऋषयः परमपरं परायणं चेति वा
लाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातरूपं वरेण्यं तमात्मस्थं येऽनुपश्यंति धीरास्तेषां शां
तिर्भवति नेतरेषां यस्मिन्क्रोधं यां च तृष्णां क्षमां च तृष्णां हित्वा हेतुजालस्य मूलं बुद्ध्या संचितं स्था
पयित्वा तु रुद्रे रुद्रमेकत्वमाहुः रुद्रो हि शाश्वतेन वै पुराणेनेषमूर्जेन तपसा नियंता अग्नि
रिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूं
षि यस्माद्व्रतमिदं पाशुपतं यद्भस्मनांगानि संस्पृशेत् तस्माद्ब्रह्म तदेतत्पाशुपतं पशुपाशविमो
क्षणाय ५ यो अग्नौ रुद्रो यो अप्स्वंतर्य ओषधीर्वीरुध आविवेश य इमा विश्वा भुवनानि चाक्लृपे त
स्मै रुद्राय नमो अस्त्वग्नये यो रुद्रोऽप्स्वंतर्य ओषधीर्वीरुध आविवेश यो रुद्र इमा वि

ष्वाभुवनानिचाक्लृपेतस्मैरुद्रायवैनमोनमः योरुद्रोअप्सुयोरुद्रः ओषधीषुयोवनस्पतिषुयेनरु
द्रेणजगदूर्ध्वंधारितंपृथिवीद्विधा त्रिधाधर्त्ताधारितानागायेंतरिक्षेतस्मैरुद्रायवैनमोनमः मू
र्द्धानमस्यसंसेव्याप्यथर्वाहृदयंचयत् मस्तिष्कादूर्द्ध्वःप्रेरयत्यवमानोधीशीर्षतः तद्वाअथर्वणः
शिरोदेवकोशःसमुज्झितः तत्प्राणोअभिरक्षतिशिरोअन्नमथोमनः नचदिवोदेवजनेनगोप्ता
उप- नचांतरिक्षाणिनच[illegible]मयइमाः यस्मिन्निदंसर्वमोतप्रोतंयस्मादन्यंनपरंकिंचिनास्ति नत
२१ स्मात्पूर्वंनपरंतदस्तिनभूतंनोतभव्यंयदासीत् सहस्रपादेकमूर्द्धाव्याप्तंसएवेदमावरीवर्त्ति
भूतं अक्षरात्संजायतेकालः कालाद्व्यापकउच्यतेव्यापकोहिभगवान्रुद्रोभोगायमानोय
दाशयतेरुद्रस्तदासंहार्यतेप्रजाः उच्छ्वसितेतमोभवतितमसआपोप्स्वंगुल्यामथितेमथिते।
शिशिरेशिशिरंमथ्यमानंफेनोभवति फेनादंडंभवत्यंडाद्ब्रह्माभवतिब्रह्मणोवायुर्वायोरोंका
रओंकारात्सावित्रीसावित्र्यागायत्रीगायत्र्यालोकाभवंति अर्चयंतितपःसत्यंमधुक्षरंतियद्ध्रु
वं एतद्धिपरमंतपः आपोज्योतिरसोमृतंब्रह्मभूर्भुवःस्वरोंनमः ८ यइदमथर्वशिरोब्राह्म
णोधीतेअश्रोत्रियःश्रोत्रियोभवतिअनुपनीतउपनीतोभवतिसोग्निपूतोभवतिसवायुपू
तोभवतिससूर्यपूतोभवतिससोमपूतोभवतिससत्यपूतोभवतिससर्वपूतोभवतिसर्वैर्वेदै

त्रीतो भवति स सर्वैर्वेदैर्ध्यातो भवति स सर्वैस्तीर्थैः स्नातो भवति तेन सर्वैः क्रतुभिरिष्टं भ
वति गायत्र्याः षष्टिसहस्राणि जप्तानि भवंतीतिहासपुराणानां रुद्राणां शतसहस्राणि जप्ता
नि भवंति प्रणवानामयुतं जप्तं भवत्याचक्षुषः पंक्तिं पुनात्यासप्तमात्पुरुषयुगान्पुनातीत्याह
भगवानथर्वशिरः सकृज्जप्त्वैव शुचिः पूतः कर्मण्यो भवति द्वितीयं जप्त्वा गाणापत्यमवाप्नो
ति तृतीयं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्यम् इत्यथर्ववेदेऽथर्वशिरोपनिषत्समाप्ता ८
ओं पिप्पलादोऽङ्गिराः सनत्कुमारश्चाथर्वाणं भगवंतं पप्रच्छ किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं
किं तत् ध्यानं को वा ध्याता कश्च ध्येयः स एभ्योऽथर्वा प्रत्युवाचोमित्येतदक्षरमादौ प्रयुक्तं ध्यानं
ध्यायितव्यमोमित्येतदक्षरस्य पादाश्चत्वारो देवाश्चत्वारो वेदाश्चत्वारश्चतुष्पादेतदक्षरं परं ब्रह्म
पूर्वास्य मात्रा पृथिव्यकारः स ऋग्भिः ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्या द्वितीयांतरि
क्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णू रुद्रो रुद्रास्त्रिष्टुप् दक्षिणाग्निस्तृतीया द्यौर्मकारः स सामभिः
सामवेदो विष्णू रुद्रादित्या जगत्याहवनीयो यावसानेऽस्य चतुर्थ्यर्द्धमात्रा सा सोमलोक ओम
मकारः सोऽथर्वणैर्मंत्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकऋषिर्भास्वती स्मृता प्रथ
मा रक्ता पीता ब्रह्मदेवत्या द्वितीया शुभा शुक्ला रौद्री रुद्रदेवत्या तृतीया कृष्णा विद्युन्मती विष्णु

देवत्याचतुर्थीविद्युन्मती पुरुषवर्णा पुरुषदेवत्या: सएव गंकारस्सतत्पादश्चत: शिरा:
चतुर्थ्यर्द्धमात्रास्थूलह्रस्वदीर्घप्लुत: ॐॐॐमितित्रिरुक्तस्सतुर्थ: शान्तात्मा प्लुतप्रयोगेन
समस्तोभिस्यात्मज्योति: सकृदावर्तते: सएव: सर्वान्प्राणानसकृदुच्चारितमात्र: सएव
मूर्द्धमुत्क्रामयतीत्योंकार: । प्रणव: सर्वान्प्राणान्प्रणामयति नामयति चेतस्मात्प्रण
उप. १८ वश्चतुर्द्धावस्थितइतिवेदवेदयोनिर्धेयाश्चेतिसंहर्ता: सर्वेभ्योदु:खभयेभ्य: संतारय
तितारणात्सर्वाणिसर्वाणीतिविष्णु: सर्वान्जयतिब्रह्मोद्बृहत्सर्वकारणानिसंप्रतिष्ठाप्य
ध्यानाद्विष्णुमनसिनादांतेपरमात्मनिस्थाप्यध्येयमीशानंप्रध्यायंतीशानावासर्वमिदम्प्र
युक्तेब्रह्मविष्णुरुद्रेंद्रा:संप्रसूयंते सर्वाणिचेंद्रियाणिसहत्वभूतानिकारणंसर्वमैश्वर्य
संपन्नंशिवमाकाशमध्येध्रुवस्थब्रह्माविष्णुरुद्रेश्वर:शिवएकश्च पंचधापंचदेवता:
प्रणव:परिपठ्यते तत्रापिकंठ्याणमेकमात्रायकृतशतस्यापिफलमवाप्नोति कृत्स्नमों
कारगतेनचसर्वज्ञानेनयोगध्यानानां शिवएकोध्येय: शिवोंकार: सर्वमन्यत्परित्यज्येता
तामधीत्यद्विजोगर्भवासान्मुच्यतेगर्भवासान्मुच्यतइति ॥ २ ॥ इतिश्रीअथर्ववेदेअथर्वशि
खोपनिषत्समाप्त ॥ ॐपंचात्मकेपंचसुवर्तमानंषडाश्रयंषड्गुणयोगयुक्ते नन्तमथा

तं विमलं हृदियोग्निं चतुर्विधाहारमयं शरीरं पंचात्मकं कस्मात् पृथिव्यापस्तेजोवायुराका
शमित्यस्मिन्पंचात्मके शरीरे का पृथिवी का आपः किं तेजः को वायुः किमाकाशं तत्र य
त्कठिनं सा पृथिवी यद्द्रवं ता आपो यदुष्णं तत्तेजो यत्संचरति स वायुर्यत्सुषिरं तदाकाशं त
त्र पृथिवी धारणे आपः पिंडीकरणे तेजः प्रकाशने वायुर्व्यूहने आकाशमवकाशप्रदा
ने पृथक् श्रोत्रे शब्दोपलब्धौ त्वक्स्पर्शे चक्षुषी रूपे जिह्वा रसने नासिका घ्राणे उपस्थ
आनंदने अपानमुत्सर्गे बुध्या बुध्यति मनसा संकल्पयति वाचा वदति षडाश्रयं कस्मात् मधुरा
म्ललवणतिक्तकटुकषायरसान्विंदतीति षड्जर्षभगांधारमध्यमपंचमधैवतनिषा
दाश्चेति इष्टानिष्टशब्दसंज्ञाः प्रणिधानाद्दशविधानि भवंति १ सप्तधातुकं कस्मात् शुक्लो रक्तः
कृष्णो धूम्रः पीतकः कपिलः पांडुर इति यथा देवदत्तस्य द्रव्यादिविषया जायंते परस्परं सौम्य
गुणत्वात् षड्विधो रसो रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसः स्नावा स्नाव्नोऽस्थीन्यस्थि
भ्यो मज्जा मज्ज्ञः शुक्रं शुक्रशोणितसंयोगादावर्तते गर्भो हृदि व्यवस्थां नयति हृदयेंऽतराग्नि
स्थाने पित्तं पित्तस्थाने वायुर्वायुतो हृदयं प्राजापत्यात्क्रमात् २ तदिदं ऋतुकाले संप्रयोगा
देकरात्रोषितं कललं भवति सप्तरात्रोषितं बुद्बुदं अर्धमासाभ्यंतरे कठिनो मासद्वयेन शिरो

ग्रीवामासत्रयेणापादप्रदेशश्चतुर्थेऽङ्गप्रत्यङ्गोजठरकटिप्रदेशाः पंचमे पृष्ठिवंशः षष्ठे मुखना
सिकाक्षिश्रोत्राणि सप्तमे जीवेन संयुक्तोऽष्टमे सर्वसंपूर्णः पितुरेतोऽतिरेकात्पुरुषो मातृ
रेतोऽतिरेकात्स्त्र्युभयबीजतुल्यत्वान्नपुंसकं व्याकुलितमनसोऽन्धाः खञ्जाः कुब्जा वामनका
भवन्त्यन्योन्यवायुपरिपीडितः शुक्रद्वैध्याद्विधा तनुः स्याद्युग्माः प्रजायन्ते पंचात्मकः समर्थः
उप. १५ पंचात्मिकातेजसा वृद्धिर्गन्धरसादिज्ञानाहाराहारं मोहं वितर्पयतीति तदेकाक्षरं ज्ञात्वाऽ
ष्टौ प्रकृतयः षोडशविकाराः अथ मात्राशितपीतनाडीसूत्रगतेन प्राणा आप्याय्यन्ते अथ न
वमे मासि सर्वलक्षणज्ञानसंपूर्णो भवति पूर्वजातीः स्मरति शुभाशुभं च कर्म विंदति १
आहारा विविधा भुक्ताः पीताश्च विविधाः स्तनाः जातश्चाहं मृतश्चैव जन्म जन्म पुनः पुनः २
नष्टश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः नानायोनिसहस्राणि मया दृष्टानि यानि वै मातरो
विविधा दृष्टाः पितरः सुहृदस्तथा अवाङ्मुखः पीडितोऽहं जंतुभिश्च समन्वितः यन्मया परि
जनस्यार्थे कृतं कर्म शुभाशुभं एकाकी तेन दह्येऽहं गतास्ते फलभोगिनः यदि योन्याः प्रमु
च्येऽहं तत्प्रपद्ये महेश्वरं अशुभक्षयकारकं फलमुक्तिप्रदायकं यदि योन्याः प्रमुच्येऽहं तत्सांख्यं योगम
भ्यसे अशुभक्षयकारकं फलमुक्तिप्रदायकं अथ योनिद्वारं संप्राप्तो यंत्रेणापीड्यमानो १५

१८

महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृष्टस्तदा न स्मरति जन्ममरणानि न च कर्म शुभाशु
भं विंदति ४ शरीरं कस्मादग्नयो ह्यत्र श्रीयंते ज्ञानाग्निर्दर्शनाग्निः कोष्ठाग्निरिति तत्र कोष्ठाग्निर्ना
म अशितपीतलेह्यचोष्यं पचतीति दर्शनाग्नी रूपाणां दर्शनं करोति ज्ञानाग्निः शुभाशुभं च कर्म वि
दति त्रीणि स्थानानि भवंति मुखे आहवनीय उदरे गार्हपत्यो हृदि दक्षिणाग्निः आत्मा यजमानो
मनो ब्रह्मा लोभादयः पशवो धृतिर्दीक्षा संतोषश्च बुद्धींद्रियाणि यज्ञपात्राणि कर्मेंद्रियाणि
हवींषि शिरः कपालं केशा दर्भा मुखमंतर्वेदिश्चतुः कपालं शिरः षोडश पार्श्वदंतोष्ठपटा
लानि सप्तोत्तरं मर्मशतं साशीतिकं संधिशतं सनवकं स्नायुशतं सप्त शिराशतानि पंच मज्जाश
तान्यस्थीनि च ह वै त्रीणि शतानि षष्टिः सार्धचतस्रो रोमाणि कोट्यो हृदयं पलान्यष्टौ द्वादश पलानि जि
ह्वा पित्तं प्रस्थं कफस्याढकं शुक्रं कुडवं मेदः प्रस्थौ द्वावनियतं मूत्रपुरीषमाहारपरिमाणात्पैप्प
लादं मोक्षशास्त्रं पैप्पलादं मोक्षशास्त्रमिति ५ इति गर्भोपनिषत्समाप्ता ८॥ ॐ अथातो
महोपनिषदमेव तदाहुरेको ह वै नारायण आसीन्न ब्रह्मा नेशानो नापो नाग्नीषोमौ नेमे द्या
वापृथिवी न नक्षत्राणि न सूर्यः स एकाकी न रमते तस्य ध्यानांतःस्थस्य यज्ञस्तोममुच्यते तस्मि
न्पुरुषाश्चतुर्दश जायंते एका कन्या दशेंद्रियाणि मन एकादशं तेजो द्वादशमहंकारस्त्रयो

दशेंद्रियाणि चतुर्दशेंद्रियात्मा पंचदशी बुद्धिः पंचतन्मात्राणि पंचमहाभूतानि समष्टिः पंचविंश
कः पुरुषस्तं पुरुषं पुरुषो निविश्य नास्य प्रत्तान संवत्सराज्जायते संवत्सरादधिजायते अथ
पुनरेव नारायणः सोन्यत्कामो मनसाध्यायत तस्य ध्यानांतःस्थस्य ललाटात्त्र्यक्षः शूलपाणिः
पुरुषो जायते बिभ्रच्छ्रियं सत्यं ब्रह्मचर्यं तपो वैराग्यं मन ऐश्वर्यं सप्रणवा व्याहृतय ऋग्यजुः सा
उप. १८ मथर्वांगिरसः सर्वाणि छंदांसि तान्यंगे ह्याश्रितान्यथ पुनरेव नारायणः सोन्यत्कामो मनसाध्या
यत तस्य ध्यानांतःस्थस्य ललाटात्स्वेदोपतत्ता इमाः प्रतता आपस्ता स्वे तेजो हिरण्मयमंड
तत्र ब्रह्मा चतुर्मुखोजायत सोध्यायत पूर्वाभिमुखो भूत्वा भूरिति व्याहृतिर्गायत्रं छंद ऋग्वेदः
पश्चिमाभिमुखो भूत्वा भुव इति व्याहृतिस्त्रैष्टुभं छंदो यजुर्वेद उत्तराभिमुखो भूत्वा स्वरिति व्याहृ
तिर्जागतं छंदः सामवेदो दक्षिणाभिमुखो भूत्वा जन इति व्याहृतिरानुष्टुभं छंदोथर्ववेदः सह
स्रशीर्षं देवं सहस्राक्षं विश्वशंभुवं विश्वतः परमं नित्यं विश्वं नारायणं हरिं विश्वमेवेदं पुरुषं
तं विश्वमुपजीवति ऋषिक विविश्वस्वरं देवं समुद्रं तं विश्वरूपिणं पद्मकोशप्रतीकाशं लंब
त्याकोशसन्निभं हृदये चाप्यधोमुखं संततं सीकराभिश्च तस्य मध्ये महानग्निर्विश्वार्चिर्विश्व
तोमुखं तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता तस्याः शिखाया मध्ये पुरुषः परमात्मा व्य

व्यस्थितः सब्रह्मा सईशानः सोक्षरः परमः स्वराट् १ यइदंमहोपनिषदंब्राह्मणोधीतेअश्रोत्रियो
भवत्यनुपनीतउपनीतोभवतिसोग्निपूतोभवतिसवायुपूतोभवतिससूर्यपूतोभवतिससोम
पूतोभवति ससत्यपूतोभवतिससर्वपूतोभवतिससर्वैर्देवैर्ज्ञातोभवतिससर्वेषुवेदेष्वनुध्याता
भवतिससर्वैर्वेदैरनुध्यातोभवतिससर्वेषुतीर्थेषुस्नातोभवतितेनसर्वैःक्रतुभिरिष्टंभवति
गायत्र्याःषष्टिसहस्राणिजप्तानिभवंतीतिहासपुराणानांरुद्राणांशतसहस्राणिजप्तानिभवं
तिगायत्र्याःषष्टिसहस्राणिजप्तानिभवंतीतिहासपुराणानांरुद्राणांशतसहस्राणिजप्ता
निभवंतिप्रणवानामयुतंजप्तंभवत्याचक्षुषःपंक्तिंपुनातिआसप्तमात्पुरुषयुगान्पुनाती
त्याहभगवान्हिरण्यगर्भोजाप्येनामृतत्वंगच्छत्यमृतत्वंचगच्छतीति २ इतिमहोपनिषत्समा
प्ता ८ ॥ ॐअथास्यपुरुषस्यचत्वारिस्थानानिभवंतिनाभिर्हृदयंकंठंमूर्धेतितत्रचतुष्पाद्ब्र
ह्मविभाति ॐशौनकोहवैमहाशालोंगिरसंभगवंतंपिप्पलादंपप्रच्छ दिव्येब्रह्मपुरेसंप्रस्थि
तिष्ठिताभवंतिकथंसृजंतिकस्यैषमहिमाबभूवयोह्येषमहिमाबभूवकएषतस्मैसहोवाचब्र
ह्मविद्यांवरिष्ठांप्राणोह्येषआत्माआत्मनोमहिमाबभूवदेवानामायुःसदेवानांनिधनमनिधनं
दिव्येब्रह्मपुरेविरजंनिष्कलंशुभ्रमक्षरंयद्ब्रह्मविभातिसनियच्छतिमधुकराराजानंमाक्षिकवद्यथा

भातिकेननेन्द्रुनान्नालेविद्विपतितेनापर्कर्षतियथैवेषप्राणोयदायदायातिसंस्तस्माकृष्या
णादेवतास्ता:सर्वानाय:स्वष्टुपेनरूपेनाकाशवद्यथाविशपेनमाश्रित्यपातिस्वमालयमेवंस
श्मैमोत्रनेतयथैवेषदेवदत्तोयष्ट्यादितात्रमानोनमपेवमिष्टाप्तूर्तै:सुभासुभैर्नेलिप्यतेयथा
उप० क्रमारोति:कामस्त्रानेदमुपयामतिपथैवेषदेवदत्तस्वमनममभियातिवेदयवपरंमपातिओ।
१८ नि:कामोज्योतिरानेदयतेसूयमानेनेवसमायगच्छतिपश्यतिजलोकावयथाजलोकाग्र
न मग्रेनयत्यात्मानेयातिपरंमथपत्यपरंत्यजतिसजाग्रमभिधीयतेतथैवेषकपालाष्टकेसत्र
पतितमेवसनद्वलेवेनवेदयषदेवयोनिर्यत्रजाग्रतिसुभासुभंमनिननकमस्यदेवस्यसं।
प्रसादोतर्यामीखगः कर्कटकः पुष्कर: पुरुष:प्राणोहिंसापरापरंब्रह्मात्मादेवतावेदप
तियएवंवेदसपरंब्रह्मधाममेत्रज्ञमुपैति अथास्यपुरुषस्यचत्वारिस्थानानिभवंतिना।
भिहृदयंकंठमूर्द्धेनितत्रचतष्पादंब्रह्मविभातिजागरितंस्वप्नंसुषुप्तंतुरीयमितिजागरिते
ब्रह्मास्वप्नेविष्णु:सुषुप्तेरुद्रस्तुरीयेपरमक्षरंसआदित्य:विष्णु:सपुरुष:सप्राण:सजीव:।
सोग्नि:सेश्वरश्चजाग्रत्तेषांमध्येयत्परंब्रह्मविभातिस्वयममनस्कमश्रोत्रमपाणिपादंज्यो
तिर्वर्जितंनतत्रलोकानलोकावेदानवेदादेवानदेवायज्ञानयज्ञामातानमातापितानपि

२

नास्नुषा न स्नुषा चांडालो न चांडालः पौल्कसो न पौल्कसः श्रमणो न श्रमणः पशवो न पशवः ता
पसो न तापस इत्येकमेव परं ब्रह्म विभाति हृद्याकाशे तद्विज्ञानमाकाशे तच्छुभ्रमाकाशे तद्रे
घा हृद्याकाशे यस्मिन्निदं संचरति यस्मिन्निदं सर्वमोतप्रोतं स विभोः प्रजाः स विज्ञाय न तत्र दे
वा लोकास्त्रयः पितर ईशते प्रतिबुद्धः सर्वविदिति २ हृदिस्था देवताः सर्वा हृदि प्राणाः प्रति
ष्ठिता हृदि प्राणश्च ज्योतिश्च त्रिवृत्सूत्रं च यन्महत् हृदि चैतन्ये तिष्ठति यज्ञोपवीतं परमं प
वित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः स
शिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् सूचनात्सूत्र
मित्याहुः सूत्रं नाम परं पदं तत्सूत्रं विदितं येन स विप्रो वेदपारगः तेन सर्वमिदं प्रोतं सूत्रे मणि
गणा इव तत्सूत्रं धारयेद्योगी योगवित्तत्वदर्शिवान् बहिःसूत्रं त्यजेद्विद्वान् योगमुत्तममास्थितः
ब्रह्मभावमयं सूत्रं धारयेद्यः स चेतनः धारणात्तस्य सूत्रस्य नोच्छिष्टो नाशुचिर्भवेत् सूत्रमंतर्ग
तं येषां ज्ञानयज्ञोपवीतिनां ते वै सूत्रविदो लोके ते च यज्ञोपवीतिनः ज्ञानशिखिनो ज्ञाननि
ष्ठा ज्ञानयज्ञोपवीतिनः ज्ञानमेव परं तेषां पवित्रं ज्ञानमुत्तमं अग्नेरिव शिखा नान्या यस्य ज्ञानम
यी शिखा स शिखीत्युच्यते विद्वान्नेतरे केशधारिणः कर्मण्यधिकृता ये तु वैदिके ब्राह्मणाद

यः नैः संध्यार्यमिदंस्मृतंक्रियांगंतद्धिवैस्मृतं शिखाज्ञानमयीयस्योपवीतंचतन्मयं ब्राह्मण्यं
सकलंतस्यइतिब्रह्मविदोविदुः इदंयज्ञोपवीतंतुपरमंयत्परायणं विद्वान्यज्ञोपवीतीस्या
त्तस्यज्ञः सचयज्ञवित् एकोदेवः सर्वभूतेषुगूढः सर्वव्यापीसर्वभूतांतरात्मा कर्माध्यक्षः सर्व
भूताधिवासः साक्षीचेताकेवलोनिर्गुणश्च एकोमनीषीनिः क्रियाणांबहूनामेकंसंतंबहु
३५· धायः करोति तमात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिः शाश्वतीनेतरेषां आत्मानमरणिं
१२ कृत्वाप्रणवंचोत्तरारणिं ध्याननिर्मथनाभ्यासाद्देवंपश्येन्निगूढवत् तिलेषुतैलंदधिनी
वसर्पिरापःस्रोतस्वरणीषुचाग्निः एवमात्मात्मनिगृह्यतेसौसत्येनैनंतपसायोनुपश्यतिधी
रः ऊर्णनाभिर्यथातंतून्सृजतेसंहरत्यपि जाग्रत्स्वप्नेतथाजीवोगच्छत्यागच्छतेपुनः पद्म
कोशप्रतीकाशंसुषिरंचाप्यधोमुखं हृदयंतद्विजानीयाद्विश्वस्यायतनंमहत् नेत्रस्थं
जाग्रतंविद्यात्कंठेस्वप्नंविनिर्दिशेत् सुषुप्तंहृदयस्थंतुतुरीयंमूर्ध्निसंस्थितं यदात्माप्रज्ञ
यात्मानंसंधत्तेपरमात्मनि तेनसंध्याध्यानमेवतस्मात्संध्याभिवंदनं निरोदकाध्यानसंध्यावा
क्कायक्लेशवर्जिता संधिनीसर्वभूतानांसासंध्याए कदंडिनां यतोवाचोनिवर्ततेअप्राप्यमन
सासह आनंदमेतज्जीवस्ययज्ज्ञात्वामुच्यतेबुधः सर्वव्यापिनमात्मानंक्षीरेसर्पिरिवार्पितं आ

स्वविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं तद्ब्रह्मोपनिषत्परमिति इति ब्रह्मोपनिषत्समाप्ता १
॥ ॐ अथातः सर्वोपनिषत्सारं संसारज्ञानमतीतमन्त्रसूत्रं यथा शारीरयज्ञं व्याख्यास्यामो अस्मिन्ने
व पुरुषशरीरे विनाप्यग्निहोत्रेण विनापि सांख्ययोगेन संसारविमुक्तिर्भवतीति
[illegible] षेनवि
धिना अन्नं भूमौ निदध्यात् ॐ भूर्भुवः सोमराज्ञी [illegible] तदा अन्न
त्वमन्नपते ॐ भूर्भुवः सोमराज्ञीर्वह्नीः शतविचक्षणाः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः याः फ
लिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः जीवला नघा
रिषां मा ते बध्नाम्योषधिं यातयाप्रुरुषपाहरादपरहोसि चातया अन्नपतेन्नस्य नो धेह्यनमी
वस्य शुष्मिणः प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॐ यदन्नमग्निर्बहुधा विराजे रुद्रैः
प्रजग्धं यदि वा पिशाचैः सर्वं तदीशानो अभयमानेव था सोषधिं पात आप्रुषहरादपरहोसि चा
तया अन्नपतेन्नस्य नो धेह्यनमीवस्य शुष्मिणः प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्प
दे ॐ यदन्नमग्निर्बहुधा विराजे रुद्रैः प्रजग्धं यदि वा पिशाचैः सर्वं तदीशानो अभयं कृणोतु शि
वमीशानाय स्वाहा अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः त्वं यज्ञस्त्वं ब्रह्मा त्वं रुद्रस्त्वं विस

उप.
१५

स्ववषट्कारः आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरों नमः आपः पुनंतु पृथिवीं पृथ्वी पूता पुनातु
मां पुनातु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनंतु
मामापोऽसतां च प्रतिग्रहं स्वाहा आपोऽमृतमस्यमृतोपस्तरणमस्यमृतं प्राणे जुहोम्यमाशिष्यांतेऽसि
प्राणाय स्वाहा उदानाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहा उदानाय स्वाहेति क-
निष्ठिकया प्राणे स्वाहेति च प्राणे जुहोम्यनामिकयापाने मध्यमया व्याने प्रदेशिन्या समा-
ने सर्वाभिरुदाने तूष्णीमेकामेकऋचं षोडश होतीह आहवनीयपक्वं दक्षिणाग्नावेकाग्ना-
हूयतस्य एवं सर्वप्रायश्चित्तीये २ अथापिधानमस्यमृतं येनापि दधामीत्युपस्पृश्य पुनरादाय
पुनरुपस्पृशेत् सव्ये पाणावेयाऽगृहीत्वा हृदयमभ्यालभ्य जपेत् प्राणाग्निः परमात्मा पंचवायु-
भिरावृतः अभयं सर्वभूतेभ्यो न भवेद्दहं कदाचनेति विश्वोसि वैश्वानरो विश्वरूपो विश्वं त्वया-
धार्यते जायमानं विश्वं त्वाहुतयः सर्वा यत्र ब्रह्मा विश्वामरणोऽसीति महानवोपसुहृदयो गुहा-
ग्रे प्रतिष्ठितः तमद्भिः परिषिंचामि सोऽस्यान्ते मृतायमृतयोनौ विश्वेषु वात्मा ध्यायेताग्निहोत्रं
जुहोमीति सर्वेषामेव सूनुर्भवत्यथ यज्ञपरिवृता आहुतीर्होमयति स्वशरीरे यज्ञं प्रवर्तयामीति च
ना रोगपरेऽसि किं नामधेयास्तत्र सूर्योऽग्निर्नाम सूर्यमंडलाकृतिः सहस्ररश्मिभिः परिवृतश्चकम्

षिर्भूत्वा मूर्द्धनि तिष्ठति यस्मादुत्को दृश्यते नाग्निर्नाम चतुराकृतिराहवनीयो भूत्वा मुखे तिष्ठति शा
रीरोग्निर्नाम जराप्राणादाहविर्विस्कंदत पद्व चंद्राकृतिर्दक्षिणाग्निर्भूत्वा हृदये तिष्ठति कोष्टाग्नि
रिति तत्र कोष्टाग्निर्नाम अशितपीतलीढखादितानि सम्यक्श्रपयित्वा गार्हपत्यो भूत्वा नाभ्यां तिष्ठ
ति प्रायश्चित्तीयस्त्वधस्तात्तिर्यस्ति स्त्रो हिमांशुः प्रभः प्रजननकर्म्मा ॥ २ ॥ अस्य शारीरयज्ञस्य यू
परसनाशोभितस्य को यजमानः का पत्नी के ऋत्विजः कोध्वर्युः को होता को ब्रह्मा को ब्राह्मणाच्छंसी कः
प्रतिप्रस्थाता कः प्रस्तोता को मैत्रावरुणः क उद्गाता के सदस्याः कानि यज्ञपात्राणि का निरंवी
विका वेदिः का उत्तरवेदिः को द्रोणकलशः को रथः कः पशुः के दर्भाः कः स्रुवः का आज्यस्थाली
कावाघारौ कावाज्यभागौ के प्रयाजाः के अनुयाजाः केडा कः सूक्तवाकः कः संयुवाकः का दाया
काऽहिंसा के पत्नीसंयाजाः कः यूपः का रशना का इष्टयः का दक्षिणा किमवभृथं इति ॥ २ ॥ अस्य शा
रीरयज्ञस्य यूपरशनाशोभितस्यात्मा यजमानो बुद्धिः पत्नी वेदा महऋत्विजः प्राणो ब्राह्मणाच्छं
दस्यपानः प्रतिप्रस्थाता व्यानः प्रस्तोता समानो मैत्रावरुणः उदान उद्गाता अहंकारोध्वर्युर्होता वि
तं शरीरं वेदिर्नासिकोत्तरवेदिर्मूर्द्धा द्रोणकलशः पादो रथः दक्षिणहस्तः स्रुवः सव्य आज्यस्थाली श्रोत्रे आ हस्त २
घारौ चक्षुषी आज्यभागौ ग्रीवा धारापोता तन्मात्राणि सदस्याः महाभूतानि प्रयाजाः भूतान्यनुयाजा

नुयाजा

जिह्वा देनो ह्येष क वा कल्लालः सो पूर्वोकः स्मृतिर्दया ह्यंति रहिंसा पत्नी संघाजा ओंकारोस्य पश्चा
शारसनाम मनोरथः कामः पशुः केशा दर्भा बुद्धींद्रियाणि यज्ञपात्राणि कर्मेंद्रियाणि हवींषि अ
हिंसा इष्टयस्त्यागो दक्षिणा अवभृथं मरणं सर्वा ह्यस्मिन् देवताः शरीरेधि समाहिताः वाराण
स्यां मृतो वापीदं वा ब्रह्म यः पठेत एकेन जन्मना जंतुर्मोक्षं च प्राप्नुयात् इति मोक्षं च प्राप्नुया
३५. दिति ५ इत्यथर्वणशिरोपनिषत्समाप्ता ११ ॥ ओमित्येतदक्षरमिदं सर्वं तस्यो
२० पव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एव सर्वं ह्ये
तद्ब्रह्मायमात्मा ब्रह्म सोयमात्मा चतुष्पाज्जागरितस्थानो बहिःप्रज्ञः सप्तांग एकोनविंशतिमु
खः स्थूलभुक् वैश्वानरः प्रथमः पादः स्वप्नस्थानोंतःप्रज्ञः सप्तांगः एकोनविंशतिमुखः प्र
विविक्तभुक्तैजसो हिरण्यगर्भो द्वितीयः पादः यत्र सुप्तो न कंचन कामं कामयते न कंचन स्व
प्नं पश्यति तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक् चेतोमु
खः प्राज्ञस्तृतीयः पादः एष सर्वेश्वर एष सर्वज्ञ एषोंतर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि
भूतानाममत्रैते सर्वे एकाभवंति १ बहिःप्रज्ञो विभुर्विश्वो ह्यंतःप्रज्ञस्तु तैजसः घनप्रज्ञस्तथा
प्राज्ञ एक एव त्रिधा स्थितः १ दक्षिणाक्षिमुखे विश्वो मनस्यंतस्तु तैजसः आकाशे च हृदि प्रा

न्तः त्रिधा देहे व्यवस्थितः २ विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् आनंदभुक् तथा प्राज्ञः
त्रिधा भोगं निबोधत ३ स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसं आनंदं च तथा प्राज्ञं त्रिधा तृप्तिं वि
जानत ४ त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः वेदैतदुभयं यस्तु स भुंजानो न लिप्यते ५
प्रभवः सर्वभूतानां सतामिति विनिश्चयः सर्वं जनयति प्राणश्चेतोंशून्पुरुषः पृथक् १ विभूतिं
प्रसवं त्वन्ये मन्यंते सृष्टिचिंतकाः स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता २ इच्छामात्रं प्रभोः
सृष्टिरिति सृष्टौ विनिश्चिताः कालात्प्रसूतिं भूतानां मन्यंते कालचिंतकाः ३ भोगार्थं सृष्टिरि
त्यन्ये क्रीडार्थमिति चापरे देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ४ नांतःप्रज्ञं न बहिःप्रज्ञं नोभ
यतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनं नेनाप्रज्ञानं चेन अदृष्टमव्यवहार्यमग्राह्यमलक्षणमलिंगम
चिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शिवमद्वैतं चतुर्थं मन्यंते स आत्मा स
विज्ञेयो वैतेस्मा का भवति १० प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापि भुक्त्वा भोगान्व्याप्य लोका
न्भिः स्थविष्ठान्पुनरपि धिषणोद्भासितान्कामजन्यान्पीत्वा सर्वान्विशेषान्स्वपिति मधुर
भुङ्मायया भोजयन्नो मायासंख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोस्मि ११ यो विश्वात्मा विधि
जविषयान्प्राश्य भोगान्स्थविष्ठान्पश्चाच्चान्यान्स्वमतिविभवान्ज्योतिषा स्वेन सूक्ष्मान् स

वीनेनाम्भुनरपिशीते: स्वात्मनिस्थापयित्वा हित्वा सर्वान्विशेषान्विगतगुणगण: पात्वसौ न
स्तुरीय: ११ कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ प्राज्ञ: कारणबद्धौ ताविष्येते विश्वतैजसौ
प्राज्ञ: कारणबद्धस्तु द्वैतं न तुर्येण सिद्ध्यति १३ नात्मानं न परांश्चैव न सत्यं नापि चानृतं प्राज्ञ: किं
३५-२१ चन संवेत्ति तुर्यं तत्सर्वदृक्सदा १४ निवृत्ते: सर्वदु:खानामीशान: प्रभुरव्यय: अद्वैत: सर्वभा
वानां देवस्तुर्यो विभु: स्मृत: १५ द्वैतस्याग्रहणं तुल्यमुभयो: प्राज्ञतुर्ययो: बीजनिद्रायुत: प्रा
ज्ञ: सा च तुर्ये न विद्यते १६ स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया न निद्रां नैव च स्वप्नं तुर्ये
पश्यन्ति निश्चिता: १७ अन्यथा गृह्णत: स्वप्नो निद्रा तत्त्वमजानत: विपर्यासे तयो: क्षीणे तुरीयं प
दमश्नुते १८ अनादिमायया सुप्तो यदा जीव: प्रबुध्यते अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा १८
प्रपञ्चो यदि विद्येत निवर्तेत न संशय: मायामात्रमिदं द्वैतमद्वैतं परमार्थत: २० विकल्पो वि
निवर्तेत कल्पितो यदि केनचित् उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते २१ सोयमात्माध्यक्षरमों
कारोधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति जागरितस्थानो वैश्वानरोऽकार: प्रथमा
मात्रा आप्तेरादिमत्त्वाद्वा आप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद स्वप्नस्थानस्तै
जस उकारो द्वितीया मात्रा उत्कर्षादुभयत्वाद्वा उत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्र

स्त्विनुलेभवतियएवंवेद सुषुप्तस्थानःप्राज्ञोमकारस्तृतीयामात्रामितेरपीतेर्वामिनोतिह विश्वात्मनो
वाइदंसर्वमपीतिश्चभवति यएवंवेद तत्रैतेश्लोकाभवंति मादिसामान्यमुत्कटं मात्रासंप्रतिप विवक्षायां२
त्तौस्यादाप्तिसामान्यमेवच १ तैजसस्योत्वविज्ञानेउत्कर्षोदृश्यतेस्फुटं मात्रासंप्रतिपत्तौस्यादुभ
यत्वंतथाविधं २ मकारभावेप्राज्ञस्यमानसामान्यमुत्कटं मात्रासंप्रतिपत्तौतुलयसामान्यमेवच २
त्रिषुधामसुयत्तुल्यंसामान्यंवेत्तिनिश्चितः सपूज्यःसर्वभूतानांवंद्यश्चैवमहामुनिः ४ अकारो यं
नयतेविश्वमुकारश्चापितैजसं मकारश्चपुनःप्राज्ञंनामात्रेविद्यतेगतिः ५ अमात्रश्चतुर्थोऽव्य
वहार्यःप्रपंचोपशमःशिवः अद्वैतएवमोंकारआत्मैवसंविशत्यात्मनात्मानंयएवंवेद त
त्रैतेश्लोकाभवंति ओंकारंपादशोविद्यात्पादामात्रानसंशयः ओंकारंपादशोज्ञात्वानकिंचिदपि
चिंतयेत २४ युंजीतप्रणवेचेतःप्रणवोब्रह्मनिर्भयं प्रणवेनित्ययुक्तस्यनभयंविद्यतेक्वचित २७
प्रणवोह्यपरंब्रह्मप्रणवश्चपरःस्मृतः अपूर्वोऽनंतरोवाह्योऽनपरःप्रणवोऽव्ययः २५ सर्वस्यप्र
णवोह्यादिर्मध्यमंतस्तथैवच एवंहिप्रणवंज्ञात्वाव्यश्नुतेतदनंतरं २७ प्रणवंहीश्वरंविद्यात्स
र्वस्यहृदयेस्थितं सर्वव्यापिनमोंकारंमत्वाधीरोनशोचति २८ अमात्रोनंतमात्रश्चद्वैतस्योपशा
मःशिवः ओंकारोविदितोयेनसमुनिर्नेतरोजनः २९ समुनिर्नेतरोजनः ओं ॥ इतिमांडूक्योप

निषत्समाप्ता १२॥ प्रथमंप्रकरणंसमाप्तं ॥ ॐ वैतथ्यंसर्वभावानांस्वप्नआहुर्मनीषिणः अं
तःस्थानात्तुभेदानांसंवृतत्वेनहेतुना १ अदीर्घत्वाच्चकालस्यगत्वादेशान्नपश्यति प्रतिबुद्धश्चवै
सर्वस्तस्मिन्देशेनविद्यते २ अभावश्चरथादीनांश्रूयतेन्यायपूर्वकं वैतथ्यंतेनवैप्राप्तंस्वप्नआ
हुःप्रकाशितं ३ अंतस्थानात्तुभेदानांतस्माज्जागरितेस्मृतं यथातत्रतथास्वप्नेसंवृतत्वेनभिद्य
३५-
२२
ते ४ स्वप्नजागरितेस्थानेह्येकमाहुर्मनीषिणः भेदानांहिसमत्वेनप्रसिद्धेनैवहेतुना ५ आदा
वंतेचयन्नास्तिवर्तमानेपितत्तथा वितथैःसदृशाःसंतोवितथाइवलक्षिताः ६ सप्रयोजनता
तेषांस्वप्नेविप्रतिपद्यते तस्मादाद्यंतवत्वेनमिथ्यैवखलुतेस्मृताः ७ अपूर्वंस्थानिधर्मोहि य
थास्वर्गनिवासिनां तानयंप्रेक्षतेगत्वायथैवेहसुशिक्षितः ८ स्वप्नवृत्तावप्यंतश्चेतसाकल्पि
तंत्वसत् बहिश्चेतसागृहीतंहिसत्स्मदसतोर्वैतथ्यमुक्तं ९ जाग्रद्वृत्तावप्यंतश्चेतसातंत्वसद कल्पितं
सत् बहिश्चेतसागृहीतंहिसत्स्मदसतोर्वैतथ्यंयुक्तं १० उभयोरपिवैतथ्यंभेदानांस्थानयोर्यदि क
एतान्बुध्यतेभेदान्कोवैतेषांविकल्पकः ११ कल्पयत्यात्मनात्मानमात्मादेवस्वमायया सए
वबुध्यतेभेदानितिवेदांतनिश्चयः १२ विकरोत्यपरान्भावानंतश्चित्तेव्यवस्थितान् नियतांश्चब
हिश्चित्तएवंकल्पयतेप्रभुः १३ चित्तकालाहियेंतस्तुद्वयकालाश्चयेबहिः कल्पिताएवतेस

वैविशेषोनान्यहेतुकः १४ अव्यक्ताएवयेंतस्थाःस्फुटाएवचयेबहिः कल्पिताएवतेसर्वेविशेषा-
स्त्विंद्रियांतरे १५ जीवंकल्पयतेपूर्वंततोभावान्पृथग्विधान् बाह्यानाध्यात्मिकांश्चैवयथा-
विद्यस्तथास्मृतिः १६ अनिश्चितायथारज्जुरंधकारेविकल्पिता सर्पधारादिभिर्भावैस्तद्वदात्मा
विकल्पितः १७ निश्चितायांयथारज्ज्वांविकल्पोविनिवर्तते रज्जुरेवेतिचाद्वैतंतद्वदात्मविनिश्चयः १८
प्राणादिभिरनंतैस्तुभावैरेतैर्विकल्पितः मायैषातस्यदेवस्ययायासंमोहितःस्वयं १९ प्राणाइ-
तिप्राणविदोभूतानीतिचतद्विदः गुणाइतिगुणविदस्तत्त्वानीतिचतद्विदः २० पादाइतिपाद-
विदोविषयाइतितद्विदः लोकाइतिलोकविदोदेवाइतिचतद्विदः २१ वेदाइतिवेदविदोयज्ञा
इतिचतद्विदः भोक्तेतिभोक्तृविदोभोज्यमितिचतद्विदः २२ सूक्ष्मइतिसूक्ष्मविदःस्थूलइति-
चतद्विदः मूर्तइतिमूर्तविदोऽमूर्तइतिचतद्विदः २३ कालइतिकालविदोदिशइतिचतद्विदः
वादाइतिवादविदोभुवनानीतितद्विदः २४ मनइतिमनोविदोबुद्धिरितिचतद्विदः चित्तमितिचि-
त्तविदोधर्माधर्मौचतद्विदः २५ पंचविंशकइत्येकेषड्विंशइतिचापरे एकत्रिंशकइत्याहुरनंतइ-
तिचापरे २६ लोकांल्लोकविदःप्राहुराश्रमाइतितद्विदः स्त्रीपुंनपुंसकंलैंगाःपरापरमथापरे २७
सृष्टिरितिसृष्टिविदोलयइतिचतद्विदः स्थितिरितिस्थितिविदःसर्वंचेहतुसर्वदा २८ यंभावं

दर्शयेद्यस्य तंभावंसतुपश्यति तंभावंविसभूत्वासौतद्ग्रहःसमुपैतितं २९ एतैरेषोपृथग्भा
वैःपृथगेवेतिलक्षितः एवंयोवेदतत्वेनकल्पयेत्सोविशंकितः ३० स्वप्नमायेयथादृष्टेगंध
र्वनगरंयथा तथासर्वमिदंदृष्टंवेदांतेषुविचक्षणैः ३१ तद्वत्तत्समिदंदृष्टंवर्षेवद्बुदसन्नि
भे नात्मावाप्यस्यचान्यद्वीनंनासौनत्समभावतः ३२ ननिरोधोनचोत्पत्तिर्नवद्धोनचसाधकः नमुमु
३५· क्षुर्नवैमुक्तइत्येषापरमार्थता ३३ भावैरसद्भिरेवायमद्वयेनचकल्पितः भावाअप्यद्वयेनैवा
२२ तस्मादद्वयताशिवः ३४ नात्मभावेननानेदंनस्वेनापिकथंचन नपृथङ्नापृथक्किंचिदिति
तत्वविदोविदुः ३५ वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः निर्विकल्पोह्ययंदृष्टःप्रपंचोप
शमोद्वयः ३६ तस्मादेवंविदित्वैनमद्वैतेयोजयेत्स्मृति अद्वैतंसमनुप्राप्यजडवल्लोकमाचरे
त् ३७ नस्तुतिर्ननमस्कारोनस्वधाकारएवच चलाचलनिकेतश्चयतिर्यादृच्छिकोभवेत् ३८
तत्वमाध्यात्मिकंदृष्ट्वातत्वंदृष्ट्वातुवाह्यतः तत्वीभूतस्तदारामस्तत्वादप्रच्युतोभवेत् ३९ तत्वाद
प्रच्युतोभवेत् ॥ इतिद्वितीयंवैतथ्याख्यंप्रकरणंसमाप्तं उपनिषदंच ।२। ॐउपासना
श्रितोधर्मोजातेब्रह्मणिवर्तते प्रागुत्पत्तेरजंसर्वंतेनासौकृपणःस्मृतः १ अतोवक्ष्याम्यकार्प
ण्यमजातिसमतांगतं यथा नजायतेकिंचिज्जायमानंसमंततः २ आत्माह्याकाशवज्जीवैर्घ

दाकाशैरिवोदितः घटादिवच्च संघातैर्जातावेतन्निदर्शनं ३ घटादिषु प्रलीनेषु घटाकाशादयो
यथा आकाशे संप्रलीयंते तद्वज्जीवा इहात्मनि ४ यथैकस्मिन् घटाकाशे रजो धूमादिभिर्युते
न सर्वे संप्रयुज्यंते तद्वज्जीवाः सुखादिभिः ५ रूपकार्यसमाख्याश्च भिद्यंते तत्र तत्र वै आकाश
स्य न भेदोस्ति तद्वज्जीवेषु निर्णयः ६ नाकाशस्य घटाकाशो विकारावयवौ यथा नैवात्मनः
सदा जीवो विकारावयवौ तथा ७ यथा भवति बालानां गगनं मलिनं मलैः तथा भवत्यबुद्धा
नामात्मापि मलिनो मलैः ८ मरणे संभवे चैव गत्यागमनयोरपि स्थितौ सर्वशरीरेषु चाकाशे
नाविलक्षणः ९ संघाताः स्वप्नवत्सर्वे आत्ममायाविसर्जिताः आधिक्ये सर्वसाम्ये वा नोपप
त्तिर्हि विद्यते १० रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके तेषामात्मा परो जीवः खं यथा सं
प्रकीर्तितः ११ द्वयोर्द्वयोर्मधुज्ञाने परं ब्रह्म प्रकाशितं पृथिव्यामुदरे चैव यथाकाशः प्रकाशि
तः १२ जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते नानात्वं निंद्यते यच्च तदेवं हि समंजसं १३ जीवा
त्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः प्रकीर्तितं भविष्यद्वृत्त्या गौणं तन्मुख्यत्वं हि न युज्यते १४ मृल्लोहवि
स्फुलिंगाद्यैः सृष्टिर्या चोदितान्यथा उपायः सोवताराय नास्ति भेदः कथंचन १५ आश्रमास्त्रिवि
धा हीनमध्यमोत्कृष्टदृष्टयः उपासनोपदिष्टेयं तदर्थमनुकंपया १६ स्वसिद्धांतव्यवस्थासु

द्वैतिनोनिश्चितादृढं परस्परंविरुध्यंतेतैरयंनविरुध्यते १७ अद्वैतंपरमार्थोहिद्वैतंतद्भेदउच्यते
तेषामुभयथाद्वैतंतेनायंनविरुध्यते १८ माययाभिद्यतेह्येतन्ना [illegible]
[illegible] न्यथाजंकथंचन तत्वतोभिद्यमानोहिमर्त्यताममृतंव्रजेत् १९
उप- अजातस्यैवभावस्यजातिमिच्छंतिवादिनः अजातोह्यमृतोभावोमर्त्यतांकथमेष्यति २०
२४ नभवत्यमृतंमर्त्यंनमर्त्यममृतंतथा प्रकृतेरन्यथाभावोनकथंचिद्भविष्यति २१ स्वभावेना
मृतोयस्यभावोगच्छतिमर्त्यतां कृतकेनामृतस्तस्यकथंस्थास्यतिनिश्चलः २२ भूततोभूत
तोवापिसृज्यमानेसमाश्रुतिः निश्चितंयुक्तियुक्तंचयत्तद्भवतिनेतरत् २३ नेहनानेतिचा
म्नायादिंद्रोमायाभिरित्यपि अजायमानोबहुधामाययाजायतेतुसः २४ संभूतेरपवादा
च्चसंभवःप्रतिषिध्यते कोन्वेनंजनयेदितिकारणंप्रतिषिध्यते २५ सएषनेतिनेतीतिव्या
श्री ख्यातंनिह्नुतेयतः सर्वमग्राह्यभावेनहेतुनाजंप्रकाशते २६ सतोहिमाययाजन्मयुज्य
तेनतुतत्वतः तत्वतोजायतेयस्यजातंतस्यहिजायते २७ असतोमाययाजन्मतत्वतोनैवयु
ज्यते वंध्यापुत्रोनतत्वेनमाययावापिजायते २८ यथास्वप्नेद्वयाभासंस्पंदतेमाययामनः
तथाजाग्रद्द्वयाभासंस्पंदतेमाययामनः अद्वयंचद्वयाभासंमनःस्वप्नेनसंशयः अद्वयंचद्वया

भासंतयाज्ञायन्नसंशयः ३० मनोदृश्यमिदंद्वैतंयत्किंचित्सचराचरं मनसोह्युन्मनीभावो
द्वैतंनैवोपलभ्यते ३१ आत्मसत्यानुबोधेनमनःसंकल्पयेद्यदा अमनस्तांतदायातिग्राह्याभा
वेतदग्रहं ३२ अकल्पकमजंज्ञानंज्ञेयाभिन्नंप्रचक्षते ब्रह्मज्ञेयमजंनित्यमजेनाजंविबुध्यते २२
निगृहीतस्यमनसोनिर्विकल्पस्यधीमतः प्रचारःसतुविज्ञेयःसुषुप्तेन्योनतत्समः ३४ ली
यतेहिसुषुप्तेतन्निगृहीतंनलीयते तदेवनिर्भयंब्रह्मज्ञानालोकंसमंततः ३५ अजमनिद्रमस्व
प्नमनामकमरूपकं सकृद्विभातंसर्वज्ञंनोपचारःकथंचन ३६ सर्वाभिलापविगतःसर्वचिंता
समुत्थितः सुप्रशांतःसकृज्ज्योतिःसमाधिरचलोभयः ३७ ग्रहोनतत्रनोत्सर्गश्चिंतायत्रनविद्य
ते आत्मसंस्थंतदाज्ञानमजातिसमतांगतं ३८ अस्पर्शयोगोनामैषदुर्दर्शःसर्वयोगिभिः
योगिनोबिभ्यतिह्यस्मादभयेभयदर्शिनः ३९ मनसोनिग्रहायत्तमभयंसर्वयोगिनां दुःखक्ष
यःप्रबोधश्चाप्यक्षयाशांतिरेवच ४० उत्सेकउदधेर्यद्वत्कुशाग्रेणैकबिंदुना मनसोनिग्रहस्तद्व
द्भवेदपरिखेदतः ४१ उपायेननिगृह्णीयाद्विक्षिप्तंकामभोगयोः सुप्रसन्नंलयेचैवयथाकामो
लयस्तथा ४२ दुःखंसर्वमनुस्मृत्यकामभोगान्निवर्तयेत् अजंसर्वमनुस्मृत्यजातंनैवतुपश्यति ४२
लयेसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः सकषायंविजानीयात्समप्राप्तंनचालयेत् ४५ नास्वाद

येत्सुखंतत्रनिःसंगःप्रज्ञयाभवेत् निश्चलंनिश्चितंचित्तमेकीकुर्यात्प्रयत्नतः ४५ यदानली
यतेचित्तंनचविक्षिप्यतेपुनः अनिंगनमनाभासंनिष्पन्नंब्रह्मतत्तदा ४६ स्वस्थंशांतंसनिर्वा
णमकथ्यंसुखमुत्तमं अजमजेनज्ञेयेनसर्वज्ञंपरिचक्षते ४७ नकश्चिज्जायतेजीवःसंभवोस्य
नविद्यते एतत्तदुत्तमंसत्यंयत्रकिंचिन्नजायते ४८ यत्रकिंचिन्नजायतइति इतिषष्ठपदेश
३५- येथेअद्वैताख्यंप्रकरणंसमाप्तम् ॥१॥ ॐ ज्ञानेनाकाशकल्पेनधर्मान्योगगनोपमान् ज्ञेया
२५ भिन्नेनसंबुद्धस्तंवंदेद्विपदांवरं १ अस्पर्शयोगोवैनामसर्वसत्वसुखोहितः अविवादोविरुद्ध
श्चदेशितस्तंनमाम्यहं २ भूतस्यजातिमिच्छंतिवादिनःकेचिदेवहि अभूतस्यापरेधीराविव
दंतःपरस्परं ३ भूतंनजायतेकिंचिदभूतंनैवजायते विवदंतोद्वयाह्येवमजातिंख्यापयंति
ते ४ ख्याप्यमानामजातिंतैरनुमोदामहेवयं विवदामोनतैःसार्द्धमविवादंनिबोधत ५ अजा
तस्यैवधर्मस्यजातिमिच्छंतिवादिनः अजातोह्यमृतोधर्मोमर्त्यतांकथमेष्यति ६ नभवत्य
मृतंमर्त्यंनमर्त्यममृतंतथा प्रकृतेरन्यथाभावोनकथंचिद्भविष्यति ७ स्वभावेनामृतोयस्य
धर्मोगच्छतिमर्त्यतां कृतकेनामृतस्तस्यकथंस्थास्यतिनिश्चलः ८ सांसिद्धिकीस्वाभाविकी
सहजाअकृताचया प्रकृतिःसेतिविज्ञेयास्वभावंनजहातिया ९ जरामरणनिर्मुक्ताःसर्वेध

मीस्वभावतः जरामरणमिच्छंतश्च्यवंते तेन तन्मनीषया १० कारणं यस्य वै कार्यं कारणं तस्य जा
यते जायमानं कथमजं भिन्नं नित्यं कथं च यत् ११ कारणाद्यद्यनन्यत्वमतः कार्यमजं यदि जाय
मानाद्धि वै कार्यात्कारणं ते कथं ध्रुवं १२ अजाद्वै जायते यस्य दृष्टांतस्तस्य नास्ति वै जाताच्च जायमा
नस्य न व्यवस्था प्रसज्यते १३ हेतोरादिः फलं येषामादिर्हेतुः फलस्य च हेतोः फलस्य चानादिः कथं
तैरुपवर्ण्यते १४ हेतोरादिः फलं येषामादिर्हेतुः फलं च यत् तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा
था १५ संभवे हेतुफलयोरेषितव्यः क्रमस्त्वया युगपत्संभवे यस्मादसंबंधो विषाणवत् १६ फ
लादुत्पद्यमानः सन्न ते हेतुः प्रसिध्यति अप्रसिद्धः कथं हेतुः फलमुत्पादयिष्यति १७ यदि हेतोः फ
फलसिद्धि लात्सिद्धिः फलसिद्धिश्च हेततः कतरत्पूर्वनिष्पन्नं यस्य सिद्धिरपेक्षया १८ अशक्तिरपरिज्ञानं क्रमकोपोथ
वा पुनः एवं हि सर्वथा बुद्धैरजातिः परिदीपिता १९ बीजांकुराख्यो दृष्टांतः सदा साध्यसमो हि सः न
च साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते २० पूर्वापरापरिज्ञानमजातेः परिदीपकं जायमानाद्धि वै
धर्मात्कथं पूर्वं न गृह्यते २१ स्वतो वा परतो वापि न किंचिद्वस्तु जायते सदसत्सदसद्वापि न किंचिद्व
स्तु जायते २२ हेतुर्न जायतेनादेः फलं चापि स्वभावतः आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते २३
प्रज्ञप्तेः सनिमित्तत्वमन्यथा द्वयनाशतः संक्लेशस्योपलब्धेश्च परतंत्रास्तिता मता २४ प्रज्ञप्तेः स

निमित्तत्वमिष्यतेयुक्तिदर्शनात् निमित्तस्यानिमित्तत्वमिष्यतेभूतदर्शनात् २५ चित्तेनसंस्पृशत्य
र्थंनार्थाभासंतथैवच अभूतोहियतश्चार्थोनार्थाभासस्ततःपृथक् २६ निमित्तंनसदाचित्तंसंस्पृ
शत्यध्वसुत्रिषु अनिमित्तोविपर्यासःकथंतस्यभविष्यति २७ तस्मान्नजायतेचित्तंचित्तदृश्यंनजा
३प्र- यते तस्यपश्यंतियेजातिंखेवैपश्यंतितेपदं २८ अजातंजायतेयस्मादजातिःप्रकृतिस्ततः प्रकृ
२९ तेरन्यथाभावोनकथंचिद्भविष्यति २९ अनादेरंतवत्त्वंचसंसारस्यनसेत्स्यति अनंततांचादिमतोमो
क्षस्यनभविष्यति ३० आदावंतेचयन्नास्तिवर्तमानेपितत्तथा वितथैःसदृशाःसंतोवितथाइवलक्षि
ताः ३१ सप्रयोजनतातेषांस्वप्नेविप्रतिपद्यते तस्मादाद्यंतवत्त्वेनमिथ्यैवखलुतेस्मृताः ३२ स
र्वेधर्मामृषास्वप्नेकायस्यांतर्निदर्शनात् संवृतेस्मिन्प्रदेशेवैभूतानांदर्शनंकुतः ३३ नयुक्तंदर्शनं
गत्वाकालस्यानियमाद्गतौ प्रतिबुद्धश्चवैसर्वस्तस्मिन्देशेनविद्यते ३४ मित्राद्यैःसहसंमंत्र्य
संबुद्धोनप्रपद्यते ३५ गृहीतंचापियत्किंचित्प्रतिबुद्धोनपश्यति ३५ स्वप्नेचावस्तुकःकायःपृथगन्य
स्यदर्शनात् यथाकायस्तथासर्वंचित्तदृश्यमवस्तुकं ३६ ग्रहणाज्जागरितवत्तद्धेतुःस्वप्नइष्यते
तद्धेतुत्वात्तुतस्यैवसज्जागरितमिष्यते ३७ उत्पादस्याप्रसिद्धत्वादजंसर्वमुदाहृतं नचभूतादभूत
स्यसंभवोस्तिकथंचन ३८ असज्जागरितेदृष्ट्वास्वप्नेपश्यतितन्मयः असत्स्वप्नेपिदृष्ट्वाचप्रतिबु

द्वोनप्रपश्यति ३९ नास्त्यसद्धेतुकमसत्सदसद्धेतुकंतथा सच्चसद्धेतुकंनास्तिसद्धेतुकमसत्कुतः ४०
विपर्य्यासाद्यथाजाग्रदचिंत्यान्भूतवत्स्पृशेत् तथास्वप्नेपिपर्य्यासात्स्वप्नेतत्रैवपश्यति ४१ उपल
म्भात्समाचारादस्तिवस्तुतथोच्यते जातिस्तुदर्शिताबुद्धैरजातेस्त्रसतांसदा ४२ अजातेस्त्रसतांते
षामुपलंभाद्वियंतिते जातिदोषानसेत्स्यंतिदोषोप्यल्पोभविष्यति ४३ उपलंभात्समाचारान्माया
हस्तीयथोच्यते उपलंभात्समाचारादस्तिवस्तुतथोच्यते ४४ जात्याभासंचलाभासंवस्त्वाभासंतथै
वच अजाचलमवस्तुत्वंविज्ञानंशांतमद्वयं ४५ एवंनजायतेचित्तमेवंधर्माअजाःस्मृताः एवमेव
विजानंतोनपतंतिविपर्य्यये ४६ ऋजुवक्रादिकाभासमलातस्पंदितंयथा ग्रहणग्राहकाभासं
विज्ञानस्पंदितंतथा ४७ अस्पंदमानविज्ञानमनाभासमजंतथा अस्पंदमानविज्ञानमनाभासम
लातथा ४८ अलातेस्पंदमानेवैनाभासाअन्यतोभुवः नततोन्यत्रनिस्पंदान्नालातंप्रविशंतिते ४९
ननिर्गताअलातात्तेद्रव्यत्वाभावयोगतः विज्ञानेपितथैवास्युराभासस्याविशेषतः ५० विज्ञानेस्पं
दमानेवैनाभासाअन्यतोभुवः नततोन्यत्रनिस्पंदन्नविज्ञानंविशंतिते ५१ ननिर्गतास्तेविज्ञानाद्द्र
व्यत्वाभावयोगतः कार्यकारणताभावाद्यतोचिंत्याःसदैवहि ५२ द्रव्यंद्रव्यस्यहेतुःस्यादन्यदन्यस्यचैवहि
द्रव्यत्वमन्यभावोवाधर्माणांनोपपद्यते ५३ एवंनचित्तजाधर्माश्चित्तंवापिनधर्मजं एवंहेतुःफ

लाजातिंप्रविशंतिमनीषिणः ५४ यावद्धेतुःफलावेशस्तावद्धेतुफलोद्भवः क्षीणेहेतुःफ
लावेशेनास्तिहेतुफलोद्भवः ५५ यावद्धेतुःफलावेशःसंसारस्तावदायतः क्षीणेहेतुःफला
वेशेसंसारंनोपपद्यते ५६ संवृत्याजायतेसर्वंशाश्वतंतेननास्तिवै सद्भावेनह्यजंसर्वमुच्छेदस्ते
उप. ननास्तिवै ५७ धर्मायइतिजायंतेजायंतेतेनतत्वतः जन्ममायोपमंतेषांसाचमायानविद्यते ५८
२० यथामायामयाद्बीजाज्जायतेतन्मयोंकुरः नासौनित्योनचोच्छेदीतद्वद्धर्मेषुयोजना ५९ नाजेषु
सर्वधर्मेषुशाश्वताशाश्वताभिधा यत्रवर्णानवर्तंतेविवेकस्तत्रनोच्यते ६० यथास्वप्नेद्वयाभा
संचित्तंचलतिमायया तथाजाग्रद्द्वयाभासंचित्तंचलतिमायया ६१ अद्वयंचद्वयाभासंमनः
स्वप्नेनसंशयः अद्वयंचद्वयाभासंतथाजाग्रन्नसंशयः ६२ स्वप्नदृक्प्रचलस्वप्नेदिक्षुवैदश
सुस्थितान् अंडजान्स्वेदजान्वापिजीवान्पश्यतितान्सदा ६३ स्वप्नदृक्चित्तदृश्यास्तेनविद्यंतेत
तःपृथक् तथाचदृश्यमेवेदंस्वप्नदृक्चित्तमिष्यते ६४ चरंजागरितेजाग्रद्दिक्षुवैदशसुस्थि
तान् अंडजान्स्वेदजान्वापिजीवान्पश्यतितान्सदा ६५ यावच्चित्तेक्षणीयास्तेनविद्यंतेततःपृथ
क् तथातद्दृश्यमिदंनेदंजाग्रतश्चित्तमिष्यते ६६ उभेह्यन्योन्यदृश्येतेकिंतदस्तीतिचोच्यते ल
क्षणाशून्यमुभयंतन्मतेनैवगृह्यते ६७ यथास्वप्नमयोजीवोजायतेम्रियतेपिवा तथाजीवाअ

मीसर्वेभवंतिनभवंतिच ६८ यथानिमित्तकोजीवोजायतेम्रियतेपिच तथाजीवाअमीसर्वेभवं तिनभंव
तिच ६९ नकश्चिज्जायतेजीवःसंभवोस्यनविद्यते एतत्तदुत्तमंसत्यंयत्रकिंचिन्नजायते ७० चित्ते
स्पंदितमेवसर्वग्राह्यग्राहकवद्द्वयं चित्तंनिर्विषयंनित्यमसंगंतेनकीर्तितं ७१ योस्तिकल्पितसंवृ
त्यापरमार्थेननास्त्यसौ परतंत्राभिसंवृत्यास्यान्नास्तिपरमार्थतः ७२ अजःकल्पितसंवृत्यापरमार्थे
ननाप्यजः परतंत्राभिनिष्पत्त्यासंवृत्याजायतेतुसः ७३ अभूताभिनिवेशोस्तिद्वयंतत्रनविद्यते द्व
याभावंसबुद्ध्वैवनिर्निमित्तोनजायते ७४ यदानलभतेहेतूनुत्तमाधममध्यमान् तदानजायतेचि
त्तंहेत्वभावफलेकुतः ७५ अनिमित्तस्यचित्तस्यानुत्पत्तिःसमाद्वया अजातस्यैवसर्वस्यचित्तदृश्यं
हितद्यतः ७६ बुद्ध्वानिमित्ततांसत्यांहेतुंपृथगनाप्नुवन् वीतशोकंतथाकाममभयंपदमश्नुते ७७
अभूताभिनिवेशाद्धिसदृशेतत्प्रवर्तते वस्त्वभावंसबुद्ध्वैवनिःसंगंविनिवर्तते ७८ निवृत्तस्याप्रवृ
त्तस्यनिश्चलाहितदास्थितिः विषयःसहिबुद्धानांतत्साम्यमजमद्वयं ७९ अजमनिद्रमस्वप्नंप्रभात
भवतिस्वयं सकृद्विभातोह्येवैषधर्मोधातुस्वभावतः ८० सुखमाव्रियतेनित्यंदुःखंविव्रियतेस
दा यस्यकस्यचधर्मस्यग्रहेणभगवानसौ ८१ अस्तिनास्त्यस्तिनास्तीतिनास्तिनास्तीतिवापुनः
चलस्थिरोभयाभावैरावृणोत्येवबालिशः ८२ कोट्यश्चतस्रएतास्तुग्रहैर्यासांसदावृतः भगवा

भिरस्पृष्टो येन दृष्टः स सर्वदृक् ८३ प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पदमद्वयं अनापन्नादिमध्यान्तं कि
मतः परमीहते ८४ विप्राणां विनयो ह्येष शमः प्राकृत उच्यते दमः प्रकृतिदान्तत्वादेवं विद्वान्शमं
व्रजेत ८५ सवस्तु सोपलंभं च द्वयं लौकिकमिष्यते अवस्तु सोपलंभं च शुद्धं लौकिकमिष्यते ८६
अवस्त्वनुपलंभं च लोकोत्तरमिति स्मृतं ज्ञानं ज्ञेयं च विज्ञेयं सदा बुद्धैः प्रकीर्तितं ८७ ज्ञाने च त्रिवि
३५ धे ज्ञेये क्रमेण विदिते स्वयं सर्वज्ञता हि सर्वत्र भवतीह महाधियः ८८ हेयज्ञेयाप्यपाक्यानि वि ह्रो
२८ ग ज्ञेयान्यग्रयाणतः तेषामन्यत्र विज्ञेयादुपलंभस्त्रिषु स्मृतः ८९ प्रकृत्याकाशवज्ज्ञेयाः सर्वे धर्मा अ
नादयः विद्यते न हि नानात्वं तेषां क्वचन किंचन ९० आदिबुद्धाः प्रकृत्यैव सर्वे धर्माः सुनिश्चिताः
यस्यैवं भवति क्षान्तिः सोऽमृतत्वाय कल्पते ९१ आदिशान्ता ह्यनुत्पन्नाः प्रकृत्यैव सुनिर्वृताः सर्वे धर्माः
समाभिन्ना अजं साम्यं विशारदं ९२ वैशारद्यं तु वै नास्ति भेदे विचरतां सदा भेदनिम्नाः पृथग्वादास्त
स्मात्ते कृपणाः स्मृताः ९३ अजे साम्ये तु ये केचिद्भविष्यन्ति विपश्चितः ते हि लोके महाज्ञानास्त
च्च लोको न गाहते ९४ अजेष्वजमसंक्रान्तं धर्मेषु ज्ञानमिष्यते यतो न क्रमते ज्ञानमसंगं तेन कीर्तितं ९५
अणुमात्रेऽपि वैधर्म्ये जायमानेऽविपश्चितः असंगता सदा नास्ति किमुतावरणच्युतिः ९६ अलब्धाव
रणाः सर्वे धर्माः प्रकृतिनिर्मलाः आदौ बुद्धास्तथा मुक्ता बुध्यन्त इति नायकाः ९७ क्रमते न हि बु

यस्यज्ञानंयमेषुनोमतः सर्वधर्मास्तथात्मानमेतद्बुद्धेनभाषितं १८ दुर्दर्शमतिगंभीरमजंध्रुवमवि
शारदं बुद्ध्वापदमनानात्वंमनःकूर्मीययथावलं १९ मनःकूर्मीययथावलमिति १९ अमलानशा
नाख्यचतुर्थप्रकरणंसमाप्तमुपनिषद् ४ ॥ ५॥ अथपशुपंचावरोहंतंदिवितःपृथिवीमधः अप
श्यपश्यन्तेरुद्रंनीलग्रीवंशिवंविडिते १ दिवउग्रोवारुहणाव्यपत्यद्भामूम्यामधिजग्मासः पश्यतेमहं
नीलग्रीवंसलोहितं २ एषएत्यवीरहारुद्रोजलासभेषजः विन्तेहेममनीनशद्वाविकारोप्यतुते ३
नमस्तेभवभावायनमस्तेभवमन्यवे नमस्तेअस्तुवाहुभ्यामुततेनाइषवेनमः ४ यामिषुंगिरिशंत
हस्तेविभर्ष्यस्तवेशिवांगिरित्रतांकुरुमाहिंसीत्पुरुषान्मम ५ शिवेनवचसात्वागिरिशाच्छादया
मसि यथानःसर्वमिमंजगदयक्ष्मंसुमनाअसत् ६ यातेइषुःशिवतमाशिवंवभूवतेधनुः शिवाश
रव्यायातवतयानोमृडजीवसे ७ यातेरुद्रशिवातनूरघोरापापकाशनी तयानस्तन्वाशंतमया
गिरिशंताभिचाकशीत ८ असौयस्ताम्रोअरुणउतवभ्रुर्विलोहितः येचेमंअभितोरुद्रादिक्षुश्रिताः
सहस्रशोवैषांहेडईमहे ९ अहंसप्तावरोहंतंनीलग्रीवंविलोहितं उतत्वागोपाअदृशन्नदृशन्नुतो
दहार्यः १० उतोत्वाविश्वाभूतानितस्मैदृष्टायतेनमः नमोस्तुनीलशिखंडायसहस्राक्षायवाजिने ११
अथोयेअस्यसत्वानस्तेभ्योहमकरंनमः नमांसितआयुधानायततायधृष्णवे १२ उभाभ्यामुत

तेमकरंनमोबाहुभ्यांतवधन्वने १२ प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्यां याश्चतेहस्तइषवःपरा
ताभगवोवप १३ अवतत्यधनुस्त्वंसहस्राक्षशतेषुधे निशीर्य्यशल्यानांमुखाशिवोनःसुमनाभ
व १४ विज्यंधनुःकपर्दिनोविशल्योवाणवां३उत अनेशन्नस्येषवःआभुरस्यनिषंगधिः १५ प
रितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः अथोयइषुधिस्तवारेअस्मन्निधेहितं १६ यातेहेतिर्मी
उप. २५ ढुष्टमहस्तेवभूवतेधनुः तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज १७ नमोस्तुसर्पेभ्योयेके
चपृथिवीमनु येअंतरिक्षेयेदिवितेभ्यःसर्प्पेभ्योनमः १८ येवामीरोचनेदिवियेवासूर्यस्यर
श्मिषुयेषामप्सुसदस्कृतंतेभ्यःसर्प्पेभ्योनमः १९ याइषवोयातुधानानांयेवावनस्पतीनांये
वावटेषुशेरतेतेभ्यःसर्प्पेभ्योनमः २० यःस्वजनान्नीलग्रीवोयःस्वजनान्हरेतकल्माषपु
मोषधयोजनभयाश्चरूपती २१ वभ्रुश्चवभ्रुकर्णाश्चनीलगलमालःशिवःपश्यसर्वेणनील
शिखंडेनभवेनमरुतांपिता २२ विरूपाक्षेणवभ्रुणावाचंवदिष्यतोहतः सर्वनीलशिखंडेन
वीरकर्मणिकर्मणि २३ इमामस्यप्राशंजहियेनेदंविभजामहेनमोभवायनमःशर्वायनमः
कुमारायशत्रवे २४ नमोनीलशिखंडायनमःसभाप्रपादिने यस्यहर्याश्वाःरथोगर्दभाव
भितःसवौ २५ अकारतस्मैनीलशिखंडायनमःसभाप्रपादिने २६ नमःसभाप्रपादिनश्चत

ब्राह्मीन्तु द्वादशी मता ११ प्रथमायां तु मात्रायां यदि प्राणैर्वियुज्यते भरतवर्ष
राजासौ सार्वभौमः प्रजायते १२ द्वितीयायां समुत्क्रान्तो भवेद्यक्षो महात्मवान् विद्याधरस्तृतीया
यां गन्धर्वस्तु चतुर्थिकी १३ पंचम्यामथ मात्रायां यदि प्राणैर्वियुज्यते उषितः सह देवत्वं सो

इति नीलरुद्रोपनिषत्समाप्ता १९ ॥ ॐ अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः मका
रस्तस्य पुच्छं वा अर्द्धमात्राशिरस्तथा १ पादौ रजस्तमस्तस्य शरीरं सत्वमुच्यते धर्मश्च दक्षिणं
चक्षुरधर्मश्चोत्तरं स्मृतं २ भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनोः स्वर्लोकः कटिदे
शे तु नाभिदेशे महर्जगत् ३ जनलोकस्तु हृदये कंठदेशे तपस्ततः भ्रुवोर्ललाटमध्ये तु स
त्यलोको व्यवस्थितः ४ सहस्रार्णमिति चात्र मंत्र एष प्रदर्शितः एवमेतं समारूढो हंस
योगविचक्षणः ५ न बध्यते कर्मचारी पापकोटिशतैरपि आग्नेयी प्रथमा मात्रा वायव्येषा
तथापरा ६ भानुमंडलसंकाशा भवेन्मात्रा तथोत्तरा परमा चार्द्धमात्रा या वारुणीं तां
विदुर्बुधाः ७ कलात्रयान्विता वापि ता सा मात्रा विधुन्माला तथोत्तरा पतंगिनी तृतीया स्या
च्चतुर्थी वायुवेगिनी ८ पंचमी नामधेया च षष्ठी चैन्द्री विधीयते सप्तमी वैष्णवी नाम शांकरी
च तथाष्टमी ९ नवमी महती नाम धृवेति दशमी मता एकादशी भवेन्मौनी सर्वं संगवि
वर्जितः १० ततो विलीयते नाशो सोऽविमलः केवलः प्रभुः तेनैव ब्रह्मभावेन परमीनं दमस्त्र
ते ११ इति नादबिन्दूपनिषत्समाप्ता २० ॥ ॐ मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च अ
शुद्धं कामसंकल्पं शुद्धं कामविवर्जितं १ मन एव मनुष्याणां कारणं बन्धमोक्षयोः बन्धाय वि

लोके मही
यते १४
षष्ठ्यामिं
द्रसायुज्यं
सप्तम्यां
वैष्णवं प
दमष्टम्यां
व्रजते रुद्रं
पशूनां च
पतिं तथा
१५ नवम्यां
महर्लोकं
दशम्यां तु
जनं व्रजेत् एकादश्यां तपोलोकं द्वादश्यां ब्रह्म शाश्वतं १६ ततः परतरं शुद्धं व्याप

ओंकारश्चाध्यात्मनो धारणाभिर्निबोधत ८ घोषिणी प्रथमा मात्रा ९
...प्रतिष्ठिता पञ्च ओंकार...

कं निर्मलं शिवं सदोदितं परं ब्रह्म ज्योतिषा
मुदयो यतः १७ अतीन्द्रियं गुणातीतं मनोलीनं
यदा भवेत् अनूपमं शिवं शान्तं योगयुक्तं
सदा विशेत् १८ तद्युक्तस्तन्मयो जन्तुः शनैर्मुञ्चेत्कलेवरं

यथासक्तं मुक्तं निर्विषयं स्मृतं अतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते तस्मान्निर्विषयं नित्यं मनः का-
र्यं मुमुक्षुणा निरस्तविषयासंगं संनिरुद्धं मनो हृदि यदा यात्युन्मनीभावं तदा तत्परमं पदं तावदेव नि-
रोद्धव्यं यावद्धृदि गतं क्षयं एतज्ज्ञानं च ध्यानं च अतोन्यो ग्रंथविस्तरः नैव चिंत्यं न चाचिंत्यम चिंत्यं चिं-
३५· त्यमेव च पक्षपातविनिर्मुक्तं ब्रह्म संपद्यते तदा स्वरेण संधयेद्योगमस्वरं भावयेत्परं अस्वरेणैव भावेन निकलेव
३· भावेनाभाव इष्यते तदेव निष्कलं ब्रह्म निर्विकल्पं निरंजनं तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवं र सास्थि
निर्विकल्पमनंतं च हेतुदृष्टान्तवर्जितं अप्रमेयमनाद्यं यज्ज्ञात्वा च परमं शिवं न निरोधो न चोत्पत्तिर्न ब- तोयोगवा
न्धो न च शासनं न मुमुक्षा न मुक्तिश्च इत्येषा परमार्थता एक एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु रेण ४
स्थानत्रयाद्यतीतस्य पुनर्जन्म न विद्यते एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चै-
व दृश्यते जलचंद्रवत् घटसंभूतमाकाशं लीयमाने घटे यथा घटो लीयेत नाकाशं तद्वज्जीवो घटो-
पमः घटवद्विविधाकारं भिद्यमानं पुनः पुनः तद्भग्नं न च जानाति स जानाति च नित्यशः शब्दमाया-
वृतो यावत्तावत्तिष्ठति पुष्करे भिन्ने तमसि चैकत्वमेकमेवानुपश्यति शब्दाक्षरं परं ब्रह्म यस्मिन्क्षीणे
यदक्षरं तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छान्तिमात्मनः द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् शब्द-
ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ग्रंथमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः पलालमिव धा-

स्यार्थी त्यजेद्ग्रंथमशेषतः गवामनेकवर्णानां क्षीरस्याप्येकवर्णता क्षीरवत्पश्यते ज्ञानं लिंगिनस्तु गवां
यथा घृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानं सततं मंथयितव्यं मनसा मंथानभूतेन ज्ञानने
त्रं समादाय चोद्धरेद्वह्निमतः परं निष्कलं निर्मलं शांतं तद्ब्रह्माहमिति स्मृतं सर्वभूताधिवासं च यद्भूते
षु वसत्यपि सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः इति ब्रह्मबिंदूपनिषत्समाप्ता १८ ॐ योगात्मा
ण्यधीत्य मेधावी अभ्यस्य च तत्पुनः परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ओंकाररथमारु
ह्य विष्णुं कृत्वाथ सारथिं ब्रह्मलोकपद[illegible]यावद्रथपथिस्थि
[illegible]स्थानं रथमुत्सृज्य गच्छति मात्रालिंगपदं त्यक्त्वा शब्दव्यंजनवर्जितं अस्वरेण म
कारेण पदं सूक्ष्मं च गच्छति शब्दादिविषयान्पंच मनश्चैवातिचंचलं चिंतयेदात्मनो रश्मीन्प्रत्याहारः स
उच्यते प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा तर्कश्चैव समाधिश्च षडंगो योग उच्यते यथा पर्वत
धातूनां दह्यंते धमनान्मलाः तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहात् प्राणायामैर्दहेद्दोषान्धार
णाभिश्च किल्बिषं किल्बिषं हि क्षयं नीत्वा रुचिरं चैव चिंतयेत् रुचिरं रेचकं चैव वायोराकर्षणं तथा
प्राणायामास्त्रयः प्रोक्ता रेचकपूरककुंभकाः सव्याहृतिः सप्रणवां गायत्रीं शिरसा सह त्रिः पठे
दायतः प्राणः प्राणायामः स उच्यते उत्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकं शून्यभावेन युंजीया

न्वेषी रुद्रा
राधनतत्प
रः तावद्र
थेन गंत
व्यं यावद्र
थपथि स्थि
तः स्थित्वा
रथपथस्थ

रेचकस्येति लक्षणं नोच्छ्वसेन्नावश्वसेन्नैव गात्राणि चालयेत् एवं वायुर्ग्रहीतस्तु पूरकस्येति लक्षा-
ल णं वक्त्रेणोत्पलनालेन वायुं कृत्वा निराश्रयं एवं वायुर्ग्रहीतव्यः कुंभकस्येति लक्षणं अंधवत्पश्यरू-
पाणि शृणुशब्दमकर्णवत् काष्ठवत्पश्यते देहं प्रशांतस्येति लक्षणं मनः संकल्पकं ज्ञात्वा संक्षि-
प्यात्मनि बुद्धिमान् धारयित्वा तथात्मानं धारणा परिकीर्तिता आगमस्याविरोधेन ऊहनं तर्क
३प· उच्यते एवं लब्ध्वाप्येवमन्यत्समसमाधिः प्रकीर्तितः २६ भूमिभागे समे रम्ये सर्वदोषविवर्जिते कृ- २
३१ त्वा मनोमयीं रक्षां जप्त्वा चैवाथ मंडले २७ पद्मकं स्वस्तिकं वापि भद्रासनमथापि वा बद्धा योगास-
नं सम्यगुत्तराभिमुखः स्थितः २८ नासिकापुटमंगुल्यापिधायैकेन मारुतं आकृष्य धारयेदग्निं श-
व ब्दमेवाभिचिंतयेत् २९ ओमित्येकाक्षरं ब्रह्म ओमित्येकेन रेचयेत् दिव्यमंत्रेण बहुशः कुर्यादात्मम-
लच्युतिं ३० पश्चाद्ध्यायेत एवं लं क्रमतो मंत्रनिर्दिशेत् स्थूलातिस्थूलमात्रायां नाभिमूर्द्धमतिक्र-
मः ३१ तिर्यगूर्द्ध्वमधो दृष्टिं विहाय च महामतिः स्थिरस्थायी विनिःकंपः सदा योगं समभ्यसेत् ३२
तालमात्रा तथा योगो धारणा योजनं तथा द्वादशमात्रा योगस्तु कालतो नियतः स्मृतः ३३ अघोष-
मव्यंजनमस्वरं चाकंठतालोष्ठमनासिकं च अरेफजातमुभयोष्ठवर्जितं यदक्षरं न क्षरते कदाचि-
त् ३४ येनासौ पश्यते मार्गं प्राणस्तेन हि गच्छति अतः समभ्यसेन्नित्यं सन्मार्गगमनार्थिने ३५

हृद्वारं वायुद्वारं वा चोर्ध्वद्वारमतः परं मोक्षद्वारबिलं चैव सुषिरं मंडलं विदुः २६ भयं क्रोधमथालस्यमति
स्वप्नातिजागरे अत्याहारमनाहारं नित्यं योगी विवर्जयेत् २७ अनेन विधिना सम्यक् नित्यमभ्यस्यतः
क्रमात् स्वयमुत्पद्यते ज्ञानं त्रिभिर्मासैर्न संशयः २८ चतुर्भिः पश्यते देवान् पंचभिस्तुल्यविक्रमः इ
च्छयाप्नोति कैवल्यं षष्ठे मासि न संशयः २९ पार्थिवः पंचमात्राणि चतुर्मात्राणि वारुणः आग्नेयः
स्तु त्रिमात्राणि द्विमात्रो मारुतस्तथा ३० एकमात्रस्तथाकाशो ह्यर्धमात्रां च चिंतयेत् सिद्धिं कृत्वा तु म
नसा चिंतयेदात्मनात्मनि ३१ त्रिंशत्पर्वांगुलः प्राणो यत्र प्राणः प्रतिष्ठितः एष प्राण इति ख्यातो बा
ह्यः प्राणः सगोचरः ३२ अशीतिश्च शतं चैव सहस्राणि त्रयोदश लक्षश्चैको विनिश्वासो अहोरा
त्रप्रमाणतः ३३ प्राणस्त्वाद्यो हृदि स्थाने अपानस्तु पुनर्गुदे समानो नाभिदेशे तु उदानः कंठमाश्रितः ३४
व्यानः सर्वगतो देहे सदा व्याप्य तु तिष्ठति अथ वर्णास्तु पंचानां प्राणादीनामनुक्रमात् ३५ रक्तवर्ण
मणिप्रख्यः प्राणो वायुः प्रकीर्तितः अपानस्तस्य मध्ये तु इंद्रगोपकसन्निभः ३६ समानस्तस्य मध्ये तु
गोक्षीरस्फटिकप्रभः अपांडुर उदानस्तु व्यानो ह्यर्चिसमप्रभः ३७ यस्यैष मंडलं भित्त्वा मारुतो याति मू
र्द्धनि यत्र यत्र म्रियेद्वापि न स भूयोभिजायते न स भूयोभिजायते ३८ [illegible]न विद्यते निषत्समा
मा ॥ १४ ॥ अथ योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया यं [illegible] पठित्वा च सर्वपापैः प्रमुच्य

ते १ विस्णोर्नाममहायोगीमहामायोमहातपः तत्वमार्गेयथादीपोदृश्यतेपुरुषोत्तमः २ यदिशैलसमंपा
पंविस्तीर्णंयोजनान्बहून् भिद्यतेध्यानयोगेननान्योभेदःकदाचन ३ बीजाक्षरंपरंविंदुंनादंविंदोपरि

स्थिते सशब्दंचाक्षरंक्षीणेनिःशब्दंपरमंपदं ४ अनाहतंचयच्छब्दंतस्यशब्दस्ययत्परं तत्परंविंदतेयस्तुस
योगीछिन्नसंशयः ५ वालाग्रशतसाहस्रंतस्यभागस्यभागशः तस्यभागस्यभागार्द्धंतत्क्षयेचनिरंज
ने ६ पुष्पमध्येयथागंधंपयोमध्येयथाघृतं तिलमध्येयथातैलंपाषाणेष्विवकांचनं ७ एवंसर्वा
णिभूतानिमणिसूत्रमिवात्मनि स्थिरबुद्धिरसंमूढोब्रह्मविद्ब्रह्मणिस्थितः ८ तिलानांतुयथातै
लंपुष्पेगंधमिवाश्रितं पुरुषस्यशरीरेतुसबाह्याभ्यंतरेस्थितं ९ हृतंतुसकलेविद्याद्ध्यानंसेव
निःकला सकलेनिःकलेभावेसर्वत्रात्माव्यवस्थितः १० अतसीपुष्पसंकाशंनाभिस्थानेप्रतिष्ठि
ते चतुर्भुजंमहावीरंपूरकेणविचिंतयेत् ११ कुंभकेनहृदिस्थानेचिंतयेत्कमलासनं ब्रह्माणंरक्त
गौरांगंचतुर्वक्त्रंपितामहं १२ रेचकेनेश्वरंविद्यान्ललाटस्थंत्रिलोचनं शुद्धस्फटिकसंकाशंनिष्क
लंपापनाशनं १३ अब्जपत्रमधःपुष्पमूर्ध्वनालमधोमुखं कदलीपुष्पसंकाशंसर्वदेवमयंमम १४
शतारंशतपत्राढ्यंविकीर्णाग्रकर्णिकं तत्रार्कचंद्रवह्नीनामुपर्युपरिचिंतयेत् १५ पद्मस्योद्घा
पतेकृत्वाबोधंचंद्राग्निसूर्ययोः तस्यायबीजमाहृत्यआत्मासंचरतेध्रुवं १६ त्रिस्थानंचत्रिमार्गंच

त्रिब्रह्म च त्रिरक्षरं त्रिमात्रं चार्द्धमात्रं च यस्तं वेद स वेदवित् १७ तैलधारामिवाच्छिन्नं दीर्घघंटानि
नादवत् अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् १८ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्य
ते अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् १९ स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिं ध्याननि
र्मथनाभ्यासाद्देवं पश्येन्निगूढवत् २० यथैवोत्पलनालेन तोयमाकर्षयेन्नरः तथैवोत्कृष्य
वायुं योगी योगपदे स्थितः २१ अर्द्धमात्रात्मकं कृत्वा कोशभूतं तु पंकजं कर्षयेन्नालमार्गेण भ्रुवो
र्मध्ये तु येल्लयं २२ भ्रुवोर्मध्ये ललाटे तु नासिकायास्तु मूलतः अमृतस्थानं विजानीयाद्विष्णो
रायतनं महत् विष्णोरायतनं महदिति २३ इति ध्यानबिंदूपनिषत्समाप्तः २० ॐ तेजोबिंदुः
परं ध्यानं विश्वातीतं हृदि स्थितं आणवं शांभवं शाक्तं स्थूलं सूक्ष्मं परं च यत् १ दुःसाध्यं च दुरारा
ध्यं दुःप्रेक्ष्यं च दुराश्रयं दुर्लक्ष्यं दुस्तरं ध्यानं मुनीनां च मनीषिणां २ जिताहारो जितक्रोधो जित
संगो जितेंद्रियः निर्द्वंद्वो निरहंकारो निराशीरपरिग्रहः ३ अगम्यागम्यकर्ता च गुरुमानार्थमान
सः सुवाति त्रीणि विंदति त्रियामा हंस उच्यते ४ परं गुह्यमिदं स्थानमव्यक्तं ब्रह्म निराश्रयं व्यो
मरूपकलासूक्ष्मं विष्णोस्तत्परमं पदं ५ त्र्यंबकं त्रिगुणं स्थानं त्रिधातुं रूपवर्जितं निश्चलं नि
र्विकल्पं च निराकारं निराश्रयं ६ उपाधिरहितं स्थानं वाङ्मनोतीतगोचरं स्वभावं भावनाग्राह्यं

३५-
३३

संध्यानेकपदेर्जितं १ आनंदं नंदनातीतं दुःप्रेक्ष्यमजमव्ययं चित्तवृत्तिविनिर्मुक्तं शाश्वतं ध्रुवमच्यु
तं २ तद्ब्रह्मान्तगतं नदध्यात्मनं विज्ञानतत्परायणं अचिंत्यचित्तमात्मानं तद्व्योमपरमं स्थितं ९ अशून्यं शू
न्यभावं च शून्यातीतमवस्थितं न ध्यानं न च वा ध्याता न ध्येयो ध्येय एव च १० सर्वं च परमं शून्यं न प
रं परमात्परं अचिंत्यमप्रबुद्धं च न च सत्यं न संविदुः ११ मुनीनां नात्र युक्तं तन्न देवा न परं विदुः लोभ
मोहं भयं दर्पं कामं क्रोधं च किल्बिषं १२ शीतोष्णं क्षुत्पिपासं च संकल्पं च विकल्पकं न ब्रह्मकुल
दर्पं च न मुक्तं ग्रंथसंचयं १३ न भयं सुखं दुःखं तथा मानापमानयोः एतद्भावविनिर्मुक्तं तद्ग्राह्य
ब्रह्म तत्परं तद्ब्रह्म ब्रह्मतत्परमिति १४ इति तेजोबिंदूपनिषत्समाप्ता २१ ॥ ओं योगशिखां
प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमं यदानुध्यायते मंत्रं गात्रकंपोभिजायते १ आसनं पद्मकं बध्वा य
च्चान्यदपि रोचते नासाग्रदृष्टिश्च करौ पादौ च संयतौ २ मनः सर्वत्र संगृह्य ओंकारं तत्र
चिंतयेत् ध्यायेत सततं प्राज्ञो हृत्कृत्वा परमेश्वरं ३ एकस्तंभे नवद्वारे त्रिस्थूणे पंचदैवते ई
दृशे तु शरीरे वा मतिमानुपलक्षयेत् ४ आदित्यमंडलं दिव्यं रश्मिज्वालासमाकुलं तस्य मध्य
गतो वह्निः प्रज्वलेद्दीपवर्तिवत् ५ दीपशिखा तु या मात्रा सा मात्रा परमेश्वरः भिंदंति योगि
नः सूर्यं योगाभ्यासेन वै पुनः ६ द्वितीयं सुषुम्नाद्वारं परिशुद्धं विसर्पति भिंदंति योगिनः सूर्यं

कपालसंपुटंभित्वाततःपश्यतितत्परं ७ अथतन्त्यापयेज्ञंतुगालस्यात्वप्रमादतः यदित्रिकाल
मावर्त्तेत्सगच्छेत्परमंपदं ८ पुण्यमेनन्तमासाद्यसंत्तेपात्कथितंमयालभ्यंयोगेनबोद्धव्यंप्रसन्नेप
रमेष्ठिने ९ जन्मांतरसहस्रेषुयदानाशतिकिल्बिषं तदापश्यतियोगेनसंसारछेदनंपरंसंसा
रछेदनंपरमिति १० इतियोगशिखोपनिषत्समाप्ता ११ योगतत्त्वंप्रवक्ष्यामियोगिनांहितका
म्यया यःश्रुत्वाचपठित्वाचसर्वपापैःप्रमुच्यते १ विष्णुर्नाममहायोगीमहाभूतोमहातपा तत्व
मार्गेयथादीपोदृश्यतेपुरुषोत्तमः २ यःस्तनंपूर्वपीतंतत्पिनिपीड्यचपयोधरात् यस्मिन्जातो
भगात्पूर्वंतस्मिन्नेवभगेरमत् ३ यामातासापुनर्भार्यायाभार्याजननीहिसा यःपितासपुनःपुत्रो
यःपुत्रःसपुनःपिता ४ एवंसंसारचक्रेणकूपचक्रेघटाइव भ्रमंतोयोनिजन्मानिश्रुत्वालोकान्स
मश्नुते ५ त्रयोलोकास्त्रयोवेदास्त्रयःसंध्यास्त्रयःसुराः त्रयोग्नयोगुणास्त्रीणिस्थिताःसर्वेत्रयाक्ष
रे ६ त्रयाणामक्षराणांचयोधीतेप्यर्द्धमक्षरं तेनसर्वमिदंप्रोतंतत्सत्यंतत्परमंपदं ७ पुष्पमध्येय
थागंधःपयोमध्येयथाघृतं तिलमध्येयथातैलंपाषाणेष्विवकांचनं ८ हृदिस्थानेस्थि
तंपद्मंतच्चपद्ममधोमुखं ऊर्द्धनालमधोविंदुतस्यमध्येस्थितंमनः ९ अकारेरेचितंपद्ममुका
रेणैवविद्यते मकारेलभतेनादमर्द्धमात्रातुनिश्चला १० शुद्धस्फटिकसंकाशंकिंचित्स्पर्शमरी

विवत् लभते योगयुक्तात्मा पुरुषो नमतन्मरः ११ कूर्मवत्साणि पादाभ्यां शिरस्यात्मनि धार
येत् एवं सर्वं नवद्वारेषु वायुः पूरितं प्रत्यकः १२ निषिद्धे तु नवद्वारे ऊर्ध्वं प्राङ्निश्वसंस्तथा घटम
ध्येय यथा दीप निर्वाणात् कुंभकं विदुः १३ पद्मपत्रमिवात्मिकं मूर्ध्वं वायुर्विमोहनात् ऋवो लला
उप- टमध्यस्थं तज्ज्ञेयं च निरंजनं १४ निश्छिद्रे तु न निर्वाते निर्जने निरुपद्रवे निश्चिंते चात्मभूताना
२५ मरिष्टं योगमेवयां १५ अरिष्टं योगमेवयेति ॥ इति योगतत्त्वोपनिषत्समाप्ता २३ ॐ अथा
हिताग्निर्म्रियते येन स्मृतेः संस्कारोपतिष्ठते स्वस्थो वा श्रमपारं गच्छेयमितः सता स्थितमेथिका
मो विधिवत्संभारान्संभृत्य आरण्येगत्वा श्रमावास्यायां प्रातर्देवानेशौ नु पसमायायपितस्थः
आहृतयोर्णां कृत्वा श्रात्मेष्टिं निर्वपेत् स सर्वज्ञः सर्ववित्यस्य ज्ञानमयं तपः तस्मै चाहृति
र्दिव्यां श्रमस्तन्वायकस्ताताभिमेवमतं अंडं पद्मलोभ्युदयदिवं च लोकमिदमं च सर्वं सर्वम
भिजित्य सर्वं श्रिये दयत्सममनस्य मानाब्रह्मजज्ञानमितिब्रह्मणोऽथर्वणो प्रजापतये मतये
अग्नये स्विष्टकृते इति कृत्वा यज्ञपजे गर्भेण गार्हपत्याहु नो वित्मावायमिति च तंभिरन्ववाके
नाम्याहृतिं कृत्वा तैर्वाप तिष्ठते न यथा येऽग्नाविमिति च अग्रे श्रीम्समारोपयेत् अनवान्या
देतारूत इति तत्र श्लोकः ब्रह्मचर्याश्रमे निर्जगृहस्थाश्रमणपरो वेदानधीत्यानुज्ञातश्व्यते

गृहाणामीदारमाकृत्स्नं सद्वाममग्निमाधाय शक्तितः ब्राह्मीमिष्टिं यजेतासामह्नोरात्राणि निर्व
पेत् स विभज्य सुतानर्थानाद्याम्यान्कामान्विसृज्य च चरेत वनमार्गेणाशुचौ देशे परिभ्रमणा वा शु
भक्तो वा भक्तो वा विहितानो ततः फलैः स्वशरीरसमारोपः पृथिव्यां तु सपावकाः सहते तेनैव पुरु
षः कथं संन्यस्त उच्यते स नाम मध्ये स किन्तु यस्मिन्संन्यस्त उच्यते तस्मात्फलाविमुह्य गीसंन्यास
सहनेर्हिमान् अग्निवर्णा निष्क्रामति वानप्रस्थ्ये प्रपद्यते लोकाः सर्वेषां सहितो वनं गच्छति स
पुत्रस्य तत्कामान्संन्यस्यति भयं किमनुतिष्ठति किं वा दुःखम् सुदिष्य भोगांस्त्यजति पुष्पि
तान् गर्भवासभयाद्भीतः शीतोष्णाभ्यां तथैव च गुहाप्रवेष्टुमिच्छामि परं पदमनामयं १
इति संन्यस्याग्निमपुनरावर्तनं यन्मृत्युर्जायामावहामीत्यथाध्यात्ममन्त्रान् जपेदीक्षामुपेयात्
काषायवासाः कक्षोपस्थलोमानि वर्जयेत् ऊर्ध्ववाहुर्विमुक्तमार्गो भवत्यनपेक्षचेद्भिक्षाशी
न दध्यात्पवित्रं धारयेज्जन्तुसंरक्षणार्थं तत्र श्लोकाः कुण्डिकां चमसं शिक्यं त्रिविष्टपम् नाम
य शीतोपघातिनीं कन्थां कौपीनाच्छादनं तथा पवित्रं स्नानशाटीं च उत्तरासङ्गमेव च अ
तोतिरिक्तं यत्किंचित्सर्वं तद्वर्जयेद्यतिः २ नदीपुलिनशायी स्याद्देवागारेषु वा स्वपेत् नात्य
र्थं सुखदुःखाभ्यां शरीरमुपतापयेत् ३ स्नानं दानं तथा शौचमद्भिः पूताभिसंचरेत् स्व

यमानोनतुष्येतनिंदितोनशपेत्परान् ४ भिक्षादिवैदलंपात्रंस्नानंद्रव्यमुदाहृतं एतांवृत्तिमु
पासीतैद्द्विषनयेत्सदा ५ विद्यायामनसिसंयोगोमनसाकाशमाकाशाद्वायुर्वायोर्ज्योतिर्ज्यो
तिषआपोऽद्भ्यःपृथिवीपृथिव्याउत्पत्तिर्भूतानांब्रह्मप्रपद्यतेअजरममरमक्षरमव्ययंप्रपद्य
तेतदभ्यासेनप्राणापानौसंयम्य तत्रश्लोकाः वृषणापानयोर्मध्येपाणीआस्थायसंश्रये
उप· त् संदश्यशनकैर्जिह्वांयवमात्रविनिर्गतांमाषमात्रांतथादृष्टिंश्रोत्रेस्थाप्यतथाभुवि श्रव
२५ णोनासिकेनगंधायनतथचेनस्पर्शयेत् अथशैवंपदंयत्रतद्ब्रह्मतत्परायणं तदभ्यासेनल
भ्यतेपूर्वजन्मार्जितात्मनः अथतैःसंभृतैर्वायुःसंस्थाप्यहृदयंतपः ऊर्ध्वंप्रपद्यतेदेहाद्भित्वा
मूर्द्धानमव्ययं अथायंमूर्द्धानमस्यदेहस्यैषामतिर्भविमतोयेप्राप्यपरांगतिंभूयस्तेननिवर्त
ते परात्परमवस्थितंपरात्परमवस्थितमिति ॥ इतिसंन्यासोपनिषत्समाप्ता ॥ २४ ॥ ॐ
आरुणिःप्रजापतेर्लोकंजगामतंगत्वोवाचकेनभगवन्कर्माण्यशेषतोविसृजामीति तंहोवा
चप्रजापतिस्तवपुत्रान्भ्रातॄन्बंध्वादीन्शिखांयज्ञोपवीतंचयागंचसूत्रंचस्वाध्यायंचभू
र्लोकंचभुवोलोकंचस्वर्लोकंचमहोलोकंचजनोलोकंचतपोलोकंचसत्यलोकंचतलपाता
लवितलसुतलवितलरसातलमहातलातलंब्रह्मचारीवानप्रस्थोवाउपवीतंसशिखेभूमा

ब्रह्मांडं च विसर्जयेत् दंडमाच्छादनं कौपी ३५
नं परिग्रहेत् ... विसृजेदिति

वस्त्रंवाविसृजेत् लोकाग्नीनुदराग्नौसमारोपयेत् गायत्रींचस्ववाग्नौसमारोपयेत् कुटी
चरोब्रह्मचारीकुटुंबंविसृजेत्पात्रंविसृजेत् दंडंलोकांश्चविसृजेत् लौकिकाग्नींश्चविसृजेत्
इतिहोवाचातऊर्ध्वममंत्रवदाचरेत् औषधवदशनमाचरेत् त्रिसंध्यादौस्नानमाचरेत्संधिं
समाधावात्मन्याचरेत्सर्वेषुवेदेष्वारण्यकमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तयेदि
ति २ खल्वहंब्रह्मसूत्रंसूचनात्सूत्रमहमेवसूत्रंब्रह्मसूत्रमहमेवविद्वान्बहिः सूत्रंत्यजेद्वि
द्वान्यएवंवेदकामक्रोधहर्षरोषलोभमोहदंभदर्पासूयादीन्परित्यजेद्वर्षासुध्रुवशीलो
ऽष्टौमासानेकाकीयतीश्चरेद्द्वावेववाविचरेदिति ३ खलुवेदार्थंयोविद्वान्सोपनयनादूर्ध्व
मेतानिप्राग्वात्यजेत्पितरंपुत्रमग्न्युपवीतंकर्मकलत्रंचान्यदपीहसंन्यस्तंमयासंन्यस्तंमये
त्रिःकृत्वोर्ध्वदंडंवैणवंकौपीनंचपरिग्रहेत्रान्यदथभिक्षाचर्यंचरेत्ब्रह्मचर्यमहिंसांचाप
रिग्रहंसत्यंचयत्नेनहेरक्षतोहेरक्षतइति अथातःपरमहंसपरिव्राजकानामासनशयना
दिकंभूमौब्रह्मचर्यंमृत्पात्रंवाअलाबुपात्रंदारुपात्रंवायतीनांपतयोहिभिक्षार्थंग्रामंप्रविश
न्तिउदरपात्रेणपाणिपात्रे ॐहिॐहिॐहिॐविन्यसेत् खल्वेतदुपनिषदंविद्वान्यएवंवेदपाला
शंबैल्वमाश्वत्थमौदुंबरमजिनंमेखलंयज्ञोपवीतंचत्यक्त्वाशूरोयएवंवेदतद्विष्णोःपरमंपदंसदा

ॐ ह्रिं

पश्यंति सूरयः दिवीव चक्षुराततं नहि ग्रामो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं प
दमिति ते निर्वाणमनुशासनमिति वेदानुशासनमिति वेदानुशासनमिति ॥ इत्यारुणि
योपनिषत्समाप्ता ॥ ॐ योनुक्रमेण संन्यस्यति स संन्यस्तो भवति कोयं संन्यास उच्यते कथं
उप. संन्यस्तो भवति य आत्मानं क्रियाभिः गुप्तं करोति मातरं पितरं भार्यां पुत्रान् सुहृदो बंधूननु
३६ मोदयित्वा ये चास्य ऋत्विजस्तान् सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरीमिष्टिं कुर्यात् सर्वस्वं दद्यात् य
जमानस्य गान् ऋत्विजः सर्वैः पात्रैः समारोप्य यदाहवनीये गार्हपत्ये न्वाहार्यपचने सभ्याव
सथ्ययोश्च प्राणापानव्यानोदानसमानान् सर्वान् सर्वेषु समारोपयेत् सशिखान् केशान् विसृज्य
यज्ञोपवीतं निःकृत्य पुत्रं दृष्ट्वा त्वं ब्रह्मा त्वं यज्ञस्त्वं सर्वमित्यनुमंत्रयेत् यदि पुत्रो भवत्यात्मा
नमेवं ध्यात्वा ऽनवेक्षमाणः प्राचीमुदीचीं वा दिशं प्रव्रजेत् चतुर्षु वर्णेषु भैक्षचर्यां चरेत् पाणिपा
त्रेणाशनं कुर्यात् औषधवत् प्राश्नीयात् यथालाभमश्नीयात् प्राणसंधारणार्थं यथा मेदोवृद्धिर्न जा
यते कृशीभूत्वा ग्राम एकरात्रं नगरे पंचरात्रं चतुरो मासान् वार्षिकान् ग्रामे वा नगरे वापि वसे
द्विशीर्णं वस्त्रं वल्कलं वा प्रतिगृह्णीयान्नान्यत्प्रतिगृह्णीयात् यद्यशक्तो भवति यो नु क्लेशाः
दुःखतपस्यते तपइति योवा यवं क्रमेण संन्यसति योवा संतिष्ठति किमस्य यज्ञोपवीतं का

वासःशिखाकथंवास्योपस्पर्शनमितितान्होवाचेदमेवास्यतद्यज्ञोपवीतंयदात्मध्यानंविद्या
साशिखानीरैःसर्वत्रावस्थितैःकार्यंनिर्वर्तयन्नुदपात्रेणजलतीरेनिकेतनेब्रह्मवादिनोवदन्त्य
स्तमितिआदित्येकथंवास्योपस्पर्शनमितितान्होवाचयथाहनितथारात्रौनास्यनक्तंनवादिवा
नदथैतदृषिणोक्तंसकृद्दिवाहैवास्मैभवतियएवंविद्वानेतेनात्मानंसंधत्तेसंधत्ते १ देवाह
वैसमेत्यप्रजापतिमब्रुवन्नविदामोनविदामश्चेतिसोऽब्रवीद्ब्राह्मणेभ्योमनहृदनोत्तास्यथेतित
तोवैतेब्रह्मिष्ठानवदंतानवदंतउमेनत्सर्वेदेवानांसार्ष्टितांसालोकतांसायोज्यतांगछंतियए
वंवेदसशिखान्केशान्निःकृत्यविसृज्ययज्ञोपवीतंनिःक्रम्यपुत्रंदृष्ट्वात्वंब्रह्मात्वंयज्ञस्त्वंवषट्का
रस्त्वमोंकारस्त्वंस्वाहात्वंस्वधात्वंविधातात्वंधाताप्रतिष्ठासीतथापुत्रोवदत्यहंब्रह्माहंयज्ञोऽहं
वषट्कारोऽहमोंकारोऽहंविधाताहंधाताहंप्रतिष्ठास्मीतितामेनामनुव्रजन्नाक्रमापातेयतनयद
क्रमापातयेत्प्रजोच्छिंद्यात्सद्दक्षिणामाहस्मैतच्चैतन्यानपेक्ष्यमाणाश्चमापयतिसस्वर्गीभवा
ति २ ब्रह्मचारीवेदमधीत्यवेदौवेदान्वाचरितब्रह्मचर्योदारानाहृत्यपुत्रानुत्पाद्यताननुरूपा
भिर्वृत्तिभिर्वितन्येष्ट्वाचशक्तितोयज्ञैस्तस्यसंन्यासोगुरुभिरनुज्ञातस्यबांधवैश्चसोऽरण्यंपरे
त्यद्वादशरात्रंपयसाग्निहोत्रंजुहुयात् द्वादशरात्रंपयोभक्षःस्यात्द्वादशरात्रस्यांतेअग्नये

वैश्वानरायप्रजापतयेचप्राजापत्यंचरुंवैश्वदेवंत्रिकपालमग्नौसंस्थितानिस्रुवीणिदारुपात्राण्य
ग्नौजुहुयात्मृण्मयान्यप्सुजुहुयात्तैजसानिगुरवेदद्यात्मात्वंमामवहायपरागानाहंत्वाम
वहायपरागामितिगार्हपत्यमितिदक्षिणाग्निमेवमाहवनीयमरणिदेशाद्भस्ममुष्टिंपि
वेदित्येकेसशिखान्केशान्कृत्वाविसृज्ययज्ञोपवीतंभूःस्वाहेत्यप्सुजुहुयादतऊर्ध्वमन
उप·
शनमपांप्रवेशमग्निप्रवेशंवीराध्वानंमहाप्रस्थानंवृद्धाश्रमंवागच्छेत्पयःसायंप्राश्नीया
३०
त्सोस्यसायंहोमोयत्प्रातःसोस्यप्रातर्यद्दर्शंतद्दर्शंयत्पौर्णमास्यंतत्पौर्णमास्यंयद्वसन्तेकेश
श्मश्रुलोमनखानिवापयेत्सोस्याग्निष्टोमःसोस्याग्निष्टोमः ३ संन्यस्याग्निंनपुनरावर्तयेत
यन्मृत्युर्जायामावहमित्यध्यात्ममन्त्रान् जपेत्स्वस्तिसर्वजीवेभ्यइत्युक्त्वादीक्षामुपेया
त्काषायवासाःकक्षोपस्थलोमानिवर्जयेत्लघुंमुण्डःसूत्रोदपात्रकमण्डल्वादित्यध्यात्ममस्य
ध्यायेत्ऊर्ध्वंगोधूमपुर्विमुक्तमार्गोभवेदनिकेतश्चेदित्याशीनदयाच्छोकेकेयारथेज्ञंतेमेर
त्यणार्थंवर्षावज्जमितितदपिश्लोकाः कुण्डिकांचमसंशिक्यंत्रिविष्टपमुपानहौशीतोप
घातिनींकंथांकौपीनाच्छादनंतथा पवित्रंस्नानशाटींचोत्तरासंगमेवच यज्ञोपवीतंवे
दांश्चसर्वंतद्वर्जयेद्यतिः स्नानंपानंतथाशौचमद्भिःपूताभिराचरेत् नदीपुलिनशायी

सा देवागारेषु वा स्थापयेत् नात्यर्थं सुखदुःखाभ्यां शरीरमुपतापयेत् स्तूयमानो न तुष्येत नि
दितो न शापयेत्परान् यतो वृत्तिमुपासीत तत्पयंतीद्वियाग्नि च तापयंतीद्विपाग्नि च इति कं
ठश्रुतिरुपनिषत्समाप्ता ॥२१॥ ॐ नमोऽथर्ववेदाय ॐ नमो भगवते श्रीमद्दिव्यलक्ष्मीनृ
सिंहाय नमः सामेन ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तु
ष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः २ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॐ शांतिः ॐ शांतिः ॐ शांतिः ॐ
आपो वा इदमासन्सलिलमेव स प्रजापतिरेकः पुष्करपर्णे समभवत्तस्यांतर्मनसि कामः
समवर्तते नेदं सृजेयमिति तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा वदति तत्कर्मणा करो
ति तदेषाभ्युक्ता कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् सतो बंधुमसति नि
रविंदन्हृदि प्रतीष्या कवयो मनीषेत्युपैनं तदुपनमति यत्कामो भवति स तपोऽतप्यत स
तपस्तप्त्वा स एतं मंत्रराजं नारसिंहमानुष्टुभमपश्यत्तेन वै सर्वमिदमसृजत यदिदं किंच त
स्मात्सर्वमिदमानुष्टुभमित्याचक्षते यदिदं किंचानुष्टुभमित्याचक्षते यदिदं किंचानुष्टुभा
वा इमानि भूतानि जायंते अनुष्टुभा जातानि जीवंत्यनुष्टुभं प्रयंत्यभिसंविशंति तस्यैषा भव

पतिर्योयजुर्वेदंवाचास्तंसामजानीयाद्योजानीतेसोऽमृतत्वंचगच्छतिमहाप्रथमंतार्ईस्याद्याद्वितो
द्वितीयंतार्ईसाध्यंभीषयंभन्तीयंतार्ईस्याद्यंनमःचतुर्थस्यार्ईस्याद्यंसामजानीयाद्योजानीते
सोऽमृतत्वंचगच्छतितस्मादिदंसविदांनेदमपपरंब्रह्मतमेवंविद्वानमृतइहभवतितस्मादिदंसा
ङ्गंसामजानीयाद्योजानीतेसोऽमृतत्वंचगच्छतिषष्ठःखंडः ६ विश्वसृजएतेनवैविश्वमिदमसृ
३५ जन्तयद्विश्वमसृजन्ततस्माद्विश्वसृजोविश्वमेनाननुप्रजायतेब्रह्मणःसायुज्यंसलोकतांजय
न्तितस्मादिदंसाङ्गंसामजानीयाद्योजानीतेसोऽमृतत्वंचगच्छतियोवैसवेदयदिदंकिंचात्म
निब्रह्मण्यानुष्टुभंजानीतेयोजानीतेसोऽमृतत्वंचगच्छतिस्त्रीपुंसोवाउइहस्यात्तुपेत्तेनसस
वैश्वर्यंददातियत्रकुत्रापिम्रियतेदेहान्तेदेवःपरंब्रह्मतारकंव्याचष्टेयेनासावमृतीभूत्वासो
ऽमृतत्वंचगच्छतितस्मादिदंसाममध्यगंजपतितस्मादिदंसामगंप्रजापतिर्यएवंवेदवेदेतिमहो
पनिषद्यएवंतांमहोपनिषदंवेदसकृतपुरश्चरणोपिमहाविष्णुर्भवतियएवंवेदेतिमहोपनिष
त्सप्तमःखंडःसप्तमः ७ इत्याथर्वणीयेनृसिंहपूर्वतापनीयमहोपनिषत्समाप्ताप्रथ
मा २९ ॐदेवाहवैमृत्योःपाप्मभ्यःसंसाराद्बिभ्यतःप्रजापतिमुपधावंस्तेभ्यएतंम
न्त्रराजंनारसिंहमानुष्टुभंप्रयच्छत्तेनवैसर्वेमृत्युमजयन्पाप्मानमतरन्संसारान्तात
३५

रतंतस्मायोमस्तोः पाप्मभ्यः संसारात्त्रविभेपान्सपतंमंत्रराजंनारसिंहमानुष्टुभंप्राणिनशृणीया
न्मृत्युंजयतिसपाप्मानंतरतिससभंतरतितस्यहवैप्रणवस्ययापूर्वामात्रापृथिव्यकारःस
ऋग्भिऋग्वेदोब्रह्मावसवोगायत्रीगार्हपत्यःसाप्रथमःपादोभवतिद्वितीयांतरिक्षंसउकारःस
यजुर्भिर्यजुर्वेदोविष्णुरुद्रास्त्रिष्टुब्दक्षिणाग्निःसाद्वितीयःपादोभवतितृतीयाद्यौर्समकारःससा
मभिःसामवेदोरुद्रादित्याजगत्याहवनीयःसातृतीयःपादोभवतियावसानेस्यचतुर्थ्यर्धमात्रा
सासोमलोकओंकारःसाथर्वणैर्मंत्रैरथर्ववेदःसंवर्तकोग्निर्मरुतोविराडेकऋषिर्भास्वतीसा
सास्यचतुर्थःपादोभवतिप्रथमःस्वरः १ अष्टाक्षरःप्रथमःपदोभवत्येकादशाक्षरास्त्रयःपादाभ
वंतिएवंद्वात्रिंशदक्षराणिसंपद्यंतेद्वात्रिंशदक्षरावानुष्टुब्भवत्यनुष्टुभासर्वमिदंसृष्टमनुष्टुभा
सर्वमुपसंहृतंतस्यहृदिपंचांगानिभवंतिचत्वारःपादाचत्वार्यंगानिभवंतिसप्रणवंसर्वंपंच
मंभवति ओंहृदयायनमः ओंशिरसेस्वाहा ओंशिखायैवौषट् ओंकवचायहुं ओंअस्त्रायफडितिप्र
थमंप्रथमेनयुज्यतेद्वितीयंद्वितीयेनतृतीयंतृतीयेनचतुर्थंचतुर्थेनपंचमंपंचमेनव्यभिषक्ता
व्यस्मलोकात्तस्माद्यतिविकान्यंगानिभवंत्योमित्येतदक्षरमिदंसर्वंतस्मात्प्रत्यक्षरमुभयतओं
कारोभवतिअक्षराणांन्यासमुपदिशंतिब्रह्मवादिनः तस्यहवाउग्रंप्रथमंस्थानंजानीया

योजानीतेसोमृतत्वंचगछतिवीरंद्वितीयंद्वितीयेस्थानेमहाविष्णुंतृतीयस्थानेज्वलंतंचतुर्थस्था
नेसर्वतोमुखंपंचमेनृसिंहंषष्ठेभीषणंसप्तमेभद्रमष्टमेमृत्युंनवमेनमाम्यहंदशमेमहमित्येका
दशेस्थानेजानीयाद्योजानीतेसोमृतत्वंचगछत्येकादशपदानुष्टुब्भवत्यनुष्टुभासर्वमिदंसृ
 ष्टमनुष्टुभासर्वमुपसंहृतंतस्मात्सर्वमिदमानुष्टुभंजानीयाद्योजानीतेसोमृतत्वंचगछतिद्वि
तीयःखंडः २ देवाहवैप्रजापतिमब्रुवन्नथकस्मादुच्यतेउग्रमितिसहोवाचप्रजापतिर्यस्मा ।
त्स्वमहिम्नासर्वान्लोकान्सर्वान्देवान्सर्वानात्मनःसर्वाणिभूतान्युद्गृह्णात्यजस्रंसृजतिवि
सृजतिवासयत्युद्ग्राह्यतउद्गृह्यतेस्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहंतुमुग्रंमृडाजरि
त्रेसिंहस्तवानोन्यंतेस्मिन्नवपंतुसेनाःतस्मादुच्यतेउग्रमित्यथकस्मादुच्यतेवीरमितियस्मात्स्वमहि
म्नासर्वाल्लोकान्सर्वान्देवान्सर्वानात्मनःसर्वाणिभूतानिविरमतिविरामयत्यजस्रंसृजतिवि
सृजतिवासयतियतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेवकामस्तस्मादुच्यतेवीरमित्य
थकस्मादुच्यतेमहाविष्णुमितियःसर्वाल्लोकान्व्याप्नोतिव्यापयतिस्नेहोयथापललपिंडमो
तप्रोतमनुप्राप्तंव्यतिषिक्तोव्याप्यतेव्यापयतेयस्मान्नजातःपरोन्योस्तियआविवेशभुवनानि
विश्वा यस्माद्दत्वंनपरंकिंचनास्तिप्रजापतिःप्रजयासंविदानस्त्रीणिज्योतींषिसचतेसषोड ।

णीतस्माडुच्यतेमहाविष्णुमित्यथकस्माडुच्यतेज्वलंतमितियत्स्वमहिम्नासर्वांल्लोकान्सर्वान्दे
वान्सर्वानात्मनःसर्वाणिभूतानिस्वतेजसाज्वलतिज्वालयतिज्वाल्यतेज्वालयतेसविताप्रसविता
दीप्तोदीपयन्दीप्यमानोज्वलयन्ज्वलितातपन्वितपन्संतपन्रोचमानःशोभनःशोभ
मानःकल्याणस्तस्माडुच्यतेज्वलंतमित्यथकस्माडुच्यतेसर्वतोमुखमितियस्मादनिंद्रियोपि
सर्वतःपश्यतिसर्वतःशृणोतिसर्वतोगच्छतिसर्वतआदत्तेसर्वतस्तिष्ठत्येकःपुरस्ताद्यइदंब
भूवयतोबभूवभुवनस्यगोपायमानेत्रिभुवनेसंपरायेनमामितमहंसर्वतोमुखंतस्माडुच्य
तेसर्वतोमुखमित्यथकस्माडुच्यतेनृसिंहमितियस्मात्सर्वेषांभूतानांवीर्यतमःश्रेष्ठतमश्चसिं
होवीर्यतमश्रेष्ठतमश्चतस्मान्नृसिंहआसीत्परमेश्वरोजगद्धितेवाएतद्रूपमक्षरंभवतिप्रतद्वि
ष्णुस्तवतेवीर्यायमृगोनभीमःकुचरोगिरिष्ठःयस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानि
विश्वातस्माडुच्यतेनृसिंहमितिअथकस्माडुच्यतेभीषणमितियस्माद्यस्यरूपंदृष्ट्वासर्वेलो
काःसर्वेदेवाःसर्वाणिभूतानिभीत्यापलायंतेस्वयंयतःकुतश्चिन्नबिभेतिभीषास्माद्वातःपव
तेभीषोदेतिसूर्यःभीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचमःतस्माडुच्यतेभीषणमित्यथक
स्माडुच्यतेभद्रमितियःस्वयंभद्रोभूत्वासर्वदाभद्रंददातिरोचनोरोचमानःशोभनःशोभमा

उप.
४१ मा

नः कस्मात् ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभि
र्व्यशेम देवहितं यदायुः तस्मादुच्यते भद्रमित्यथ कस्मादुच्यते मृत्युमृत्युमिति यस्मात्स्वभक्तानां
स्मृत एव मृत्युमपमृत्युं च मारयति य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः यस्य छा
यामृतं यो मृत्युमृत्युः यो यस्येशे द्विपदो यश्चतुष्पदः कस्मै देवाय हविषा विधेम तस्मादुच्यते मृत्युमृ
त्युमित्यथ कस्मादुच्यते नमामीति यस्माद्यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च प्रभूतं ब्र
ह्म तस्य तिरश्चीनं नमस्तु ते यस्मिन् द्रोवहणामिद्योऽग्र्यमादेवान् कांश्चित्क्रियेत तस्मादुच्यते नमा
मीत्यथ कस्मादुच्यते अहमित्यहमस्मि प्रथमजा ऋतस्य २ ३ ४ पूर्वं देवेभ्योऽमृतस्य नाभि
२ ३ ४ ५ यो मा ददाति स इदेव मावत् २ ३ ४ ५ दहमन्नमन्नमदन्तमद्मि २ ३ ४ ५
अहं विश्वं भुवनमभ्यभवं २ ३ ४ ५ सुवर्णज्योतिर्य एवं वेदेत्युपनिषत् ५४ इत्याथर्वे
णीनारसिंहपूर्वतापनीये द्वितीयोऽथ महोपनिषत्समाप्ता ॥ ३ ॥ ॐ देवा ह वै प्रजापतिमब्रुवन्नणोरणीयांसमि मा
मं सर्वमिदं सृजति सर्वमिदं हरति सर्वमिदं संहरतीति तस्मान्मायया मतो शक्तिर्विद्यायां प्रतो यश
क्तिर्वेद समस्तं जगति स पाप्मानं तरति सो मृत्युं तरति महत्त्वं श्रियं समश्नुते मीमांसन्ते ब्रह्म
वादिनो ह्रस्वा वा दीर्घा वा प्लुता वेति यदि ह्रस्वा भवति सर्वं पाप्मानं दहत्यमृतत्वं च गच्छति य
तद्ब्रह्मात ... समत्रे राजसमस्ता सितं ह ... किं वीजं च ततो बृहद्भिम ... इति स होवाच प्रजापतिः ४१

दिदीर्घो भवति महतीं श्रियमाप्नुयादमृतत्वं च गच्छति यदि स्तुतो भवति ज्ञानवानुभवत्यमृतत्वं च
गच्छति तदेतदृषिणाभ्युक्तं निदर्शनं सई पाहि य ऋजीषी तरुद्रः श्रियं लक्ष्मी मौपलां गां विकां गोष
ष्टीं च यामिंद्रसेनेत्युत आऽहुस्तां विद्यां ब्रह्मयोनिस्वरूपां तामिहायुषे शरणं प्रपद्ये १ सर्वेषां वा
एतद्भूतानामाकाशः परायणं सर्वाणि ह वा इमानि भूतान्याकाशादेव जायंते आकाशादेव जातानि जी ४१
वंत्याकाशं प्रयंत्यभिसंविशंति तस्मादाकाशं बीजं विद्यात्तदेतदृषिणाभ्युक्तं निदर्शनं हंसः शुचि
षद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋत
जा अद्रिजा ऋतं बृहद्य एवं वेद इति महोपनिषत् तृतीयः ३ ॐ देवा ह वै प्रजापतिमब्रुवन्नानुष्टु
भस्य मंत्रराजस्य नारसिंहस्यांगमेव नो ब्रूहि भगव इति स होवाच प्रजापतिः प्रणवं सावित्रीं यजुर्ल
क्ष्मीं नृसिंहगायत्रीमित्यंगानि जानीयाद्यो जानीते सोऽमृतत्वं च गच्छत्योमित्येतदक्षरमिदं सर्वं त
स्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एव सर्वं ह्येत
द्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पाज्जागरितस्थानो बहिःप्रज्ञः सप्तांग एकोनविंशतिमुखः
स्थूलभुग्वैश्वानरः प्रथमः पादः स्वप्नस्थानोऽन्तःप्रज्ञः सप्तांग एकोनविंशतिमुखः प्रविविक्तभु
क्तैजसो द्वितीयः पादो यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्था

नयकीभूतः प्रज्ञानघनएवानंदमयोह्यानंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः एषसर्वेश्वरएष
सर्वज्ञएषोंतर्याम्येषयोनिः सर्वस्यप्रभवाप्ययौहिभूतानां नांतःप्रज्ञं नबहिःप्रज्ञं नोभयतःप्रज्ञं
नप्रज्ञंनाप्रज्ञंनप्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षणमलिंगमचिंत्यमव्यपदेश्यमे
उप॰ कात्मप्रत्ययसारंप्रपंचोपशमंशिवमद्वैतंचतुर्थंमन्यंतेसआत्मासविज्ञेयः प्रथमः खंडः १
५२ अथैषासावित्रीगायत्रीयायजुषाप्रोक्तानयासर्वमिदंव्याप्तं ओंघृणिरितिद्वेअक्षरेसूर्यइतित्रीणि
आदित्यइत्येतानित्रीणिएतत्सावित्रस्याष्टाक्षरंपदंश्रियाभिषिक्तंयएवंवेदश्रियाहैवाभिषिच्यतेतदेतदृ
चाभ्युक्तं ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः यस्तन्नवेदकिमृचाकरिष्यतिय
इत्तद्विदुस्तइमेसमासतेइतिनहवाएतस्यर्चानयजुषानसाम्नार्थोस्तियः सावित्रींवेदेति
ओंभूर्लक्ष्मीर्भुवर्लक्ष्मीः स्वःकालकर्णीतन्नोमहालक्ष्मीःप्रचोदयादित्येषावैमहालक्ष्मीयजु
र्गायत्रीचतुर्विंशत्यक्षराभवतिगायत्रीवाइदंसर्वंयदिदंकिंचतस्मायएतांमहालक्ष्मीयाजुषींवे
दमहतींश्रियमश्नुते ओंनृसिंहायविद्महेवज्रनखायधीमहितन्नःसिंहःप्रचोदयादित्येषाह
वैनृसिंहगायत्रीदेवानांवेदानांनिदानंभवतियएवंवेदसनिदानवान्भवतिद्वितीयःखंडः २
देवाहवैप्रजापतिमब्रुवन्नथकैर्मंत्रैर्देवस्तुतःप्रीतोभवतिस्वात्मानंदर्शयतितन्नोब्रूहिभगवन्नि

तिसहोवाचप्रजापतिः ॐयोवैनृसिंहोदेवोभगवान्यश्चब्रह्मातस्मैवनमोनमः १ योवैनृ· यश्चवि
ष्णुस्तस्मैनमोनमः २ ॐयोवै· यश्चमहेश्वरस्तस्मै· ३ योवै· यश्चपुरुषस्तस्मै· ४ योवै· य
श्चेश्वरस्तस्मै· ५ योवै· यासरस्वतीतस्मै· ६ ॐयोवै· याश्रीस्तस्मै· ७ ॐयोवै· यागौरी
तस्मै· ८ ॐयोवै· याप्रकृतिस्तस्मै· ९ ॐयोवै· याविद्यास्तस्मै· १० योवै· यश्चोंकार
स्तस्मै· ११ ॐयोवै· याश्चतस्रोर्द्धमात्रास्तस्मै· १२ ॐयोवै· येवेदाःसांगाःशाखास्तस्मै· १३
योवै· येपंचाग्नयस्तस्मै· १४ योवै· यासप्तव्याहृतयस्तस्मै· १५ ॐयोवै· येचाष्टलोकपा
लास्तस्मै· १६ ॐयोवै· येचाष्टौवसवस्तस्मै· १७ ॐयोवै· येचरुद्रास्तस्मै· १८ योवै· ये
चादित्यास्तस्मै· १९ योवै· चाष्टौग्रहास्तस्मै· २० योवै· यानिपंचमहाभूतानिस्तस्मै· २१
ॐयोवै· यश्चत्रैलोक्यस्तस्मै· २२ योवै· यश्चकालस्तस्मै· २३ ॐयोवै· यश्चमनुस्तस्मै· २४
ॐयोवै· यश्चमृत्युस्तस्मै· २५ ॐयोवै· यश्चयमस्तस्मै· २६ योवै· यश्चांतकस्तस्मै· २७ ॐ
योवै· यश्चप्राणस्तस्मै· २८ ॐयोवै· यश्चसूर्यस्तस्मै· २९ योवै· यश्चसोमस्तस्मै· ३० ॐ
योवै· यश्चजीवस्तस्मै· ३१ ॐयोवै· यश्चविराट्पुरुषस्तस्मै· ३२ ॐयोवैनृसिंहोदेवोभग
वान्यश्चसर्वंतस्मैवैनमोनमः ३३ इतितान्प्रजापतिरब्रवीदेतैर्द्वात्रिंशत्मंत्रैर्देवंस्तु

उप० व
५२

त्वंस्मात्तोदेवस्मात्मानंदर्शयन्तितस्मायपतेमंत्रैर्नित्यंदेवंस्तौतिसदेवंपश्यतिसोमृतत्वंच
गच्छतियएवंवेदस्सुपनिषत् इत्याथर्वणीयेपूर्वतापनीयेचतुर्थोमहोपनिषत्समाप्त ३२
ॐदेवाहवैप्रजापतिमब्रुवन्महाचक्रंनामचक्रंनोब्रूहिभगवःसार्वकामिकंमोक्षद्वारंय
द्योगिनःउपदिशन्तिसहोवाचप्रजापतिःषडरंवाएतत्सुदर्शनंमहाचक्रंतस्मात्षड
रंभवतिषट्पत्रंभवतिषड्वाऋतवऋतुभिःसंमितंमध्येनाभिर्भवतिनाभ्यांवाएतेअराः
प्रतिष्ठिताभवंतिमायायावाएतत्सर्वंवेष्टितंभवतिनात्मानंमायास्पृशतितस्मान्माय
यावहिर्वेष्टितंभवति अथाष्टारमष्टपत्रंचक्रंभवत्यष्टाक्षरागायत्रीगायत्र्यासंमितंभव
तिवहिर्मायायावेष्टितंभवतिक्षेत्रंक्षेत्रंवामायैषासंपद्यते अथद्वादशारंद्वादशपत्रंचक्रं
भवति द्वादशाक्षरावैजगतीजगत्यासंमितंभवतिवहिर्मायायावेष्टितंभवत्यथषोड
शारंषोडशपत्रंचक्रंभवति षोडशकलोवैपुरुषःपुरुषएवेदंसर्वंपुरुषेणासंमितंभ
वतिवहिर्मायायावेष्टितंभवति अथद्वात्रिंशदरंद्वात्रिंशत्पत्रंचक्रंभवतिद्वात्रिंशद
क्षरावाअनुष्टुप्भवत्यनुष्टुभासंमितंभवतिवहिर्मायायावेष्टितंभवत्यरैर्वाएतत्सुदर्शं
नंभवतिवेदावाएतेअराःपत्रैर्वाएतत्सर्वतःपरिक्रामतिछंदांसिवैपत्राणि १ तेदत

चक्रं सुदर्शनं महाचक्रं तस्य मध्ये नाभ्यां तारकं भवति यदक्षरं नारसिंहमेकाक्षरं तद्भवति
षट्सु पत्रेषु सुदर्शनं भवत्यष्टपत्रेष्वष्टाक्षरं नारायणं भवति द्वादशपत्रेषु द्वादशाक्षरं वा
सुदेवं भवति षोडशसु पत्रेषु मातृकाद्याः सबिंदुकाः षोडश कला भवंति द्वात्रिंशत्पत्रेषु द्वा
त्रिंशत्पत्रेषु द्वात्रिंशदक्षरं मंत्रराजं नारसिंहमानुष्टुभं भवति तद्वा एतन्महाचक्रं सार्वका
मिकं मोक्षद्वारं ऋङ्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवति तस्य पुरस्ताद्वसव आ
सते रुद्रा दक्षिणत आदित्याः पश्चाद्विश्वेदेवा उत्तरतो ब्रह्मविष्णुमहेश्वरा नाभ्यां सूर्याचंद्रमसौ
पार्श्वयोस्तदेतदृचाभ्युक्तं ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः यस्तन्न वे
द किमृचा करिष्यति य एतद्विदुस्त इमे समासत इति तदेतन्महाचक्रं बालो वा युवा वा वेद स म
हान्भवति स गुरुर्भवति सर्वेषां मंत्राणामुपदेष्टा भवत्यनुष्टुभा होमं कुर्यादनुष्टुभार्चनं त
देतद्रक्षोघ्नं मृत्युतारकं गुरुणा लब्धं कंठे बाहौ शिखायां वा बध्नीयात्सप्तद्वीपा वसुमती भू
मिर्दक्षिणार्थं नावकल्पते तस्माच्छ्रद्धया यां कांचिद्गां दद्यात्सा दक्षिणा च भवति २ देवा ह वै
प्रजापतिमब्रुवन्ननुष्टुभस्य मंत्रराजस्य फलं नो ब्रूहि भगव इति स होवाच प्रजापतिर्य एतं मंत्र
राजं नारसिंहमानुष्टुभं नित्यमधीते सो अग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो

उप-
५८

भवतिससोमपूतोभवतिससत्यपूतोभवतिसलोकपूतोभवतिसब्रह्मपूतोभवतिसवि-
ष्णुपूतोभवतिसरुद्रपूतोभवतिसवेदपूतोभवतिससर्वपूतोभवतिससर्वपूतोभवति
यएवंमंत्रराजंनारसिंहमानुष्टुभंनित्यमधीतेसमृत्युंतरतिसपाप्मानंतरतिसब्रह्महत्यां
तरतिसभ्रूणहत्यांतरतिसवीरहत्यांतरतिससर्वहत्यांतरतिससंसारंतरतिससर्वंतरति ४
यएतंसोग्निंस्तंभयतिसवायुंस्तंभयतिसआदित्यंस्तंभयतिससोमंस्तंभयतिसउदकंस्तं-
भयतिसर्वान्देवान्स्तंभयतिससर्वान्ग्रहान्स्तंभयति सविषंस्तंभयतिसविषंस्तंभव-
तियएतंसभूर्लोकंजयतिसस्वर्लोकंजयतिसमहर्लोकंजयतिसजनर्लोकंजयतिसत-
पोलोकंजयतिससत्यलोकंजयतिससर्वलोकंजयति ६ यएतंमंत्रराजंनारसिंहमा-
नुष्टुभंनित्यमधीतेसमनुष्यानाकर्षयतिसदेवानाकर्षयतिसनागानाकर्षयतिसग्रहा-
नाकर्षयतिसयक्षानाकर्षयतिससर्वानाकर्षयतिससर्वानाकर्षयति ७ यएतंमंत्ररा-
जंनारसिंहंनित्यमधीतेसोग्निष्टोमेनयजतेसउक्थेनयजतेसषोडशिनायजतेसवाज-
पेयेनयजतेसोतिरात्रेणयजतेसोप्तोर्यामेनयजतेसोश्वमेधेनयजतेससर्वैक्रतुभिर्यज-
तेससर्वैक्रतुभिर्यजते ८ यएतंमंत्रराजंनारसिंहमानुष्टुभंनित्यमधीतेसयज्ञेष्वधीतेस

सामान्यधीतेसोथर्वाणमधीतेसोंगिरसमधीतेसपुराणानमधीतेसकल्पाणधीतेसगा
थाश्चधीतेसनाराशंसीरधीतेसप्रणवमधीतेयःप्रणवतमधीतेससर्वमधीतेससर्वमधी
ते ८ अनुपनीतशतमेकमेकेनगृहस्थेनसमंगृहस्थशतमेकमेकेनवानप्रस्थेनतत्स
मंवानप्रस्थशतमेकमेकेनयतिनातत्समंयतीनांशतंशतंरुद्रजापकेनतत्समंरुद्रजा
पशतमेकमेकेनमंत्रजापजापकेनतत्समंतद्वाएतत्परमंधाममंत्रराजाध्यापकस्ययत्रसू
र्योनतपतियत्रवायुर्नवातियत्रनचंद्रमास्तपतियत्रनक्षत्राणिनभांतियत्रनाग्निर्दहति
यत्रमृत्युर्नप्रविशतियत्रयत्रदुःखंभवतिसदानंदंपरमानंदंशांतंशाश्वतंसदाशिवंब्र
प . ह्मादिवंदितंयोगिध्येयंयत्रगत्वाननिवर्तंतेयोगिनस्तदेतदृचाभ्युक्तंतद्विष्णोःपरमंपदंस
दापश्यंतिसूरयःदिवीवचक्षुराततंतद्विप्रासोविपन्यवोजागृवांसःसमिंधतेविष्णोर्यत्पर
मंपदंतदेतन्निःकामस्यभवतिनिष्कामस्यभवतियएवंवेदेति ॥ इतिमहोपनिषत्समा
मः तृतीयःखंडः ॥ इतिपंचमोपनिषत्समाप्ता ॥ इत्यथर्ववेदेरहस्येपूर्वनृसिंहतापनी
योपनिषत्समाप्ता ॥ पंचमः ३३ ॐ देवाहवैसत्यंलोकमायंस्तेप्रजापतिमपृच्छन्नारसिं
हचक्रंनोब्रूहीतितान्प्रजापतिर्नारसिंहचक्रमवोचत षडरंनारसिंहानिचक्राणिभवतिष

त्प्रथमंतच्चतुरंयद्द्वितीयंतच्चतुरंयत्तृतीयंतदष्टारंतदेतानिषडेवनारसिंहानिचक्राणि
भवंत्यथकानिमानिभवंति यत्प्रथमंतदाचक्रंयद्द्वितीयंतत्सचक्रंयत्तृतीयंतदसुरांतक
चक्रंतृतीयंतन्महाचक्रंतदेतानियच्चतुर्थंतत्सकललोकरक्षणंचक्रंयत्पंचमंतत्चक्रं
यत्षष्ठंतदसुरांतकचक्रंतदेतानिषडेवनारसिंहचक्रनामानिभवंतिअथकानित्रीणि

उप· ५५

चपलानिभवंति अथकानित्रीणिवलयानिभवंति अथकानित्रीणिवलयानिभवंतिय
त्प्रथमंतदांतरंवलयंभवतियत्द्वितीयंतन्मध्यमंवलयंभवतियत्तृतीयंतद्बाह्यंवलयंभ
वतियत्तृतीयंतद्बाह्यंवलयंभवतितदेतानित्रीणिवलयानिभवंतियदांतरंतद्बीजं
यन्मध्यमंतन्नारसिंहगायत्रीयद्बाह्यंतन्मंत्रः अथकिमांतरंवलयंषट्चक्रांतराणिवलया
निभवंतियन्नारसिंहंतत्प्रथमस्ययन्महालक्ष्म्यंतद्द्वितीयस्ययत्सारस्वतंतत्तृतीयस्ययत्कामा
देवंतच्चतुर्थस्ययत्प्रणवंतत्पंचमस्ययत्क्रोधदैवंतत्षष्ठस्यतदेतानिषट्संनारसिंहचक्रा
णांषडंतराणिवलयानिभवंति अथकिंमध्यमवलयंषड्द्वैमध्यमानिवलयानिभवंति य
न्नारसिंहायतत्प्रथमस्ययद्विद्महेतत्द्वितीयस्यवज्रनखायतत्तृतीयस्ययद्धीमहितच्चतुर्थ
स्ययत्तन्नस्तत्पंचमस्ययत्सिंहःप्रचोदयादितितत्षष्ठस्यतदेतानिषण्णांनारसिंहचक्राणांषण्म

ष्यमाणि वलयानि भवंति अथ किं वा हि वलयं षड्वा एतानि वलयानि भवंति यदा चक्रं यदा
नंदात्मा तत्सत्यमथ यत्सकललोकरत्तपाचक्रं यत्तमियात्मा तद्द्वितीयस्य यन्महाचक्रं यज्ञात्मा तिरा
त्मा तत्तृतीयस्य यत्सकललोकरत्ताणाचक्रं यन्मायात्मा तच्चतुर्थस्य यत्फचक्रं यद्योगात्मा त
त्पंचमस्य यदामृतात्तकाचक्रं यत्सर्वात्मा तत्सत्यमसदेतानि षड्वा नारसिंहचक्राणां षड्वला
नि वलयानि भवंति अथैतानि स्यानि यत्प्रथमे हृदये यद्द्वितीये तच्छिरसि यत्तृतीये तच्छि
खायां चतुर्थे तत्सर्वेष्वंगेषु पंचमे तत्सर्वेषु नेत्रेषु यत्षष्ठे तत्सर्वेषु देशेषु य एतानि नार
सिंहानि चक्राणि एतेष्वंगेषु विधृयात तस्यानुष्टुप्सिध्यति तस्य भगवान्नृसिंहः प्रसीदति तस्य कै
वल्यं सिध्यति तस्य सर्वे लोकाः सिध्यंति तस्य सर्वे जनाः सिध्यंति तस्माद्देवतानि षड्नारसिंहा
नि चक्राणि गेषु न्यस्तानि भवंति पवित्रं चैतत्तस्य न्यसनं न्यसनान्नारसिंहानंदी भवति कर्म
ण्यो भवति ब्रह्मणो भवति तस्मादेतत्पवित्रं तस्य न्यसनं यो वा एतन्नारसिंहचक्रमधीते स स
र्वेषु वेदेष्वधीती भवति स सर्वेषु यज्ञेषु याजको भवति स सर्वेषु तीर्थेषु स्नातो भवति स सर्वेषु म
त्रेषु सिद्धो भवति स सर्वत्र शुद्धो भवति स सर्वरक्षोभूतपिशाचशाकिनीप्रेतवेतालनाशको
भवति स निर्भयो भवति तदेतन्नाश्रद्दधानाय प्रब्रूयाद्यदेतन्नाश्रद्दधानाय प्रब्रूयादिति ॥

त्यथर्वणीयेनारसिंहामद्भुतोपनिषत्समाप्ता: ३४ ॐनमोनृसिंहाय ॐभद्रंकर्णेभि: १
ॐस्वस्तिनइंद्रो १ ॐउमेंशांति शांति शांति देवाहवैप्रजापतिमब्रुवन्नणोरणीयांसमि
ममात्मानमोंकारंनोव्याचक्ष्वेति ॐमित्येतदक्षरमिदंसर्वंतस्योपव्याख्यानंभूतं
रप. ५६ भवद्भविष्यदितिसर्वमोंकारएवयच्चान्यत्त्रिकालातीतंतदप्योंकारएवसर्वंह्येतद्ब्र
ह्मायमात्माब्रह्मतमेतमात्मानमोमितिब्रह्मणैकीकृत्यब्रह्मचात्मानमोमित्येकीकृ
त्यतदेकमजरममरममृतमभयमोमित्यनुभूयतस्मिन्निदंसर्वंत्रिशरीरमारोप्यतन्मयंहि
तदेवेतिसंहरेदोमितितंवाएतंत्रिशरीरमात्मानंत्रिशरीरंपरंब्रह्मानुसंदध्यात्स्थूलभुक्
त्वात्सूक्ष्मभुक्त्वादेकभुक्त्वादानंदभोक्तृत्वाच्चसोयमात्माचतुष्पाज्जागरितस्थान:स्थू
ग लप्रज्ञ:सप्तांगएकोनविंशतिमुख:स्थूलभुक्चतुरात्माविश्वोवैश्वानर:प्रथम:पाद:स्व
प्नस्थान:सूक्ष्मप्रज्ञ:सप्तांगएकोनविंशतिमुख:सूक्ष्मभुक्चतुरात्मातैजसोहिरण्यगर्भो
द्वितीय:पादोयत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतितत्सुषुप्तंसुषुप्तस्था
नएकीभूत:प्रज्ञानघनएवानंदमयोनंदभुक्चेतोमुखश्चतुरात्माप्राज्ञईश्वरस्तृतीय:
पाद:एषसर्वेश्वरएषसर्वज्ञएषोंतर्याम्येषयोनि:सर्वस्यप्रभवाप्ययौहिभूतानांत्रयमेत

त्सुषुप्तं स्वप्नं मायामात्रं चिदेकरसो ह्ययमात्माथ तुरीयश्चतुरात्मा तुरीयावसितत्वादेकैक
स्योतोनुज्ञात्रनुज्ञात्रविकल्पैस्त्रयमप्यपि सुषुप्तं स्वप्नं मायामात्रं चिदेकरसो ह्ययमादेशोऽ
स्थूलमज्ञानं सूक्ष्ममज्ञानं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यम
लक्षणमलिंगमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शिवं शांतमद्वैतं च
तुर्थं मन्यंते स आत्मा स विज्ञेयः ईश्वरग्रासस्तुरीयस्तुरीय १ तं वा एतमात्मानं जाग्रत्यसुषुप्तम
स्वप्नं स्वप्नेऽजाग्रतमसुषुप्तं सुषुप्तेऽजाग्रतमस्वप्नं तुरीयेऽजाग्रतमस्वप्नमसुषुप्तमम
व्यभिचारिणं नित्यानंदं सदेकरसं ह्येव चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा मनसो द्रष्टा।
बुद्धेर्द्रष्टा प्राणस्य द्रष्टा तमसो द्रष्टा सर्वस्य द्रष्टा ततः सर्वस्मादन्यो विलक्षणश्चक्षुषः साक्षी
वि श्रोत्रस्य साक्षी वाचः साक्षी मनसः साक्षी बुद्धेः साक्षी प्राणस्य साक्षी तमसः साक्षी सर्वस्य।
साक्षी ततोऽविक्रियो महाचैतन्योऽस्मात्सर्वस्मात्प्रियतम आनंदघनं ह्येवं सर्वस्मात्पुर
तो विभातमेकमेवाजरममरममृतमभयं ब्रह्मैवाप्यजापूर्नेचैतत्पादं मात्राभिरोंकारे
णचैकीकुर्याज्जागरितस्थानश्चतुरात्मा विश्वो वैश्वानरश्चतूरूपोऽकार एव चतूरूपोऽयमकारः
स्थूलसूक्ष्मबीजसाक्षिभिरकाररूपैरामतेरादिमत्वाद्वा स्थूलत्वात्सूक्ष्मत्वाद्बीजत्वात्साक्षित्वा।

प्नोतिहवाइदंसर्वमादिश्चभवतियएवंवेदस्वप्नस्थानश्चैतन्यात्मातैजसोहिरण्यगर्भ
श्चतुरूपउकारएववचनरूपोस्यमुकारः स्थूलसूक्ष्मबीजसाक्षीभिरुकाररूपैरुत्कर्षा
दुभयत्वाद्वास्थूलत्वात्सूक्ष्मत्वाद्बीजत्वात्साक्षित्वाद्वोत्कर्षतिहवैज्ञानसन्ततिंसमानश्च
 भवतियएवंवेदसुषुप्तस्थानश्चैतन्यात्माप्राज्ञईश्वरस्सूतरूपोमकारएववचनरूपोस्य
 मकारः स्थूलसूक्ष्मबीजसाक्षिभिर्मकाररूपैर्मितेरपीतेर्वास्थूलत्वात्सूक्ष्मत्वाद्बीज।
त्वात्साक्षित्वाद्वामिनोतिहवाइदंसर्वमपीतिश्चभवतियएवंवेदमात्राःश्चपादश्चतुरी।
यईश्वरग्रासः स्वराट् स्वयमीश्वरः स्वप्रकाशश्चैतन्यात्मोतानुज्ञात्रनुज्ञाविकल्पैरोतोस्य।
यमात्मायथैतदंसर्वमन्तकालेकालाग्निः सूर्यस्त्रयीरनुज्ञातास्ययमात्माह्यस्यसर्वस्य।
स्वात्मानंददातियदिदंसर्वमिदंदर्शयतिस्वात्मानमेवकरोतियथातमः सविताऽनुज्ञैक
रसोस्यमात्माचिद्रूपएवयथादाह्यंदग्ध्वाग्निरविकल्पोस्यमात्मावाङ्मनोगोचरत्वा
च्चिद्रूपश्चरूप ॐकारएववचनरूपोस्यमोंकारः ओतानुज्ञात्रनुज्ञाविकल्पैरोंकाररू
पैरात्मैवनामरूपात्मकंबीजंसर्वंब्रह्मतुरीयत्वाच्चिद्रूपत्वाद्वाओतत्वादनुज्ञातृत्वादनु
ज्ञात्वादविकल्परूपत्वाद्वाऽविकल्परूपत्वाद्वाऽविकल्परूपत्वाद्वाऽविकल्परूपंहीदंस

वैनैवतत्रकाचनभिदास्त्यथतस्यायमादेशोमात्रश्चतुर्थोव्यवहार्यःप्रपंचोपशमःशिवो
द्वैतंॐकारआत्मैवसंविशत्यात्मनात्मानंयएवंवेदएषवीरोनारसिंहोनवानुष्टुभामंत्रराजेन
नतुरीयंविद्यात्सेषलात्मानंप्रकाशयतिसर्वसंहारसमर्थःपरिभवासहःप्रभुर्व्याप्तःसदोज्व
लोविद्यातत्कार्यहीनस्वात्मबंधहरःसर्वदाद्वैतरहितस्त्वानंदरूपःसर्वाधिष्ठानसन्मा
त्रोनिरस्ताविद्यातमोमोहोहमेवेतितस्मादेवमेवेममात्मानंपरंब्रह्मानुसंदध्यादे
षवीरोनारसिंहएव २ तस्यहवैप्रणवस्ययापूर्वामात्रासाप्रथमःपादोभवति द्विती
याद्वितीयस्यतृतीयातृतीयस्यचतुर्थीतावज्ञातानुज्ञाविकल्परूपातयातुरीयंचतु
रात्मानमन्विष्यचतुर्थपादेनचतयातुरीयेणानुचिंतयन्ग्रसेत तस्यहवाएतस्यप्र
णवस्ययापूर्वामात्रापृथिव्यकारःसऋग्भिःऋग्वेदोब्रह्मावसवोगायत्रीगार्हपत्यःसा
प्रथमःपादोभवतिभवतिचसर्वेषुपादेषुचतुरात्मास्थूलसूक्ष्मबीजसाक्षिभिस्तृती
याद्यौःसमकारःसाद्वितीयपादोभवतिभवतिचसर्वेषुपादेषुचतुरात्मास्थूलसूक्ष्मबी
जसाक्षिभिस्तृतीयायाद्यौःसमकारःससामभिःसामवेदोरुद्रादित्याजगत्याहवनीयसातृ
तीयःपादोभवतिभवतिचसर्वेषुपादेषुचतुरात्मास्थूलसूक्ष्मबीजसाक्षिभिर्यावसा

नेस्यचतुर्थीईमात्रासासोमलोकंॐकारःसोथर्वणोर्मंत्रैरथर्ववेदसंवर्तकोग्निर्मरुतो
विराडेकऋषिर्भास्वतीस्मृतासाचतुर्थःपादोभवतिभवतिचसर्वेषुपादेषुचतुरात्मा
स्थूलसूक्ष्मबीजसाक्षिभिर्मात्रामात्रापतिमात्रा [illegible]
उप·
४८
[illegible] क्षैतानानुज्ञात
नुज्ञाविकल्परूपंचिंतयन्ग्रसेत्ग्रसेत्तोमतऊतसेविकःस्वरूःसंविष्टोनिर्विघ्न
मिममसानिपमेनुभूपहीदेमवेदहासम्पपंचहीनोथसकलःसाधारोमतयस्त
रात्मासर्वमपश्यन्तरात्माथमहीपीठमपरिवारतमेतचतुःसमात्मानेचतुरात्मा
नेमूलाग्नावग्निरूपेप्रणवेसंदध्यात्समात्मानेचतुरात्मानयोकारब्रह्माणिनाभौ
समात्मानेचतुरात्मानमुकारंविष्णुहृदये समात्मानुचतुरात्मानमकारंरुद्रभ्रूम
ध्येसमात्मानेचतुःसमात्मानेचतुरात्मानमोंकारंसर्वेश्वरंद्वादशांतेसमात्मानेच
तुरात्मानचतुरात्मानमोंकारंसर्वेषांतेस्थानेदामतेनोनाश्रुतदीसुषुम्नातस्था
ब्राह्मणमेवविश्वमूर्तिरुद्रमेवविभक्ताहीनेवाविभक्तास्थानेवलिंगरूपानेवचसुष्ट
मोपसंहारंस्थानेदीपलिंगात्मकंहृत्पतेनमाप्तारीवत्रयामेव्यापनदर्पिष्टानमात्मानेस

ह्मात्मनेतेजसआत्मचैतन्यरूपंबलमवष्टभ्यतस्यगुणैरेकंसंपायमहास्थूलेमहास्थू
लेमहासूक्ष्मेमहासूक्ष्मेमहाकारणेचसंहृत्यमात्राभिरोतानुज्ञात्रनुज्ञाविकल्परूपंचि
न्तयन्ग्रसेत ॥ १ ॥ तेवाएतमात्मानंपरमंब्रह्मोंकारंतुरीयोंकाराग्रविद्योतमनुष्टुभानवाग्र
मायोमितिसंहृत्याहमित्यनुसंदध्यात् ॥ २ ॥ तमोवात्मानंपरंब्रह्मोंकारंतुरीयोंकाराग्रविद्यो
तमेकादशात्मानंनारसिंहानर्वामितिसंहृत्यानुसंदध्यात्तथैतमेवात्मानंपरमात्मानंप
रंब्रह्मोंकारंतुरीयोंकाराग्रविद्योतंप्रणवेनसंविदानुष्टुभासच्चिदानंदरूपात्मन
वात्मकंसच्चिदानंदरूपात्मानंपरमात्मानंब्रह्मसंभाव्याहमित्यात्मानमादायमनसा
ब्रह्मणैकीकुर्यादनुष्टुभैववाएषउग्रएवनृसिंहः सर्वत्रएषहिसर्वत्रसर्वदासर्वात्मासिं
होसौपरमेश्वरोसोहिसर्वत्रसर्वदासर्वात्मानसर्व मतिनृसिंहएवैककालएषतु
रीयएषह्येवोग्रएषएवभीषणएषएववीरएषएवमहानेषएषविष्णुरेषएवज्वलन्ते
एषएवसर्वतोमुखएषएवनृसिंहएषएवभीषणएषएवभद्रएषएवमृत्युमृत्युरेषए
वनमाम्येषएवाहमेवयोगारूढोब्रह्मण्येवानुष्टुभंसंदध्यादोंकारश्चेतितेनैतौसर्वात्मको
भवतः संस्फूर्यसिंहस्वरूपंतानशगाणाहीनंसंयोज्यस्फुरेनक्षभस्यहना यसास्फारेतो

ममंतौ निः पीयूषमेतं महत्पसिंहेन मयष एव वीरः । भूंगाष्ठोतानन्यदानन्तस्थूहनानानन्यदास्प
ष्टूहनानानन्यमनन्त्वेव नवाचवक्तुपारस्थूनृसिंहमूहभाकुस्वयमिति चतुर्थः खंडः॥
अथैष एव आकार आप्ततमार्थ आत्मैव नृसिंहो देवो ब्रह्म भवत्येष वा आप्ततमः एष हि सा
क्षी एष हीश्वरोऽनन्तः सर्वगतो न हीदं सर्वमेष हि व्याप्ततम इदं सर्वं यदयमात्मा मायामात्र
उप-
मेष एवात्मा एष एव वीर एष हि व्याप्ततम एष एव महान् एष हि व्याप्ततमः एष एव
५९
विष्णुरेष हि व्याप्ततम एष एव ज्वलन्नेष हि व्याप्ततम एष एव सर्वतोमुख एष एव हि व्याप्त
तम एष एव नृसिंह एष एव हि व्याप्ततम एष एव भीषण एष सर्वं हि व्याप्ततम एष ए
व भद्र एष एव हि व्याप्ततम एष एव मृत्युरेष हि व्याप्ततम एष एव नमाम्येष हि व्याप्तत
म आत्मैव नृसिंहो देवो ब्रह्म भवति य एवं वेद सोऽकामो निष्कामः आप्तकाम आत्मकामो
न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति अथैष एवोंकार उत्कृष्टतमा
र्थ आत्मैव नृसिंहो देवो ब्रह्म भवति तस्मादेष सत्यस्वरूपो न ह्यन्यदस्त्यमेयमनात्मप्रकाश
मेष हि स्वप्रकाशोऽसंगो ह्यन्यन्न वीक्षत आत्मा तेनान्यश्चप्राप्नि आत्ममात्रमेतदुत्कृष्ट एष एव वा
एष एवोत्कृष्ट एष एव वीर एष ह्येवोत्कृष्ट एष एव विष्णुरेष ह्येवोत्कृष्ट एष एव ज्वलन्नेष।

सेवोन्तर्हृदयएषएवमस्त्रमस्त्रेयेषेवोन्तर्हृदयएषसर्वतोमुखयएषयेवोन्तर्हृदयएवनृसिंहयएषयेवो
न्तर्हृदयएवभीषणायएषयेवोन्तर्हृदयएषएवभद्रयएषयेवोन्तर्हृदयएषएवनमाम्यएषयेवोन्तर्हृदयएष
एवाहमेषयेवोन्तर्हृदयतस्मादात्मानमेवैवंजानीयादात्मैवनृसिंहोदेवोब्रह्मभवतियएवंवेद
सोकामोनिःकामआत्मकामआप्तकाममेवनृसिंहदेवपरब्रह्माणिभवतिते तस्मादयमनेकोभि
न्नस्वरूपस्वप्रकाशोब्रह्मैवाप्यामतमउत्कृष्टतमएतदेवब्रह्माणिसर्वज्ञंमहामायंमहावि
भूत्यैतदेवोग्रमेतद्धिमहाविभूत्यैतदेववीरमेतद्धिमहाविभूत्यैतदेवविष्णुरेतद्धिमहाविभू
त्यैतदेवज्वलन्तमेतद्धिमहाविभूत्यैतदेवसर्वतोमुखमेतद्धिमहाविभूत्यैतदेवनृसिंहमेतद्धि
महाविभूत्यैतदेवभीषणमेतद्धिमहाविभूत्यैतदेवनमाम्येतद्धिमहाविभूत्यैतदेवाहमेतद्धि
महाविभूत्यैति तस्मादकारोकाराभ्यामिममात्मानमात्मतमउत्कृष्टतमंचिन्मात्रंसर्वद्रष्टा
रंसर्वसाक्षिणंसर्वग्रासंसर्वप्रियंमास्यदेसच्चिदानंदमात्रमकारंसपुरतोमात्मसर्वेभान्त
विभातमद्वितीयमात्मतमउत्कृष्टतमंचिन्मात्रंमहाविभूतिसच्चिदानंदमात्रमेकरसंपरमे
वब्रह्ममकारेणजानीयादात्मैवसमवनीयंतेनृसिंहोदेवःपरमेवब्रह्मभवतियएवंवेद

सोकामोनिष्कामआप्तकामआत्मकामोनतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंतेब्रह्मैवसन्ब्रह्मा
प्येतीतिहप्रजापतिरुवाच पंचमःखंडः ॥ तेदेवाइममात्मानंज्ञातुमैछंस्तान्हासुरःपाप्मापरिज
ग्रासतऐक्षंतहंतेनमासुरंपाप्मानंपरिजग्रसामइतितमेवोंकाराग्रवियोततुरीयमात्मानमुग्रमनु
ग्रंवीरमवीरंमहांतममहांतंविष्णुमविष्णुंज्वलंतमज्वलंतंसर्वतोमुखमसर्वतोमुखंनृसिंहमनृ
उप॰ सिंहंभीषणमभीषणंभद्रमभद्रंमृत्युमृत्युममृत्युमृत्युंनमाम्यहमनमाम्यहंनृसिंहानुष्टुभैवबुबुधिरेते
५॰ भ्योहासावासुरःपाप्मासच्चिदानंदघनंज्योतिरभवत्तस्मादपक्वकषायइममेवोंकाराग्रवियो
नृतापा तंतुरीयमात्मानंनृसिंहानुष्टुभैवंजानीयात्तस्यासुरःपाप्मासच्चिदानंदघनंज्योतिर्भवतिते
देवाज्योतिषमुत्तितीर्षवोहितोयादृश्यमेवपश्यंतइतिइममोंकाराग्रवियोततुरीयमात्मानंनृसि
हानुष्टुभान्विष्णुप्रणवेनैवतस्मिन्नवस्थितास्तेभ्यस्तज्ज्योतिर्यस्यसर्वस्यपुरतःसुविभातमविभातम
भातमद्वैतमचिंत्यमलिंगस्वप्रकाशमानंदघनंशून्यमभवद्देवविश्वप्रकाशपरमेवब्रह्मभवतिते
देवाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चससाधनेभ्योव्युत्थायनिरहंकारानिरागा
लिःपरिग्रहाशिखावोयज्ञोपवीतान्धाबधिरामुग्धाक्लीबामूकाउन्मत्ताइवपरिवर्तमानाःशांता
दांताउपरतास्तितिक्षवःसमाहिताआत्मरतयआत्मक्रीडआत्मक्रीडाआत्ममिथुनाआत्मानंदाःप्र

५॰

णमेव प्रणाममेवात्मप्रकाशं शून्यं जानं तत्त्वैव परं समाप्तमात्तस्माद्देवानां व्रतमाचरन्नोंका
रे परे ब्रह्मणि पर्यवसन्नो भवेत् स ह्यात्मनैवात्मानं परमं ब्रह्म पश्यते तदेष श्लोकः शृंगेषु शृंग
संयोज्य सिंहं शृंगेषु योजयेत् शृंगाभ्यां शृंगमाबध्य त्रयो देवा उपासते इति इति पंचमः खंडः
देवा ह वै प्रजापतिमब्रुवन्भूय एव नो भगवन्विज्ञापयत्विति तथेत्यजत्वादजरत्वादमृतत्वा
दभयत्वादशोकत्वादमोहत्वादनशनायत्वादपिपासत्वादद्वैतत्वाच्चाकारेणेममात्मानमन्वि
ष्योत्कृष्टत्वादुत्पादकत्वादुत्प्रविष्टत्वादुत्थापयितृत्वादुद्द्रष्टृत्वादुत्कर्तृत्वादुत्पथवारकत्वा
दुद्ग्रासकत्वादुत्तीर्णविकृतत्वाच्चोकारेणापरमं सिंहमन्विष्याकारेणेममात्मानमुकारेश्वरीद्द
माकृष्य सिंहीकृ सोत्तरार्द्धेन तं सिंहमाकृष्य महत्त्वान्मानत्वान्मुक्तत्वान्महादेवत्वान्महेश्वरत्वा
न्महासत्त्वान्महाचित्त्वान्महानंदत्वान्महाप्रभुत्वाच्च मकारार्द्धेनार्थेनात्मनैकीकुर्यादशरीरो निरिंद्रियोऽ
प्राणोऽतमाः सच्चिदानंदमात्रः स स्वराड् भवति य एवं वेद कस्त्वमित्यहमिति होवाचैवमेवेदंस
र्वं तस्मादहमिति सर्वाभिधानं तस्यादिरयमकारः स एव भवति सर्वं ह्ययमात्मा अयं हि सर्वांत
रो न हीदं सर्वं निरात्मकमात्मैवेदं सर्वं तस्मात्सर्वात्मकेनाकारेण सर्वात्मकमात्मानमन्विच्छेद्ब्रह्मै
वेदं सर्वं सच्चिदानंदरूपमिदं सर्वं सदिदं सर्वं तस्मात्सदिति चिदीदं सर्वं प्रकाशते प्रकाशते चेति।

किमद्वितीदमिदंनेत्यनुभूतिरितिकौषतीयमिदंनेत्येववचनेनैवानुभवेनवाचैवमेवचिदानं।
दावाप्रवच्यनेनैवानुभवेनुवाचसर्वमन्यदपिमपरमआनंदस्वरूपब्रह्मणोनामब्रह्मेतितस्मा
त्सोयमकारःसएवभवतितस्मान्मकारेणपरमेवब्रह्मणोन्विच्छेत्किमिदमेवमस्त्वित्येवाहावि
३५. चिकित्सेतत्तस्मादकारेणमात्मानमन्विष्यमकारेणब्रह्मणामेदध्यादुकारेणविचिकि
५८ त्सेनशरीरोनिरिंद्रियोप्राणेनमाःसच्चिदानंदमात्रःसस्वराड्भवतियएवंवेदकस्मिन्वाउदं
सर्वमस्तत्वादितिसततंरसेतत्ब्रह्मलोमस्तवाहीरवान्महत्वात्पुनःपुनःअहंत्वादितितस्माद
कारेणपरमंब्रह्मणोन्विष्यमकारेणमनआयतितावमनआदिमाद्विणाअन्विच्छेत्सयदेतत्स
र्वमुपेत्तेतेतदेतत्सर्वमास्मिन्प्रविशतिसयदाप्रबुध्यतेतदेतत्सर्वमस्मादेवोत्तिष्ठतिसएत
त्सर्वंनिशूल्यमस्त्प्राणमपीग्रसंज्ञात्स्यसंभूत्यात्मानमेषोददात्युग्रोतिवीरोतिमहानिति।
विलुरतिज्वलन्नतिसर्वतोमुखोतिनृसिंहोतिभीषणोतिभद्रोतिमृत्युमृत्युरतिनमाम्यहं
भूत्वास्वेमहिम्निसदासमास्तेतस्मादेवमकाराईनपरेणब्रह्मणोकीकुर्यादुकारेणविचि
कित्सन्नशरीरोनिरिंद्रियोप्राणेनमाःसच्चिदानंदमात्रःसस्वराड्भवतियएवंवेदकदैवस्मा
कः शृंगशृंगार्हमाकृष्यशृंगेणानेनयोजयेत् शृंगमेनपरेशृंगेनमनेनानुयोजयेत्।

सप्तमः खंडः ॥ अथ तुरीयेणोतश्च प्रोतश्च प्रोतश्चायमात्मा सिंहो ऽस्मिन्निदं सर्वमयं हि सर्वा
त्मायं हि सर्वमेवोता ह्ययमात्मैकल एव विकलो न हि वस्तु सदयं सोत ऊ वसद्ध्यनो यं चिद्घनं आ
नंदघन एकरसो ऽव्यवहार्यः केनचनाद्वितीय ओतश्च प्रोतश्चैष ओंकार एवं नैवमिति पृष्ट ओ
मित्येवाह वाग्वा ओंकारो वाग्येवेदं सर्वं न ह्यशब्दमिवेहास्ति चिन्मयो ह्ययमोंकारश्चिन्मयमिदं स
र्वं तस्मात्परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद
रहस्यमनुज्ञाता ह्ययमात्मा ह्येष सर्वस्य स्वात्मानमनुजानाति न हीदं सर्वं स्वत आत्मवत्त्वं
ह्ययमतो नानुज्ञाता सगत्वाद्विकारित्वादसत्वादन्यस्यानुज्ञाता ह्ययमोंकार ओमित्येषानुजा
नाति वाग्वा ओंकारो वाग्येवेदं सर्वमनुजानाति चिन्मयो ह्ययमोंकारश्चिद्धीदं सर्वं निरात्मक
मात्मसात्करोति तस्मात्परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं हि वै ब्रह्म भवेय
ह्येवं वेदेति रहस्यमनुज्ञैकरसो ह्ययमात्मा प्रज्ञानघन एवायं यस्मात्सर्वस्मात्पुरतः सुविभातो
तश्चिद्घन एव न ह्ययमोतो नानुज्ञात्मा हीदं सर्वं सद्धानुज्ञैकरसो ह्ययमोंकार ओमित्येवानु
जानाति वाग्वा ओंकारो वाग्येवैव ह्यनुज्ञानाति चिन्मयो ह्ययमोंकारश्चिदेव स ह्यनुजानाति तस्मा
त्परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रह

संग्रविकल्पात्प्रथमात्मा द्वितीयत्वाद्विकल्पो यः प्रथमोंकारो द्वितीयत्वादेव चिन्मयात्प्रथमों।
कारो द्वितीयत्वादेव चिन्मयात्सर्वयमोंकारो द्विकीरस्तत्वात्परमेश्वरयैवैकमेवनश्वरत्वात्निस्त्र
विकल्पोऽन्नाविकल्पोऽपिनात्रकाचनभिदास्तिनेवात्रकाचनाभिदास्त्युत्रभिदामिवमन्यमा
नः शतधासहस्रधावाभिन्नोमरत्याऽऽस्मुमामोनितिदतहृदये स्वप्रकाशमहानंदमात्मैवत
३५. ५२ दमृतमद्वयमेतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्य देवा ह वै प्रजा
पतिमब्रुवन्निममेव नो भगवन्नोंकारमात्मानमुपदिशेति तथेत्युपद्रष्टानुमंतैष आत्मा।
सिंहः क्षिप्रं इद्रूपवाविकारो ह्युपलब्धा सर्वत्र न ह्यस्तिद्वैतसिद्धिरात्मैव सिद्धो द्वितीयो माय
या ह्यसद्दिव सर्वाय षष्ठ्यमात्मा परयवै षे एव सर्वं तथा हि प्राज्ञः सैषा विद्या जगत्सर्वमात्मा पर
मात्मैव स्वप्रकाशोऽप्यविषयज्ञानत्वाज्ज्ञानत्वेनैवत्र नविजानात्यनुभूतेर्मायया च तमोरूपा।
नुभूतेस्तदेतज्जडं मोहात्मकमनंतमिदं रूपमस्यास्याभिव्यंजिकानित्यनिवृत्ताऽपि मू।
ढैरात्मैव दृष्टोऽस्यात्मत्वमसत्वेच दर्शयति सिद्धत्वासिद्धत्वाभ्यां स्वतंत्रास्वतंत्रत्वेन सैषा वट।
बीजसामान्यवदनेकवटशक्तिरेकैव तद्यथा वटस्य बीजसामान्यमेकमनेकान्स्वाव्यति
रिक्तान्स्वबीजाननुत्पाद्यतत्र तत्र च पूर्णास्तिष्ठत्येवमेवैषा माया स्वाव्यतिरिक्तानि पूर्णा

तिदेवाग्रणीदर्शीपितान्नीवेशावभासेनकोरोनिमापा[illegible]वाविद्याचवस्तुयेमेवभवतिमेवावि
द्यामहद्भावहंकारासयगुणाभिन्नोक्रेरवपिगुणाभिन्नोसर्वत्रव्रलविस्नुशिवरूपिणीचेत
सदीमानसादात्मसेवत्रैविथ्यंसर्वत्रयोनितमप्यभिमतानीवोनियंतस्वरःसर्वाहंमानी
हिरण्यगर्भस्त्रिरूपईश्वरवद्यात्मचैतन्यःसर्वगोहोषईस्वरःक्रियाज्ञानात्मासर्वसंवमयेस
र्वेजीवाःसर्वमयासर्वा

११०

न विस्मान्स्वविभानमहद्यं प्रश्नपतो रहे सः सोऽहमिति मह्रोवाच किं मे षट्शो दृष्टो वेत्ति दृष्टो विदि
ताविदितान्यर इति होचुः कैषा कथमिति होचुः किं नेनन किं चनेति होवाच ब्रह्मप्रमाणं यस्तु

तेवमहेशमिसर्वज्ञानीधंब्रूतेनमितित्ज्ञानोज्ञातश्चेतिहोचुर्नचैवमितिहोचुर्ब्रूतेचैनमात्मसि
द्धमितिहोवाचपषणमपवभगावन्नचवपंपश्यामो नैववन्नृशक्नुमोनमोस्तुभगवन्प्रसीदे
तिहोचुर्नेभेनवंप्रष्टव्यमितिहोवाचतेहोवानुज्ञेनमयवात्मेतिहोवाचतेहोचुर्नमस्तुभ्यंवयंन
इतिह प्रजापतिर्देवाननुशशासानुशशासेतितदेषश्लोकः ॐ नमान्तेनजानीषादत्र
ज्ञातारमोत्तरे प्रवृत्तामहदयेलब्ध्वाउपद्रष्टारमात्रजेदिमुपद्रष्टारमात्रजेदितिनवमः खं
डः ९ इतिश्रीअथर्ववेणीयेनृसिंहउत्तरतापनीयोपनिषत्समाप्ता २८
ॐ नमोथर्ववेदायश्रीरामभद्रसहायिणे ॐ चिन्मयेस्मिन्महाविष्णौजातेदशरथेहरौ
रघोः कुलेखिलंराति राजतेयोमहीस्थितः १ सरामइतिलोकेषुविद्वद्भिः प्रकटीकृतः
राक्षसायेनमरणंयांतिस्वोद्रेकतोथवा २ रामनामभुविख्यातमभिरामेणवापुनः रा
क्षसान्मर्त्यरूपेणराहुर्मनसिजंयथा ३ प्रभाहीनांस्तथाकृत्वाराज्यार्हाणांमहीभृतां धर्म
मार्गंचरित्रेणज्ञानमार्गंचनामतः ४ यथाध्यानेनवैराग्यमैश्वर्यंस्वस्यपूजनात् तथारामस्य
रामाख्याभुविस्यादथतत्वतः ५ रमंतेयोगिनोनंतेनित्यानंदेचिदात्मनि इतिरामपदेना
सौपरंब्रह्माभिधीयते ६ चिन्मयस्याद्वितीयस्यनिःकलस्याशरीरिणः उपासकानांकार्या

र्थं ब्रह्मणो रूपकल्पना ७ रूपस्थानां देवतानां पुंस्त्र्यंगास्त्रादिकल्पना द्विचत्वारिषडष्टानां
दशद्वादशषोडश ८ अष्टादशामी कथिता हस्ताः शंखादिभिर्युताः सहस्रांतास्तथा ता
सां वर्णवाहनकल्पना ९ शक्तिसेनाकल्पना च ब्रह्मण्येवं हि पंचधा कल्पितस्य शरीरस्य तस्य
उप॰ ५९ सेनादिकल्पना १० ब्रह्मादीनां वाचकोऽयं मंत्रोन्वर्थादिसंज्ञिकः जप्तव्यो मंत्रिणा नैवं विना दे
वः प्रसीदति ११ क्रियाकर्मेतिकर्तॄणां मंत्रमर्थं वदत्यथ मननात्त्राणनान्मंत्रः सर्ववाच्य
स्य वाचकः १२ सोऽभयस्यास्य देवस्य विग्रहो यंत्रकल्पना विना यंत्रेण चेत्पूजा देवता न प्रसी
दति १३ स्वभूर्ज्योतिर्मयोऽनंतरूपी स्वेनैव भासते जीवत्वेन समो यस्य सृष्टिस्थितिलयस्य च ९
कारणत्वेन चिन्मात्रा रजःसत्त्वतमोगुणैः यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः १५ तथै
व रामबीजस्थं जगदेतच्चराचरं रेफारूढा मूर्तयः स्युः शक्तयस्तिस्र एव चेति १६ सीतारा
मौ तन्मयावत्र पूज्यौ जातान्याभ्यां भुवनानि द्विसप्त स्थितानि च प्रहृतान्येव तेषु ततो रामो
मानवो मायया धात् १७ जगत्प्राणायात्मनेऽस्मै नमः स्यान्नमस्त्वैक्यं प्रवदेत्प्राग्गुणेने
ति जीववाची नमो नाम चात्मा रामेति गीयते तदात्मिका या चतुर्थी तथा चायेति कथ्य
ते मंत्रोऽयं वाचको रामो वाच्यः स्याद्योग एतयोः फलदश्चैव सर्वेषां साधकानां न संशयः

यथा नामी वाचकेन नाम्ना योऽभिमुखो भवेत् तथा बीजात्मको मंत्रो मंत्रिणोऽभिमुखो भवे
त् बीजशक्तिमेवेदं हृद्वामयोस्तनयोरपि कीलकमप्यविनाभाव्यस्वेच्छाविनियोगवान्
सर्वेषामेव मंत्राणामेष साधारणः क्रमः अत्र रामोऽनंतरूपस्तेजसा वह्निना समः सत्वगु नु
क्ष णगविशिष्टश्चेदग्नीषोमात्मकं जगत् उत्पन्नः सीतया भाति चंद्रश्चांद्रिकया यथा श्रद्धासा
सहितः श्यामः पीतवासा जटाधरः द्विभुजः कुंडली रत्नमाली धीरो धनुर्धरः प्रसन्नवद
नो जेता हस्याष्टकविभूषितः प्रकृत्या परमेश्वर्या जगद्योन्यांकितोऽकभृत् हेमाभया
द्विभुजया सर्वालंकृतया चिता श्लिष्टः कमलधारिण्या पुष्टः कोशलजात्मजः दक्षि
णे लक्ष्मणेनाथ सधनुः पाणिना पुनः हेमाभेनानुजेनैव तथा कोणत्रयं भवेत् तथै
व तस्य मंत्रस्य यस्याणुश्च स्वङेंतया एवं त्रिकोणरूपं स्यात्तं देवा ये समाययुः स्तुतिं चक्रु
श्च जगतः पतिं कल्पतरौ स्थितं कामरूपाय रामाय नमो मायामयाय च नमो वेदादि
रूपाय ओंकाराय नमो नमः रमाधराय रामाय श्रीरामायात्ममूर्तये जानकीदेहभूषाय र
क्षोघ्नाय शुभांगिने भद्राय रघुवीराय दशास्यांतकरूपिणे रामभद्र महेष्वास रघुवीर
नृपोत्तम भो दशास्यांतकास्माकं रक्षां देहि श्रियं च मे त्वमैश्वर्यं दापयाथ स्मयमानोऽभिमा

राणां कुर्वंतिस्तुमदेवायास्तेनसार्द्धंसुखवस्थिताः स्ववासेवेहिरक्षवः तदारावणञ्चासुरः रा रम
मपत्नीवनस्थांप्रयः स्वनिर्हृत्यर्थमादेदे मरावस्यउतिव्यातोयदारावाचरावणः तद्याजे
नेहितंसीतांरामोलक्ष्मणश्चवच विचेरतुस्तदाभूमौदेवीसंदृष्टपंचाप्सरा हत्वाकबंधंश
उ.म. वरीगत्वातस्याजयातया शूजितोवीरपुत्रेणभक्तेनचकपीश्वरे आहूयसंशतांसर्वमा
५५ येतेरामलक्ष्मणौ ४ ससरामेणशंकितः सनप्रत्ययार्थंचदुंदुभेः विग्रहंदर्शयामासपो
रामस्तमचिक्षिपत् समतालान्विभिद्याशुमोदतेराघवस्तया तेनहृष्टः कपींद्रोसौस
रामस्तस्यपत्तने जगामागर्जद्वगुजोवालिनोवेगतोग्रहात् वालीतदानिर्जगामसंतवालिन
मयाहवे निहत्यराघवोभ्राप्सुग्रीवस्यापयेत्ततः हरीनाहूयसुग्रीवस्त्वाहचाशाविदोयु
ली ता आदयमैथिलीमयदहनश्चाशुगच्छतां ततस्तताहनुमानवार्धिलंकांसमापयो सी
तां दृष्ट्वातराहत्वापुरंदग्ध्वातथास्वयं आगमद्रामायस्वयंनिवेदयतिततस्ततः तदारामः
कोपयन्कपीनाहूयाथवानरान् तैःसार्द्धमादायत्वच पुरीलंकांसमापयो तांदृष्ट्वातदधीशे
नसार्द्धंयुद्धमकारयत् हटश्चाग्रसमहस्ताहनिद्राप्रकेतमारवे हत्वाविभीषणानत्वस्याध्या
ययजनकात्मजां आदायांकथितांकृत्वास्वपुरेतेजगामसः ततःसिंहासनस्थः सन्नहिभुजो यु
२

नेदनः धनुर्धरः प्रसन्नात्मा सर्वाभरणभूषितः मुद्रां ज्ञानमयीं याम्ये वामे तेजःप्रकाशिनें धृ
त्वा व्याख्याननिरतश्चिन्मयः परमेश्वरः उदग्दक्षिणयोः स्वस्य शत्रुघ्नभरतौ धृतः हनुमन्तं च श्रो
तारमग्रतः स्यात्त्रिकोणगः भरताधस्तु सुग्रीवः शत्रुघ्नाधो विभीषणः पश्चिमे लक्ष्मणः धृत्वा धृतच्छा
त्रं सचामरं तदधस्तात्तालवृन्तकालौ वसुपुनर्भवेत् एवं षट्कोणमादौ स्वदीर्घाङ्गैरेष संयुतः
द्वितीयं वासुदेवाद्यैराग्नेयादिषु संयुतः तृतीयं वायुसूनुं च सुग्रीवं भरतं तथा विभीषणं लक्ष्मणं च
चाङ्गदं चारिमर्दनं जाम्बवन्तं च तैर्युक्तं ततो धृष्टिर्जयन्तकः विजयश्च सुराष्ट्रश्च राष्ट्रवर्धन एव
च अकोपो धर्मपालश्च सुमन्त्रैरेभिरावृतः ततः सहस्रदृग्वह्निर्धर्मज्ञो वरुणोऽनिलः इन्द्रेशधा
त्रनन्ताश्च दशभिस्त्वेभिरावृतः बहिस्तदायुधैः पूज्यो नीलादिभिरलंकृतः वसिष्ठवामदेवादि
मुनिभिः समुपासितः एवमुद्देशतः प्रोक्तो निर्देशस्तस्य चाधुना त्रिरेखापुटमालिख्य मध्ये ता
रद्वयं लिखेत् तन्मध्ये बीजमालिख्य तदधः साध्यमालिखेत् द्वितीयान्तं च तस्योर्ध्वं षष्ठ्यन्तं साध
कं तथा कुरुद्वयं च तत्पार्श्वे लिखेद्बीजान्तरे रमा तत्सर्वं प्रणवाभ्यां च वेष्टयेत्सुधीः वह्निमान् दी
र्घभाग्विसर्गेषु लिखेद्बीजान् कृदादिभिः कोणपार्श्वे रमामाये तदग्रेऽनङ्गमालिखेत् क्रोधं को
णाग्रान्तरेष्वालिखेन्मन्त्री ततो गिरः वृत्तत्रयं साष्टपत्रं सरोजे विलिखेत्स्वरान् केसरे चाष्टपत्रेणाच

वर्गाष्टकमथालिखेत् तेषुमालामनोर्वर्णान् विलिखेद्भूमिसंख्यया अंते पंचाक्षरानेवं षुनर्
ष्टदलेलिखेत् तेषु नारायणाष्टार्णं लिखेत् केसरे रमां तद्बहिर्द्वादशारे याने मो भग दले
विलिखेद्द्वादशाक्षरं तथा नमो भगवते वासुदेवाय अक्षरम् आदिहांता केसरेषु ष्टताकारण
३५. सलिखेत् तद्बहिः षोडशदले लिखेत् केसरे श्रियं वर्गाष्टकमतिमयुके दलेषु द्वादशाक्षरं त
५८ त्रिभिः स्वरादीनां मंत्रान्मंत्रीसमालिखेत् हसंम्बंधेनमूजस्य लिखेत्सम्यक् तत्तावद्बहिर्द्वावि
घारे महापमनाद्विंडसमायुते ५० विलिखेन्मंत्रराजाणान् तेषु पत्रेषु पत्रतः ध्यायेदष्ट
वसूनेकादश रुद्रांश्च तत्रवै ५१ द्वादशैनांश्चावालाग्वषट्कारांश्च तद्बहिः भूगृहं वज्रशूला त्रि
ष्टे रेखात्रयसमन्विते ५२ द्वारोपेते च राश्यादिभूषितं फणिसंयुते एवं मंडलमालिख्य तस्यादि
त्रिविद्धवे ५३ नारसिंहं च वाराहं लिखेन्मंत्रद्वयं तथा कूटरेफानुग्रहेन्दुनादशक्त्यादिभिर्युतः ५४
यो नृसिंहसमाख्यातो गृहमायांकमाति अस्याद्वीर्घायुतो विंदुनादबीजं च सोकरे ५५ क्रका
रेवात्तरामरसमालामेवायुंनेवितः नारानतिश्चरुद्राया स्मृतिर्मेदश्चकामिका ५६ हृद्रागा
सयुतावह्निमेधाम रविभूषिता दीर्घाकूरयुता क्लादिमयोदीर्घामममानुदा ५७ तथाक्रादि
नमोवाच विश्वमप्यथमधया श्रुक्रादीर्घोजालिनीच मस्तसामस्तरूपिणी ५८ सर्वसिध्या ५६

ह्लादिनी चक्रवेला शीतिस्थिता मरा ग्नोतिस्त्रीवामाग्निसंयुक्ता खेतोनुस्वारसंयुता ५९ कामिका
पंचमो लांतःस्थातोतो पातरस्तापि समानेनेदीर्घयुक्तो वायुःसक्षयुतो विषः ६० कामिका कामिका
हृद्युक्ता यो याथि स्थिरे ऋषा तापिनी दीर्घयुक्ता भरतिलोनंतगानलः ६१ नारायणात्मकः कालः
प्राणो भोविषपायुते पीतांवरनिलयालांतोयोमायुक्तोनंतोनंतिः ६२ समचतारिंशद्वर्णोयुणा
तः संप्रदृशास्वयं गुरुणाभिषिक्तस्यतस्यरामस्यात्तसमालिखेत् ६३ इदंसर्वात्मकं यंत्रं प्रागुक्तम
षिसेवितं सेवकानंमोक्षकारमायुरारोग्यवर्द्धनं ६४ अपुत्रिणां पुत्रदं च वह्निनामिमनेनवे प्रा
भुवं तिहृणात्सम्यक्चत्वर्धमादिकानपि ६५ इदंरहस्यं परमं मीभ्शोरणापिदुर्गमं एवं यंत्रं समा
ख्यातं तेनदेयं प्राकृते जनेश्रुति ६६ भूतादिकं शोधयेत्स्वारश्रुजोकृचापमायामस्यःप्रुसन्नः प्रा
कोविधावस्तु पीठाय वरोर्ह्णपार्श्वोर्चनेमध्यपपार्श्वेनेच ६७ कृतनामरुद्रसतालनलिकापारत्नास्वे
देशिकाचार्चयित्वा शक्तिं चाधाराद्येका कूर्मानागोश्रिधिसेजशस्रमनाथः प्रवालः विघ्नं दुर्गां क्षे
त्रपालं च वाणीं बीजादिकाश्चाग्निदेशादिकांश्च पीठस्योद्ध्वि विशुधर्मादिकांश्च नजश्र्वौ लोकनस्यादि
शर्वाये च मध्ये क्रमादर्कविध्वग्नितेजांस्यपर्युपर्युन्तमेरर्चितानि रजः सत्त्वं तमश्चपद्मानि शुक्लत्रयंबीजा
द्यं क्रमाद्भावयेच्च आत्माद्या शक्तयात्मानमंतरात्मानंचापरमात्मानमेवतः ज्ञानात्मानं च वपेत्तस्य

रिह्नमायाविधेयेकलापारतंत्रे संसृजयेद्विमलादींश्चशक्तीश्चार्चयेदेवमावाहयेच्च अंगाहू
हानिजलाद्यैश्चपूजयेद्धूपाद्यैर्दिक्लोकपालैस्तदस्त्रैः वशिष्ठाद्यैर्मुनिभिर्नीलमुख्यैराराधयेद्राघ
वंचंदनाद्यैः स्रगाद्युपहारैर्विविधैश्चपूजयेत्तस्मैजपादींश्चसम्यक्समर्प्य एवंभूतंजगदाधारभू
३५. तंरामंवंदेसच्चिदानंदरूपं गदादिशांगाब्जधरंभवारिं सयोध्यायेन्मोक्षमाप्नोतिसर्वं विश्व
५८ व्यापीराघवोयस्तदानीमंतर्दधेशंखचक्रेगदाब्जे धृत्वारमासहितः सानुजश्चसपत्तनः सा
नुजः सर्वलोकी तंभक्तायेलभ्यकामाश्चभुक्तातथायैदपरमंयातितेनच इमाऋचःसर्वा यः
कामार्थदाश्चयेतेपठंत्यमलायांतिमोक्षं येतेपठंत्यमलायांतिमोक्षमिति इत्याथर्वणीय
रामोत्तरतापनीयोपनिषत्समाप्तः २५ ॐ नमः सीतापतये बृहस्पतिरुवाचयाज्ञ
ध्यां ४ वल्क्यंयदनुकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनं अविमुक्तंवैकुरुक्षेत्रंदेवानांदे
वयजनंसर्वेषांभूतानांब्रह्मसदनंतस्माद्यत्रक्वचनगच्छतितदेवमन्येत इदमविमुक्तमेवइदंदेवा १
नांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमत्रहिजंतोः प्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्या
चष्टेयेनासावमृतीभूत्वामोक्षीभवतितस्मादविमुक्तमेवनिषेवेताविमुक्तंनविमु
चेदेवमेवैषभगवन्नितियाज्ञवल्क्यःप्रथमखंडः अथहैनंभरद्वाजःपप्रच्छयाज्ञवल्क्यंकिंतार

केकिंतारयतीति सहोवाचयाज्ञवल्क्यस्तारकंदीर्घानलंविंदुपूर्वकंदीर्घानलंपुनर्मायनमश्चं
द्रायनमोभद्रायनमइत्येतन्मंत्रब्रह्मात्मकाःसच्चिदानंदाख्याइत्युपासितव्यं अकारःप्रथमाक्षरो
भवत्युकारोद्वितीयाक्षरोभवतिमकारस्तृतीयाक्षरोभवत्यर्द्धमात्राश्चतुर्थाक्षरोभवतिविंदुःपं
चमाक्षरोभवतिनादःषष्ठाक्षरोभवतितारकत्वात्तारकोभवति तदेवतारकंब्रह्मत्वंविद्धि
तदेवोपास्यमितिज्ञेयं गर्भजन्मजरामरणसंसारमहद्भयात्संतारयतीतितस्मादुच्यतेतारक
मिति यएतत्तारकंब्राह्मणोनित्यमधीतेससर्वंपाप्मानंतरतिसमृत्युंतरतिसभ्रूणहत्यांतर
तिसब्रह्महत्यांतरतिसवीरहत्यांतरतिससर्वहत्यांतरतिससंसारंतरतिससर्वंतरतिसोविमु
क्तात्माश्रितोभवतिसब्रह्मभवतिसोमृतत्वंचगच्छति २ अथैतेश्लोकाभवंतिअकाराक्षरसंभू
तःसौमित्रिर्विश्वभावनःउकाराक्षरसंभूतःशत्रुघ्नस्तैजसात्मकःप्राज्ञात्मकस्तुभरतोमकारा
क्षरसंभवःअर्द्धमात्रात्मकोरामोब्रह्मानंदैकविग्रहःश्रीरामसान्निध्यवशाज्जगदानंददा
यिनी उत्पत्तिस्थितिसंहारकारिणीसर्वदेहिनां सासीताभवतिज्ञेयामूलप्रकृतिसंज्ञिताप्रण
वत्वात्प्रकृतिरितिवदंतिब्रह्मवादिनःइति ओमित्येतदक्षरमिदंसर्वंतस्योपव्याख्यानंभूतंभ
वद्भविष्यदितिसर्वमोंकारएवयच्चान्यत्त्रिकालातीतंतदप्योंकारएवसर्वंह्येतद्ब्रह्मायमात्मा

ब्रह्मसोयमात्मा चतुष्पाज्जागरितस्थानोबहिःप्रज्ञःसप्तांगएकोनविंशतिमुखःस्थूलभुग्वैश्वा
नरःप्रथमःपादःस्वप्नस्थानोंतःप्रज्ञःसप्तांगएकोनविंशतिमुखःप्रविविक्तभुक्तैजसोद्वि
तीयःपादःयत्रसुप्तोनकंचनकामंकामयतेनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतितत्सु
षुप्तंसुषुप्तस्थानएकीभूतःप्रज्ञानघनएवानंदमयोह्यानंदभुक्चेतोमुखःप्राज्ञस्तृतीय
पादःएषसर्वेश्वरएषसर्वज्ञएषोंतर्याम्येषयोनिःसर्वस्यप्रभवाप्ययौहिभूतानांनांतःप्रज्ञंनबहिः
प्रज्ञंनोभयतःप्रज्ञंनप्रज्ञंनाप्रज्ञंनप्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षण
मलिंगमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारंप्रपंचोपशमंशिवमद्वैतंचतुर्थंमन्यंतेसआ
त्माविज्ञेयःसदोज्ज्वलोविद्यातत्कार्यहीनःस्वात्मबंधहरःसर्वदाद्वैतरहितआनंदरूपःस
र्वाधिष्ठानःसन्मात्रोनिरस्ताविद्यातमोमोहोहमेवेतिसंभाव्याहमोंतत्सद्यत्परंब्रह्मरामचंद्र
श्चिदात्मकःसोहमोंतद्रामभद्रःपरंज्योतीरामोहमित्यात्मानमादायमनसाब्रह्मणैकीकुर्या
त् सदारामोहमस्मीतितत्त्वतःप्रवदंतियेनतेसंसारिणोनूनंरामएवनसंशयइत्युपनिषत्
यएवंवेदसमुक्तोभवतिसमुक्तोभवतीतियाज्ञवल्क्यः ३ अथहैनमत्रिःपप्रच्छयाज्ञवल्क्यं
यएषोनंतोव्यक्तआत्मातंकथमहंविजानीयादितिसहोवाचयाज्ञवल्क्यःसोविमुक्तउ

पास्यथ्यपविभागिनं दैकारसः चिदात्मा योयमनंतोव्यक्तआत्मा सोविमुक्तेप्रतिष्ठितइ
तिसोविमुक्तः कस्मिन्प्रतिष्ठितइतिवरणायांनास्यांमध्येप्रतिष्ठितइतिकावैवरणाका
चनासीतिसर्वानिंद्रियकृतान्दोषान्वारयतीतितेनवरणाभवतीतिसर्वानिंद्रियकृतान्पापा
न्नाशयतीतितेननासीभवतीतिकतमंचास्यस्थानंभवतीतिभ्रुवोर्घ्राणस्यचयः संधिः सए
षद्यौर्लोकस्यपरस्यचसंधिर्भवतीत्येतद्वैसंधिंसंध्यांब्रह्मविदउपासतइतिसोविमुक्तउपा
स्यइतिसोविमुक्तंज्ञानमाचष्टेयोवैतदेवंवेदार्थमपवाद्यरानंतोव्यक्तः व्यक्तापरिभागिनं दै
कारसश्चिदात्मायोयमविमुक्तेप्रतिष्ठितइत्यथ अमुवाच स्वयमेवयाज्ञवल्क्यः श्रीरामचंद्र
सामंतुकामपाजन्यापवृषभध्वजः मन्वंतरसहस्रैस्तुजपहोमार्चनादिभिः ततः प्रसन्नोभग
वान्श्रीरामःप्राहशंकरं वृणीष्वयदभीष्टंतद्दास्यामिपरमेश्वरेतिसहोवाच उमतः ससान
द चिदात्मा श्रीराममीश्वरः यप्रक्षमणिकर्णिकायांवाममक्षेत्रेगंगायांवातटेपुनः म्रियते
देहितज्जंतोर्मुक्तिर्नातोवरांतरमिति अथसहोवाच श्रीरामः क्षेत्रेत्रतवदेवेशयत्रकुत्रापि
वामृताः कृमिकीटादयोप्याशुमुक्ताः संतुनचान्यथा अविमुक्तेतवक्षेत्रेसर्वेषांमुक्तिसिद्ध
ये अहंसंनिहितस्तत्रपाषाणप्रतिमादिषु क्षेत्रेस्मिन्योर्चयेभक्त्यामंत्रेणानेनमामिवअलद

स्मादिपापेभ्योमोचयिष्यामिमाशुचः अतोवाब्रह्मणोवापियेलभंतेषडक्षरं जीवंतोमंत्रसिद्धाःमु
क्तामोक्षंयांतितेमुमूर्षोर्दक्षिणेयस्यकस्यापिवास्वयंउपदेक्ष्यसिमंत्रंसमुक्तोभवितांशिव इति
श्रीरामचंद्रोक्तंयेविमुक्तेपश्यंतिसज्जनास्तेनरतात्तदोषान्नाशयंतिच तस्थौ॥ ४ अथ हैनं
उप० भरद्वाजोयाज्ञवल्क्यमुवाचहकेमंत्रैःस्तुतःश्रीरामःप्रीतोभवतिस्वात्मानंदर्शयतितन्नो
५८ ब्रूहिभगवन्निति सहोवाचयाज्ञवल्क्यः श्रीरामेणाग्नेःशिक्षितोब्रह्मापुनरेतयागदयानम
स्करोति विश्वरूपधरंमहाविष्णुंनारायणमनामयंपूर्णानंदैकविज्ञानंपरंज्योतिःस्वरूपिणं
मनसासंस्मरन्ब्रह्मातुष्टावपरमेश्वरं योवैश्रीरामःसभगवानद्वैतपरमानंदात्माभूर्भु
वःस्वस्तस्मैनमोनमो १ योवैश्रीरामःसभगवान्यश्चाखंडैकरसोभूर्भुवःस्वस्तस्मैन
मोनमो २ योवैश्रीरामःसभगवान्यश्चब्रह्मानंदामृतंभूर्भुवःस्वस्तस्मैनमोनमो ३
स्मा योवैश्रीरामःसभगवान्यत्तारकंब्रह्मभूः ४ योवैश्रीरामःसभगवान्यसर्ववेदाःस
शाखाभूः ५ योवैश्रीरामःसभगवान्योजीवात्माभूः ६ योवैश्रीरामःसभगवान्स
भूतान्तरात्माभूः ७ ८ योवैश्रीरामःसभगवान्यदेवासुरमनुष्यादिभावाभूः ९ यो
वैश्रीरामःसभगवान्योमत्स्यकूर्माद्यवतारोभूः १० योवै० सर्वप्राणोभूः ११ ॐयोवै०

र्भुवःस्वस्तस्मैनमोनमो २

वेवृ सावि
सांगशाखा
यः सर्ववेदा
सांग य च
वैश्रीरामः
सभगवान्
५८

योंतःकरणचतुष्टयात्मा भूः॰ १२ ॐ यो वै॰ यश्च यमो भूः॰ १३ ॐ यो वै॰ यश्चांतको भूः॰ १४ ॐ यो वै॰
यश्च मृत्युर्भूः॰ १५ ॐ यो वै॰ यश्चामृतं भूः॰ १६ ॐ यो वै॰ यानि पंचमहाभूतानि भूः॰ १७ यो वै॰ यः स्था
वरजंगमात्मको भूः॰ १८ ॐ यो वै॰ यानि पंचाग्नयो भूः॰ १९ ॐ यो वै॰ याः सप्त व्याहृतयो भूः॰ २० ॐ
यो वै॰ या विद्या भूः॰ २१ ॐ यो वै॰ या सरस्वती भूः॰ २२ ॐ यो वै॰ या लक्ष्मी भूः॰ २३ यो वै॰ या गौरी
भूः २४ ॐ यो वै॰ या जानकी भूः॰ २५ ॐ यो वै॰ यच्च त्रैलोक्यं भूः॰ २६ ॐ यो वै॰ यः सूर्यो भूः॰ २७
ॐ यो वै॰ यः सोमो भूः॰ २८ ॐ यो वै॰ यानि नक्षत्राणि भूः॰ २९ ॐ यो वै॰ ये च नवग्रहा भूः॰ ३०
ॐ यो वै॰ ये चाष्टौ वसवो भूः॰ ३१ ॐ यो वै॰ ये चाष्टौ लोकपाला भूः॰ ३२ ॐ यो वै॰ ये चैकादश रु
द्रा भूः॰ ३३ ॐ यो वै॰ ये च द्वादशादित्या भूः॰ ३४ ॐ यो वै॰ यच्च भूतं भव्यं भविष्यद् भूः॰ ३५ ॐ यो वै॰ य
द्ब्रह्मांडस्यांतर्बहिर्व्याप्नोति यो वै विराड् भूः॰ ३६ ॐ यो वै॰ यो हिरण्यगर्भो भूः॰ ३७ यो वै॰
या प्रकृति भूः॰ ३८ ॐ यो वै॰ यश्चोंकारो भूः॰ ३९ ॐ यो वै॰ याश्चतस्रोर्धमात्रा भूः॰ ४० यो वै॰
यः परमपुरुषो भूः॰ ४१ यो वै॰ यश्च महेश्वरो भूः॰ ४२ ॐ यो वै॰ यश्च महादेवो भूः॰ ४३ ॐ यो
वै॰ ॐ नमो भगवते वासुदेवाय यो विष्णु भूः॰ ४४ ॐ यो वै॰ यः परमात्मा भूः॰ ४५ ॐ यो वै॰ यो ज्ञा
नात्मा भूः॰ ४६ ॐ यो वै॰ यः सच्चिदानंदैकरसात्मा भूः॰ ४७ ॐ इति प्रतान् ब्रह्मविन्मम चत्वारिं

शान्तमेत्रैर्णितं देवं ज्ञात्वेत्सुतो देवः प्रीतो भवति तस्मायराते मैत्रैर्णितं देवं स्तौति स देवं पश्यति
सोऽमृतत्वं च गच्छति सोऽमृतत्वं च गच्छति ५ इत्यथर्ववेदे मैत्रायणीयोपनिषत् समाप्ता ॥ कठवल्लीयं समा
प्ते ॥ ५८ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ तस्य ह नाचिकेता नाम पुत्र आस तं ह कुमा
रं सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः अनं
दा नामेते लोकास्तान्स गच्छति ते ददत् स होवाच पितरं तात कस्मै मां दास्यसीति द्वितीयं तृती
उप· ६· यं तं होवाच मृत्यवे त्वां ददामीति बहूनामेमि प्रथमो बहूनामेमि मध्यमः किंस्विद्यमस्य कर्त
व्यं यन्मयाद्य करिष्यतीति अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे सस्यमिव मर्त्यः पच्यते स
स्यमिव जायते पुनः वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् तस्यैतां शान्तिं कुर्वन्ति हर वै
वस्वतोदकं आशाप्रतीक्षे संगतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान् एतद्वृङ्क्ते पुरुषस्याल्पमे
धसो यस्यानश्नन्वसति ब्राह्मणो गृहे तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन् ब्रह्मन्नति
थिर्नमस्यः नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन्वरान् वृणीष्व शान्तसंकल्पः सुम
ना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं
वृणे यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः सुखं रात्रीः शयिता वीतमन्युः

६५

स्वोद्दर्शितवान्मृत्युस्स्वर्गलोकं स्वर्गे लोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति उभे
तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं
श्रद्दधानाय मह्यं स्वर्गलोका अमृतत्वं भजन्ते एतद्द्वितीयेन वृणे वरेण प्रतिब्रवीमि तदु मे नि
बोध स्वर्ग्यमग्निं नाचिकेतः प्रजानन् अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहा
यां लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा स चापि तत्प्रत्यवदद्यथोक्तम
थास्य मृत्युः पुनरेवाह तुष्टः तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः तवैव ना
म्ना भवितायमग्निः सृंकां चेमामनेकरूपां गृहाण त्रिणाचिकेतस्त्रिभिरेत्य संधिं त्रिकर्मकृत्तर
ति जन्ममृत्यू ब्रह्मयज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति त्रिणाचिकेतस्त्रयमे
तद्विदित्वा य एवं विद्वांश्चिनुते नाचिकेतं स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्व
र्गलोके एष तेऽग्निर्नाचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण एतमग्निं तवैव प्रवक्ष्यन्ति
जनासस्तृतीयं वरं नाचिकेतो वृणीष्व येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चै
के एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः देवैरत्रापि विचिकित्सितं पुरा न हि सु
विज्ञेयमणुरेष धर्मः अन्यं वरं नाचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनं २ देवै

उप-
६१

त्रापिविचिकित्सितंकिलत्वंचमृत्योयंनसुज्ञेयमात्थावक्ताचास्यत्वादृगन्योनलभ्योनान्योवर
स्तुल्यएतस्यकश्चित् शतायुषः पुत्रपौत्रान्वृणीष्वबहून्पशून्हस्तिहिरण्यमश्वान् भूमेर्म
हदायतनंवृणीष्वस्वयंचजीवशरदोयावदिछसि एततुल्यंयदिमन्यसेवरंवृणीष्ववित्तं
चिरंजीविकांच महाभूमौनाचिकेतस्त्वमेधिकामानांत्वाकामभाजंकरोमि येयेकामादुर्ल
भामर्त्यलोकेसर्वान्कामानुछंदतः प्रार्थयस्व इमारामाः सरथाः सतूर्यानहीदृशालंभनीया
मनुष्यैः आभिर्मत्प्रत्ताभिः परिचारयस्वनाचिकेतोमरणंमानुप्राक्षीः श्वोभावामर्त्यस्यय
दंतकैतत्सर्वेंद्रियाणांजरयंतितेजः अपिसर्वंजीवितमल्पमेवतवैववाहास्तवनृत्यगीते
नवित्तेनतर्पणीयोमनुष्योलप्स्यामहेवित्तमद्राक्ष्मचेत्त्वांजीविष्यामोयावदीशिष्यसित्वंवर
स्तुमेवरणीयः सएव अजीर्यतानाममृतानामुपेत्यजीर्यन्मर्त्यः क्वधःस्थः प्रजानन् अभि
ध्यायन्वर्णरतिप्रमोदानतिदीर्घेजीवितेकोरमेत यस्मिन्निदंविचिकित्संतिमृत्योयत्सांपरा
येमहतिब्रूहिनस्तत् योयंवरोगूढमनुप्रविष्टोनान्यंतस्मान्नाचिकेतावृणीते इतिप्रथमव
ल्ली अन्यछ्रेयोन्यदुतैवप्रेयस्तेउभेनानार्थेपुरुषंसिनीतः तयोः श्रेयआददानस्यसाधुभव
तिहीयतेर्थाद्यउप्रेयोवृणीते श्रेयश्चप्रेयश्चमनुष्यमेतस्तौसंपरीत्यविविनक्तिधीरः

श्रेयोहिधीरोअभिप्रेयसोवृणीतेप्रेयोमंदोयोगक्षेमाद्वृणीते सत्वंप्रियान्प्रियरूपां
श्चकामानभिध्यायन्नाचिकेतात्यस्राक्षीः नैतांसृंकांवित्तमयीमवाप्तोयस्यांमज्जंतिवहवो
वोमनुष्याः दूरमेतेविपरीतेविषूचीअविद्यायाचविद्येतिज्ञाताविद्याभीप्सितंनाचिकेतसंम
मेनत्वाकामावहवोलोलुपंतः अविद्यायामंतरेवर्त्तमानाः स्वयंधीराःपंडितंमन्यमानाः
दंद्रम्यमाणाःपरियंतिमूढाअंधेनैवनीयमानायथांधाःनसांपरायः प्रतिभातिबालंप्रमा
द्यंतंवित्तमोहेनमूढंअयंलोकोनास्तिपरइतिमानीपुनःपुनर्वशमापद्यतेमेश्रवणाया
पिवहुभिर्योनलभ्यः शृण्वंतोपिवहवोयंनविद्युः आश्चर्योस्यलब्धाआश्चर्योस्यज्ञाता
कुशलानुशिष्टः ननरेणावरेणप्रोक्तएषसुविज्ञेयोवहुधाचिंत्यमानः अनन्यप्रोक्तेगतिर
त्रनास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात् नैषातर्केणमतिरापनेयाप्रोक्तान्येनसुज्ञाना
यप्रेष्ठयांत्वमापःसत्यधृतिर्वतासित्वादृङ्नोभूयान्नाचिकेतःप्रष्टा जानाम्यहंशेवधिरित्य
नित्यंनह्यध्रुवैःप्राप्यतेहिध्रुवंतत्ततोमयानाचिकेतोत्यस्राक्षीः तंदुर्दर्शंगूढमनुप्रविष्टं
हि गुहाहितंगह्वरेष्ठंपुराणंअध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातिएतच्छ्रुत्वा
संपरिगृह्यमर्त्यः प्रवृह्यधर्म्यमणुमेतमाप्यसमोदतेमोदनीयंहिलब्ध्वाविवृतंसद्मनचिके

तं संभूतमेत्य अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्व
द सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं सं
ग्रहेण ब्रवीम्योमित्येतत् एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं एतद्ध्येवाक्षरं ज्ञात्वा यो य
दिच्छति तस्य तत् एतदालंबनं श्रेष्ठमेतदालंबनं परं एतदालंबनं ज्ञात्वा ब्रह्मलोके म
उप-
६२
हीयते न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् अजो नित्यः शाश्वतो
यं पुराणो न हन्यते हन्यमाने शरीरे हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं उभौ तौ न विजानी
तो नायं हंति न हन्यते अणोरणीयान्महतो महीयानात्मास्य जंतोर्निहितो गुहायां तमक्र
तुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः आसीनो दूरं व्रजति शयानो याति
सर्वतः कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महां
तं विभुमात्मानं मत्वा धीरो न शोचति नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रु
तेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां नाविरतो दुश्चरितान्ना
शांतो नासमाहितः नाशांतमानसो वापि प्रज्ञानेनैनमाप्नुयात् यस्य ब्रह्म च क्षत्रं च उभे भ
वत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः २५ इति द्वितीया वल्ली ऋतं पिबंतौ

सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिके
ताः यः सेतुरीजानानामक्षरं ब्रह्म यत्परं अभयं तितीर्षतां पारं नाचिकेतं शकेमहि आत्मानं
रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इंद्रियाणि हयानाहु
र्विषयांस्तेषु गोचरान् आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः यस्त्वविज्ञानवान्भव
त्ययुक्तेन मनसा सदा तस्येंद्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः यस्तु विज्ञानवान्भवति
युक्तेन मनसा सदा तस्येंद्रियाणि वश्यानि सदश्वा इव सारथेः यस्त्वविज्ञानवान्भवत्यम
नस्कः सदाशुचिः न स तत्पदमाप्नोति संसारं चाधिगच्छति यस्तु विज्ञानवान्भवति समनस्क
सदा शुचिः स तु तत्पदमाप्नोति यस्माद्भूयो न जायते विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः
सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदं इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु प
रा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा का
ष्ठा सा परा गतिः एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्म
दर्शिभिः यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छांत आ
त्मनि उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो

वदंति अशब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयत् अनाद्यनंतंमहतःपरंध्रुवं
निचाय्यतंमृत्युमुखात्प्रमुच्यते नाचिकेतमुपाख्यानंमृत्युप्रोक्तंसनातनं उक्त्वाश्रुत्वाचमेधा
वीब्रह्मलोकेमहीयते यइदंपरमंगुह्यंश्रावयेद्ब्रह्मसंसदि प्रयतःश्राद्धकालेवातदानंत्या
अथ॰ यकल्पतेतदानंत्यायकल्पतइति १८ इतितृतीयावल्ली अथर्ववेदोपनिषत्सुकठ
६१ वल्ल्याख्यायांपूर्ववल्लीसमाप्ता ॥ ॥ पराञ्चिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्प
श्यतिनांतरात्मन्कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् पराचःका
मानऩुयांतिबालास्तेमृत्योर्यांतिविततस्यपाशंअथधीराअमृतत्वंविदित्वाध्रुवमध्रुवेष्विह
नप्रार्थयंतेयेनरूपंरसंगंधंशब्दान्स्पर्शांश्चमैथुनान्एतेनैवविजानातिकिमत्रपरिशि
ष्यतेएतद्वैतत्स्वप्नांतंजागरितांतंचोभौयेनानुपश्यतिमहांतंविभुमात्मानंमत्वाधीरोन
शोचतियइदंमध्वदंवेदआत्मानंजीवमंतिकात् ईशानंभूतभव्यस्यनततोविजुगुप्सते
एतद्वैतत्यःपूर्वंतपसोजातमद्भ्यःपूर्वमजायतगुहांप्रविश्यतिष्ठंतंयोभूतेभिर्व्यपश्यत
एतद्वैतत् याप्राणेनसंभवत्यदितिर्देवतामयीगुहांप्रविश्यतिष्ठंतीयाभूतेभिर्व्यजा
यतएतद्वैतत् अरण्योर्निहितोजातवेदागर्भइवसुभृतोगर्भिणीभिःदिवेदिवईड्योजागृ ६१

वद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः एतद्वै तत् ॥ यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति तं देवाः सर्वे अर्पिता
स्तदु नात्येति कश्चन एतद्वै तत् ॥ यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृत्युमाप्नोति य इह नानेव
पश्यति ॥ मनसैवेदमाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥ अंगुष्ठमा
त्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत् ॥ यथोदकं दुर्गे
वृष्टं पर्वतेषु विधावति एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति ॥ यथोदकं शुद्धे शुद्धमासिक्तं ता
दृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतम ॥ चतुर्थवल्ली ४ ॥ पुरमेकादशद्वारमज
स्यावक्रचेतसः अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते एतद्वै तत् ॥ हंसः शुचिषद्वसुरन्तरिक्ष
सद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ ऊर्ध्वं
प्राणमुन्नयत्यपानं प्रत्यगस्यति मध्ये वामनमासीनं विश्वे देवा उपासते ॥ अस्य विस्रंसमानस्य शरी
रस्थस्य देहिनः देहाद्विमुच्यमानस्य किमत्र परिशिष्यते एतद्वै तत् ॥ न प्राणेन नापानेन मर्त्यो जीव
ति कश्चन इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं यथा
च मरणं प्राप्य आत्मा भवति गौतम ॥ योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः स्थाणुमन्येऽनुसंयन्ति यथा
कर्म यथाश्रुतं ॥ य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः तदेव शुक्रं तद्ब्रह्म तदेवामृतम

श्रुते तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वै तत् अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रति
रूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च वायुर्यथैको भुवनं प्रविष्टो रूपं
रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च सूर्यो यथा सर्वलोक
उप. स्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बा
५४ ह्यः एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां
शांति सुखं शाश्वतं नेतरेषां नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् तमात्म
स्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषां तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखं कथं नु
स्मृति तद्विजानीयां किमु भाति विभाति वा न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः त
मेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति पंचमी वल्ली ५ ऊर्ध्वमूलोऽवाक्शाख एषो
तं ऽश्वत्थः सनातनः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति
कश्चन एतद्वै तत् यदिदं किंच जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्वि
दुरमृतास्ते भवन्ति भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पं
चमः इह चेदशकद्बोद्धुं प्राक्शरीरस्य विस्रसः ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते यथा

तथागंधर्वलोकेछायातपयोरिवब्रह्मलोके इंद्रिया
णांपृथक्भावमुदयास्तमयौचयत्पृथग्उत्पद्यमानानांमत्वाधीरो ॥

दर्शेतथात्मनियथास्वप्नेतथापितृलोकेयथाप्सुपरीवदृशें नशोचति ॥ इंद्रियेभ्यःपरंमनोमन
सःसत्वमुत्तमंसत्वादधिमहानात्मामहतोव्यक्तमुत्तमं अव्यक्तात्तुपरःपुरुषोव्यापिकोलिंग
एवचयज्ज्ञात्वामुच्यतेजंतुरमृतत्वंचगच्छति ॥ नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिक
श्चनैनं हृदामनीषामनसाभिक्लृप्तोयएतद्विदुरमृतास्तेभवंति ॥ यदापंचावतिष्ठंतेज्ञानानि
मनसासहबुद्धिश्चनविचेष्टतेतमाहुःपरमांगतिं ॥ तांयोगमितिमन्यंतेस्थिरामिंद्रियधारणामप्र
मत्तस्तदाभवतियोगोहिप्रभवाप्ययौ ॥ नैववाचानमनसाप्राप्तुंशक्योनचक्षुषा अस्तीतिब्रुव
तोन्यत्रकथंतदुपलभ्यते ॥ अस्तीत्येवोपलब्धव्यस्तत्त्वभावेनचोभयोः अस्तीत्येवोपलब्धस्यतत्त्वभावः
प्रसीदति ॥ यदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुते ॥ यदा
५९ सर्वेप्रभिद्यंतेहृदयस्येहग्रंथयः अथमर्त्योमृतोभवत्येतावदनुशासनं ॥ शतंचैकाचहृदयस्य
३३ नाड्यस्तासांमूर्धानमभिनिःसृतैकातयोर्ध्वमायन्नमृतत्वमेतिविष्वङ्ङन्या उत्क्रमणेभवंति ॥ अं
गुष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसंनिविष्टः तंस्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां
धैर्येणतंविद्याच्छुक्रममृतंतंविद्याच्छुक्रममृतमिति ॥ मृत्युप्रोक्तांनाचिकेतोथलब्ध्वाविद्य
मेतांयोगविधिंचकृत्स्नंब्रह्मप्राप्तोविरजोभूद्विमृत्युरन्योप्येवंयोविदध्यात्ममेव ॥ सहनावव ॥

इंद्रिये
भ्यः पर
स्थिरां ॥

तु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्विनावधीतमस्तु मा विद्विषावहै शांतिः शांतिः शांतिः षष्ठी
वल्ली ६ इत्यथर्ववेदोपनिषत्सु कठवल्ल्याख्यायामुत्तरवल्ली समाप्ता ६ ॐ ब्रह्माप्यायंतेनैव संस्थविष
येषु समर्थमितिः वध्नाति भावनाभूयानरोनासोमयाईभः केनेषितं पतति मनः केन प्राणः प्रतियु
उप. क्तः केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो
६५ ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवंति न तत्र च
क्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात् अन्यदेव तद्विदितादथो
अविदितादधि इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्र
ह्म त्वं विद्धि नेदं यदिदमुपासते यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति तदेव ब्रह्म त्वं वि
द्धि नेदं यदिदमुपासते यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतं तदेव ब्रह्म त्वं विद्धि यदिद नेदं
मुपासते यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते प्र
थमः खंडः यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य च
देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितं नाहं मन्ये सुवेदेति नो न वेदेति वेद च यस्यामतं मतं तस्य मतं यस्य
न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां प्रतिबोधविदितं मतममृतत्वं हि विंदते आ

त्मनाविंदतेवीर्यंविद्ययाविंदतेमृतं॥इहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिःभूते
षुभूतेषुविचिंत्यधीराःप्रेत्यास्माल्लोकादमृताभवंति द्वितीयःखंडः २ ब्रह्महदेवेभ्योविजिग्येत ६
स्यहब्रह्मणोविजयेदेवाअमहीयंततऐक्षंतास्माकमेवायंविजयोस्माकमेवायंमहिमेतितेषां
विजज्ञौतेभ्योहप्रादुर्बभूवतन्नव्यजानंतकिमिदंयक्षमितितेग्निमब्रुवन्जातवेदएतद्धिकि जानीहि ४
मिदंयक्षमितितथेतितदभ्यद्रवत्तमभ्यवदत्कोसीत्यग्निर्वाअहमस्मीत्यब्रवीज्जातवेदाअहमस्मीति
तस्मिंस्त्वयिकिंवीर्यमित्यपीदंसर्वंदहेयंयदिदंपृथिव्यामितितस्मैतृणंनिदधावेतद्दहेति त
दुपप्रेयायसर्वजवेनतन्नशशाकदग्धुंसततएवनिववृतेनैतदशकंविज्ञातुंयदेतद्यक्षमिति
अथवायुमब्रुवन्वायवेतद्विजानीहिकिमिदंयक्षमितितथेतितदभ्यद्रवत्तमभ्यवदत्कोसीति
वायुर्वाअहमस्मीत्यब्रवीन्मातरिश्वावाअहमस्मीतितस्मिंस्त्वयिकिंवीर्यमित्यपीदंसर्वमाददीययदि
दंपृथिव्यामितितस्मैतृणंनिदधावेतदादत्स्वेतितदुपप्रेयायसर्वजवेनतन्नशशाकादातुंसततए ग्धु
वनिववृते नैतदशकंविज्ञातुंयदेतद्यक्षमितिअथेंद्रमब्रुवन्मघवन्नेतद्विजानीहिकिमिदंयक्षमिति
तथेतितदभ्यद्रवत्तस्मात्तिरोदधेसतस्मिन्नेवाकाशेस्त्रियमाजगामबहुशोभमानामुमांहैमव
तींतांहोवाचकिमेतद्यक्षमितिब्रह्मेतिहोवाचब्रह्मणोविजयेमहीयध्वमितिततोहैवविदां

चकारब्रह्मेतितस्माद्वाइंद्रोऽतितरामिवान्यान्देवान्सह्येनन्नेदिष्ठंपस्पर्शसह्येनत्प्रथमोवि
दांचकारब्रह्मेतितस्यैषआदेशोयदेतद्विद्युतोव्यद्युतदाइतीन्न्यमीमिषदाइत्यधिदैवतमथाध्या
त्मंयदेतद्गच्छतीवचमनोऽनेनचैतदुपस्मरत्यभीक्ष्णंसंकल्पस्तद्धतद्वनंनामतद्वनमित्युपासितव्यंसय
एतदेवंवेदाभिहैनंसर्वाणिभूतानिसंवाञ्छंत्युपनिषदंभोब्रूहीत्युक्तातउपनिषद्ब्राह्मींवाव
उप. ९९ तउपनिषदमब्रूमेतितस्यैतपोदमःकर्मेतिप्रतिष्ठावेदाःसर्वांगानिसत्यमायतनंयोवाएता
मुपनिषदंवेदापहत्यपाप्मानमनंतेस्वर्गेलोकेज्येयेप्रति तिष्ठतिप्रतितिष्ठतीति चतुर्थः
खंडः ४ इत्यथर्ववेदेकेनोपनिषत्समाप्ता १० ॐअथपुरुषोहवैनारायणोऽकामयतप्रजाः
सृजेयेतिनारायणात्प्राणोजायतेमनःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापःपृथिवीविश्वस्यधा
रिणीनारायणाद्ब्रह्माजायतेनारायणाद्रुद्रोजायतेनारायणाद्द्वादशादित्याःरुद्राःसर्वाःदेव
ताःसर्वाणिभूतानिनारायणादेवसमुत्पद्यंते नारायणेप्रलीयंतेनारायणेप्रलीयंते अथ
नित्योदेवएकोनारायणोब्रह्माचनारायणःशिवश्चनारायणः शक्रश्चनारायणः द्वादशा
दित्याश्चनारायणः वसवोऽश्विनौचनारायणः सर्वेऋषयोऽपिनारायणः कालश्चनाराय
णोदिशश्चनारायणोऽधश्चनारायणः ऊर्ध्वंचनारायणः मूर्तामूर्तंचनारायणोनद्वि
९९

श्च नारायणो नारायण एवेदं सर्वं यद्भूतं यच्च भव्यमथ नित्यो निष्कलंको निराख्यातो निर्वि
कल्पो निरंजनः शुद्धो देव एको नारायणो द्वितीयोऽस्ति कश्चिद्य एवं वेद स विष्णुरेव भवति
स विष्णुरेव भवति तद्दं समस्तमध्यिकृतामनः प्रयतवान् सुमान् प्राप्नोति परमं पारं विष्णोरव्य
पदमव्ययम् एतद्वै नारायणस्योपनिषदं यो ह वै नारायणस्योपनिषदमधीते स सर्वेभ्यः
पापेभ्यो विमुक्तो भवति स सर्वेभ्यो घोरेभ्यो विमुक्तो भवति स सर्वान् कामानाप्नोति स सर्वा
ल्लोकानाप्नोति ब्रह्महा गतास्मन्न मेव गच्छ स्मृतं त्वच गच्छतीत्योमित्येतदग्रे व्याहरेन्न
म इति पश्चान्नारायणायेत्युपरिष्टात् ॐमित्येकाक्षरं नम इति द्वे अक्षरे नारायणायेति प
ञ्चाक्षराणि एतद्वै नारायणस्याष्टाक्षरं पदं यो ह वै नारायणस्याष्टाक्षरं पदमधीते अनपब्रुवः सर्वमायुरे
त्येति विंदते प्राजापत्यं रायस्पोषं गौपत्यं ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुते प्रत्यगानंद
ब्रह्मपुरुषं प्रणवस्वरूपम् अकार उकारो मकार इति तानेकधा समभवत्तदेतदोमिति यमुक्त्वा
मुच्यते योगी जन्मसंसारबंधनात् ॐ नमो नारायणायेति मंत्रोपासको वैकुंठभवनं गमिष्यति
तदिदं पुंडरीकं विज्ञानघनं तस्मात्तडिदाभमात्रं ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूद
न इति सर्वभूतस्थमेकं नारायणं कारणरूपमकारं परं ब्रह्म ॐमित्येतदथर्वशिरो योऽधीते

उप.
६२

प्रातरधीयानोरात्रिकृतंपापंनाशयतिसायमधीयानोदिवसकृतंपापंनाशयतिमध्यं।
दिनमादित्याभिमुखोधीयानःपंचमहापातकोपपातकात्प्रमुच्यतेसर्ववेदपारायणल
भेतेनारायणसायुज्यमाप्नोतिनारायणसायुज्यमाप्नोति २ इतिनारायणोपनिषत्समा
मा १८

तेऽग्नोतिसृजं स्वं यस्मिन्लोके स्वहिते न तस्मिन्मां धेहि पवमानामृते लोके अक्षिते अमृते लो
क्षिते अमृतत्वं च गच्छति मृतत्वं च गच्छत्यनेन आत्मप्रबोधोपनिषदं मुहूर्तमुपासित्वा
न स पुनरावर्तते ॥ इत्यथर्ववेदे आत्मबोधोपनिषत्समाप्ता ॥ ८ ॥

३५·
६२

ॐ अंभस्यपारेभुवनस्यमध्येनाकस्यपृष्ठेमहतोमहीयान्शुक्रेणज्योतींषिसमनुप्रविष्टः
प्रजापतिश्चरतिगर्भेअंतः यस्मिन्निदंसंचविचैतिसर्वंयस्मिन्देवाअधिविश्वेनिषेदुः तदे
वभूतंतदुभव्यमाइदंतदक्षरेपरमेव्योमन् येनावृतंखंचदिवंमहींचयेनादित्यस्तप
तितेजसाभ्राजसाचयमंतःसमुद्रेकवयोवदंतितदक्षरेपरमेप्रजायतः प्रसूताजगतः
प्रसूता तोयेनजीवान्व्यससर्जभूम्यांयदोषधीभिःपुरुषान्पशूंश्चविवे
शभूतानि चराचराणि ४ अतःपरंनान्यदणीयसंहिप
रात्परंयन्महतोमहांतं यदेकमव्यक्तमनंतरूपंविश्वंपुराणंतमसःपरस्तात् ५ तदेव
र्तंतदुसत्यमाहुस्तदेवब्रह्मपरमंकवीनांइष्टापूर्तंबहुधाजातंजायमानंविश्वंबिभर्ति
भुवनस्यनाभिः ६ तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचंद्रमा तदेवशुक्रममृतंतद्ब्रह्मतदापः
सप्रजापतिः ७ सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधिकलामुहूर्ताःकाष्ठाश्चाहोरात्रा
श्चसर्वशः ८ अर्द्धमासामासाऋतवःसंवत्सरश्चकल्पंतांसआपःप्रदुघेउभेइमेअंतरिक्ष
मथोसुवः ९ नैनमूर्द्धंनतिर्यंचंनमध्येपरिजग्रभत् नतस्येशेकश्चनतस्यनाममहद्यशः
नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चिनैनं हृदामनीषामनसाभिक्लृप्तोयएन

नेहिदुग्ममतास्तेभवंति ॥ अद्भ्यःसंभूतोहिरण्यगर्भ उत्यष्टौ एषहिदेवप्रदिशोनुसर्वाःपूर्वोहि
जातः सउगर्भेअंतः सविजायमानःसजनिष्यमाणःप्रत्यङ्स्तिष्ठतिविश्वतोमुखः
विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोहस्तउतविश्वतस्पात् संबाहुभ्यांधमतिसंपतत्रै
द्यावाभूमीजनयन्देवएक वेनस्तत्पश्यन्विश्वाभुवनानिविद्वान् यत्रविश्वंभवत्येकनी
डंयस्मिन्निदंसंचविचैकंसओतः प्रोतश्चविभुःप्रजासुतद्वोचोअमृतंनविद्वान्गंधर्वोनाम
निहितंगुहासुत्रीणिपदानिहितागुहासुयस्तद्वेदसपितुःपितासत् सनोबंधुर्जनितास
विधाताधामानिवेदभुवनानिविश्वा यत्रदेवाअमृतमानशानास्तृतीयेधामान्यभ्यैरयंतःप
रिद्यावापृथिवीयंतिसद्यःपरिलोकान्परिदिशःपरिस्वः ऋतस्यतंतुंविततंविचृत्यतदपश्य
तदभवत्प्रजासु परीत्यलोकान्परीत्यभूतानिपरीत्यसर्वाःप्रदिशोदिशश्चप्रजापतिःप्रथ
मजाऋतस्यात्म[illegible]नात्मानमभिसंबभूवसदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यंसनिंमे
धामयासिषं उदीप्यस्वजातवेदोपघ्नन्निरृतिंमम पशूंश्चमह्यमावहजीवनंचदिशोद
श ॥ मानोहिंसीज्जातवेदोगामश्वंपुरुषंजगत् अबिभ्रदग्नआगहिश्रियामापरिपातय २
पुरुषस्यविद्महेसहस्राक्षस्यमहादेवस्यधीमहितन्नोरुद्रःप्रचोदयात् ॐतत्पुरुषायविद्म

हेमहादेवायधीमहितन्नोरुद्रप्रचोदयात् ॐतत्पुरुषायविद्महेनंदिकेश्वरायधीमहितन्नोवृ
षभःप्रचोदयात् ॐपावमानायविद्महेमहासेनायधीमहितन्नःषष्टःप्रचोदयात् पावका
यविद्महेसप्तजिह्वायधीमहितन्नोवैश्वानरःप्रचोदयात् वैश्वानरायविद्महेलालीलाय
उप. धीमहितन्नोअग्निःप्रचोदयात् भास्करायविद्महेदिवाकरायधीमहितन्नःसूर्यःप्रचोदया
६४ त् दिवाकरायविद्महेसहस्रकिरणायधीमहितन्नःआदित्यःप्रचोदयात् आदित्यायवि
द्महेसहस्रकिरणायधीमहितन्नोभानुःप्रचोदयात् तीक्ष्णशृंगायविद्महेवक्रपादायधी
महितन्नोवृषभःप्रचोदयात् नृसिंहायविद्महेवज्रनखायधीमहितन्नःसिंहःप्रचोदया
त् चतुर्भुजायविद्महेकमंडलुधरायधीमहितन्नोब्रह्माप्रचोदयात् महाशूलिन्यैविद्म
हेमहादुर्गायैधीमहितन्नोभगवतीप्रचोदयात् सुभगायैविद्महेकाममालिन्यैधीमहि
तन्नोगौरीप्रचोदयात् तत्पुरुषायविद्महेवक्रतुंडायधीमहितन्नोदंतीप्रचोदयात् नारा
यणाय तत्पुरुषायविद्महेसुवर्णपक्षायधीमहितन्नोविष्णुःप्रचोदयात् कात्यायन्यैवि
द्महेकन्यकुमार्यैधीमहितन्नोदुर्गाप्रचोदयात् २ सहस्रपरमादेवीशतमूलाशतांकुरा
सर्वंहरतुमेपापंदूर्वादुःस्वप्ननाशिनी सर्वाग्रमनसंभूतामातमूलाशतांकुरा शतेमे

मृतिपापानिशान्तमायुर्विवर्द्धते कोऽहं कोऽहं त्वरोद्दन्ती पुरुषः पुरुषस्यानि पवानो दुर्वृत्ता
नुसदस्येणशनेनच ब्रह्मघ्नोत्तेरथघ्नोत्ते विलघ्नोत्ते वृसतयेश्शिशमाधारितादेविरदंतस्य
पेदपेदे उद्धृतासिवराहेण कृष्णेन शतवाहुना भूमिधेनुहरेगेञ्जायरिणी लोकधारिणी ते
नयाग्नलदत्तासिकाश्यपेनाभिता मृत्तिकेहरतेपापंयन्मयादुःकृतेकृते नयाहतेन
पापेनजीवामिशरदेशते वाचाकृतेकर्मकृतेमनसादुर्विचिंतिते नयाहते नपापेनग
च्छामिपरमांगतिं मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वप्रतिष्ठितं गंधद्वारां दुराधर्षां नित्यपुष्टां
करीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं गेमलक्ष्मीर्भुवलेक्ष्मीःस्ववकालकर्णी
तन्नोमहालक्ष्मीप्रचोदयात पद्मपत्रेपद्मसुंदरि उमेभ्यपयेस्वाहा हिरण्यश्रृंगंवरुणंप्रप
द्येतीर्थमेदेहियाचितः यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः यन्मेमनसावाचाकर्म
णावादुःकृतंकृतं तन्मेइंद्रोवरुणोबृहस्पतिसविताचपुनंतुपुनः पुनः स्तामित्रश्च न आ
पर्नेषधयःसंतुदुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मः नमोग्नयेप्सुमतेनमइंद्रा
यनमोवरुणायनमोवरुण्यैनमोद्भ्योयदपांक्रूरंयदमेध्यंयदशांतं तदपगच्छतात ५ अ
त्यशनादतिपानाद्यच्चउग्रात्प्रतिग्रहात् तन्मेवरुणोराजापाणिनाह्यवमर्शतु सोहमपा

३५.
७०

योविरजोनिर्मुक्तोमुक्तकिल्बिषः नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां इमंमेगंगेयमुनेसर
स्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या असिक्न्यामरुत्सगच्छेद्ब्रह्मवृधेवितस्तयार्जीकीयेशृणुह्या
सुषोमया ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ततोरात्र्यजायत ततः समुद्रोअर्णवः समुद्रा
दर्णवादधिसंवत्सरोअजायत अहोरात्राणिविदधद्विश्वस्यमिषतोवशी सूर्याचंद्रमसौधाताय
थापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः यत्पृथिव्यांरजस्वमांतरिक्षेविरोदसी
इमांस्तदापोवरुणःपुनात्वघमर्षणः एषसर्वस्यभूतस्यभव्येभुवनस्यगोप्ता एषपुण्यकृतां
लोकानेषमृत्योर्हिरण्मयः द्यावापृथिव्योर्हिरण्मयंसंश्रितंस्वः सनःसंशिशाधि आर्द्रंज्वल
तिज्योतिरहमस्मिज्योतिर्ज्वलतिब्रह्माहमस्मियोहमस्मिब्रह्माहमस्मि अहमेवाहंमांजुहो
मिस्वाहा अकार्यकार्यवकीर्णीस्तेनोभ्रूणहागुरुतल्पगः वरुणोपामघमर्षणस्तस्मात्पा
पात्प्रमुच्यते रजोभूमिस्त्वमांरोदयस्वप्रवदंतिधीराः पुनंतुऋषयः पुनंतुवसवः पुनातुव
रुणः पुनात्वघमर्षणः ५ ऋतान्समुद्रःप्रथमेविधर्मन्जनयत्प्रजाभुवनस्यराजा वृषापा
वित्रेअधिसानोअव्येबृहत्सोमोवावृधेस्वानोअद्रिः जातवेदसेसुनवामसोममरातीयतोनिदहा
तिवेदः सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः तामग्निवर्णांतपसाज्वलंतीं

वैरोचनीं कर्मफलेषु जुष्टां दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ अग्ने त्वं पारया नव्यो
अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानि
नो दुर्गहा जातवेदः सिंधुं न नावा दुरितातिपर्षि ॥ अग्ने अत्रिवन्नमसा गृणानोऽस्माकं बोध्यविता
तनूनाम् ॥ पृतनाजितं सहमानमग्निमुग्रं हुवेम परमात्सधस्थात् ॥ स नः पर्षदति दुर्गाणि विश्वा क्षामद्
देवोऽति दुरितात्यग्निः ॥ प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ॥ स्वां चाग्ने तन्वं पिप्रयस्वा
स्मभ्यं च सौभगमायजस्व ॥ प्रथमानुवाकः ॥ १ ॥ परमात्मा सर्वशरीरस्य मम सर्वपापरहितस्य धीमहि शा
न्तवाक् नास्य न रजाः यत स्वो राजा सर्वस्या चीर्णाश्च भूस्त्वं पृथिव्यै स्वाहा ॥ ओं भुवो वायवे अंतरि
क्षाय स्वाहा ॥ ओं स्वरादित्याय दिवे च स्वाहा ॥ भूर्भुवः स्वरित्रं चंद्रमसे दिग्भ्यः स्वाहा ॥ नमो देवेभ्यः स्वधा
स्वरो भूरग्नि पितृभ्यो भूर्भुवः स्वर्महरोम् ॥ याहिनो अग्नये नमो स्वाहा ॥ याहिनो विश्वेदेवेभ्यः स्वाहा ॥ यत्ते पाहि विभा
वसो स्वाहा ॥ सर्वं भावशात कृतो स्वाहा ॥ यः छंदसामृषभो विश्वरूपः छंदोभ्यः छंदांस्याविवेश स
तो सकाः शाखाचापनिषदि श्रुतो मेष्ट इंद्र प्रज्ञाभ्यो नमो देवेभ्यः स्वधा पितृभ्यो नमो देवेभ्यः स्वधा
पितृभ्यो भूर्भुवः स्वः छंद ओं नमो ब्रह्मणो धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयो
श्रुतं मा च्योढ्वं ममामुष्य ओं ॥ २ ॥ कृतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो यज्ञस्तपो ब्रह्म भूर्भुवः

स्वरो भूरग्नि देवपश्चि ये च महते स्वाहा ॥ देवा वदे वा तरिक्षा व च महते स्वाहा

स्वाहा स्वर द्रव्यमादित्याय पश्चिदेवचमहतेव स्वाहा ॥ ६ २६

सर्वं ह्येतत्पुरुषस्तैततनुः यथा वृक्षस्य संपुष्पितस्य दूराद्गंधोवात्येवंपुण्यस्यकर्मणोदूराद्गंधो
वाति यथासिधारांकर्तेवहितामवक्रामेयद्युवेह्वावाविह्वलिष्यामिकर्तेपतिष्यामिएवम॰
नृतादात्मानंजुगुप्सेत अणोरणीयान्महतोमहीयानात्मागुहायांनिहितोस्यजंतोः तमक्रतुं
उप. पश्यतिवीतशोकोधातुःप्रसादान्महिमानमीशं सप्तप्राणाःप्रभवंतितस्मात्सप्तार्चिषःस॰
मिधःसप्तजिह्वाःसप्तइमेलोकायेषुचरंतिप्राणागुहाशयानिहिताःसप्तसप्त अतःसमु
७१ द्रागिरयश्चसर्वेस्मात्स्यंदंतेसिंधवःसर्वरूपाःअतश्चसर्वाओषधयोरसश्चयेनैषभूतस्ति
६ ष्ठतेह्यंतरात्मा ८ ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणांमहिषोमृगाणां श्येनोगृ
ध्राणांस्वधितिर्वनानांसोमः पवित्रमत्येतिरेभन् अजामेकांलोहितशुक्लकृष्णांबह्वींप्रजांज
नयंतींसरूपां अजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यः हंसःशुचिषद्वसु
रंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजा
ऋतंबृहत् यस्माज्जातंपरोअन्योअस्तियआविवेशभुवनानिविश्वाप्रजापतिःप्रजयासं॰
विदानस्त्रीणिज्योतींषिसचतेसषोडशी विधर्तारंहवामहेवसोः कुविद्वनातिनः सविता
रंनृचक्षसं अद्यानोदेवसवितःप्रजावत्सावीःसौभगं परादुःष्वप्न्यंसुव विश्वानिदेवसवि
७१

तईविनानिपरामस्वयमृदेनतत्रआसव मधुवाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्नःसं
त्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनः पिता मधुमान्नोवनस्पतिर्मधु
मां अस्तुसूर्यः माध्वीर्गावोभवंतुनः घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतमस्यधाम अनु
ष्वधमावह मादयस्वस्वाहाकृतंवृषभवक्षिहव्यं समुद्रादूर्मिर्मधुमांउदारदुपांशुनासम
मृतत्वमानट् घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः वयंनामप्रब्रवामा
घृतस्यास्मिन् यज्ञेधारयामानमोभिः उपब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौर
एतत् चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीति
महोदेवोमर्त्यांआविवेश त्रिधाहितंपणिभिर्गुह्यमानंगवि देवासोघृतमन्वविंदन् इंद्रएकं
सूर्यएकंजजानवेनादेकंस्वधयानिष्टतक्षुः योदेवानांप्रथमंपुरस्ताद्विश्वाधिकोरुद्रोमह
र्षिः हिरण्यगर्भंपश्यतजायमानं सनोदेवः शुभयास्मृत्यासंयुनक्तु यस्मात्परंनापरमस्ति
किंचिद्यस्मान्नाणीयोनज्यायोस्तिकिंचित् वृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषे
णसर्वं नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः परेणनाकंनिहितंगुहायांवि
भ्राजतेयद्यतयोविशंति वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयःशुद्धसत्वाः ते

३५.
७२
ब्रह्मलोकेषुपरांतकालेपरामृताःपरिमुच्यंतिसर्वेंदहरंविपापंवेश्मभूतंयत्पुंडरीकंपुरमध्य
संस्थं तत्रापिदहरंगगनंविशोकस्तस्मिन्यदंतस्तदुपासितव्यं योवेदादौस्वरःप्रोक्तोवेदांतेच
प्रतिष्ठितः तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरः १० अजोन्यःसुविभाविश्वनाभिःसर्वेस्य
वयेनिच सहस्रशीर्षंदेवंविश्वाक्ष्योपदमव्ययं विश्वंनारायणंदेवमक्षरंपरमंविभुं वि
श्वतःपरमंनित्यंविश्वंनारायणंहरिं विश्वमेवेदंपुरुषस्तद्विश्वमुपजीवति पतिंविश्व
स्यात्मेश्वरंशाश्वतंशिवमच्युतंनारायणंमहाज्ञेयंविश्वात्मानंपरायणंनारायणं[illegible]
परंब्रह्मतत्त्वंनारायणःपरः नारायणःपरोज्योतिरात्मानारायणःपरः नारायणःपरोध्या
ताध्याननारायणःपरः परादपिपरश्चासौतस्माद्यस्तुपरात्परः यच्चकिंचिज्जगत्यस्मिन्
दृश्यतेश्रूयतेपिच अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः अनंतमव्ययंकविंसमु
द्रेंतंविश्वशंभवं पद्मकोशप्रतीकाशंहृदयंचाप्यधोमुखं अधोनिष्ठ्यावितस्त्यांतेनाभ्या
मुपरितिष्ठति हृदयंतद्विजानीयाद्विश्वस्यायतनंमहत् संततंशिराभिस्तुलंबत्याकोश
संनिभं तस्यांतेसुषिरंसूक्ष्मंतस्मिन्सर्वंप्रतिष्ठितं तस्यमध्येमहानग्निर्विश्वार्चिर्विश्वतोमु
खः सोग्रभुग्विभजंतिष्ठन्नाहारमजरःकविः संतापयतिस्वंदेहमापादतलमस्तके त
७२

समध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता: नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा नीवार
शूकवत्तन्वी पीता भास्वत्यणूपमा तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः स ब्रह्मा स शि
वः स हरिः सेंद्रः सोऽक्षरः परमः स्वराट् ११ धतो योगाज्जिह्वाममभुवादिनो ब्रह्मैव कालो नारका
लसन्नारायणात्स्थितो व्यवस्थितवनारिव ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ऊर्ध्वरेतं वि
रूपाक्षं विश्वरूपाय वै नमः आदित्यो वा एष एतन्मंडलं तपति तत्र ता ऋचस्तदृचां मंडलं स
ऋचां लोकेथ य एष एतस्मिन्मंडलेर्चिषि पुरुषस्तानि यजूंषि स यजुषां मंडलं स यजुषां लो
कोथ य एष एतस्मिन्मंडले र्चिर्दीप्यते तानि सामानि स साम्नां मंडलं स साम्नां लोकः सैषा त्रय्येव
विद्या तपति य एषोंतरादित्ये हिरण्मयः पुरुषः आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्र
मात्मा मनो मन्युर्मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालः किं तत्सत्यमन्नमामृ
तो जीवो विश्वः कतमः स्वयंभूः प्रजापतिः संवत्सर इति संवत्सरोसावादित्यो य एष पुरुष
एष भूतानामधिपतिर्ब्रह्मणः सायुज्यं सलोकतामाप्नोत्येतासामेव देवतानां सायुज्यं सार्ष्टि
तां समानलोकतामाप्नोति य एवं वेदेत्युपनिषत् ॥ ❁ अथर्ववेदे बृहन्नारायणोपनि
षत्समाप्ता ३९ ॐ घृणिः सूर्य आदित्यमर्चयंति तपः सत्यं मधु क्षरंति तद्ब्रह्म तदाप ।

आपोज्योतिरसोमृतंब्रह्मभूर्भुवःस्वरोंसर्वोवैरुद्रस्तस्मैरुद्रायनमोअस्तुपुरुषोवैरुद्रःसन्महोन
मोनमः विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत् सर्वोह्येषरुद्रस्तस्मैरुद्रायन
मोअस्तु कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसेवोचेमशंतमोहृदि सर्वोह्येषरुद्रस्तस्मैरुद्रायन
मोअस्तु नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्यरूपायहिरण्यपतयेअंबिकापतयेउमाप
३५. तयेनमोनमः यस्यवैकंकत्यग्निहोत्राहवणीयोभवतिप्रतिष्ठितः प्रत्येवास्याहुतयस्ति
७२ ष्ठन्त्यथोप्रतिष्ठित्यै कृणुष्वपाजइतिपंच अदितिर्देवागंधर्वामनुष्याःपितरोसुरास्तेषांस
र्वभूतानांमातामेदिनीपृथिवीमहतीमहीसावित्रीगायत्रीजगत्युर्वीपृथ्वीबहुलावि
श्वाभूताकतमाकायासासत्यामृतेतिवसिष्ठः ११ आपोवाइदंसर्वंविश्वाभूतान्यापःप्रा
णावाआपःपशवआपोन्नमापोमृतमापःसम्राडापोविराडापःस्वराडापःछंदांस्यापोज्यो
तींष्यापोयजूंष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःस्वरापओं आपःपुनंतुपृथिवीं
पृथिवीपूतापुनातुमांपुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां यदुच्छिष्टमभोज्यंयद्वा
दुश्चरितंमम सर्वंपुनंतुमामापोऽसतांचप्रतिग्रहंस्वाहा अग्निश्चमामन्युश्च
मन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतांयदह्नापापमकार्षंमनसावाचाहस्ताभ्यांप

देव्यमह्वारं ब्रह्मसि स्थामत गायत्री छंदसा मात हं देवब्रह्म
गेषपस्य नः॥ ओं ओजोसि सहोसि बलमसि भ्राजोसि देवानां

ओंमुदरेणशिश्नारात्रिस्तदवलेवतु यत्किंचिदुरितंमयि इदमहंमाममृतयोनौसूर्येज्योति
षिजुहोमिस्वाहा ॥ ओंसूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतांयद्रात्र्यापा
पमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तदवलुंपतु इदमहंमाममृत
योनौसूर्येज्योतिषिजुहोमिस्वाहा आयातुवरदादेवीनोधामनामासिविश्वमसिविश्वायुः
सर्वमसिसर्वायुरभि ओंगायत्रीमावाहयामिसावित्रीमावाहया
मि सरस्वतीमावाहयामि ओंभूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यं ओंतत्सवि
तुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ओंआपोज्योतीरसोमृतंब्रह्मभूर्भुवः
स्वरों ओंभूर्भुवःस्वर्महर्जनस्तपःसत्यंमधुक्षरंतितद्ब्रह्मतदापःआपोज्योतीरसोमृतंब्रह्म
भूर्भुवःस्वरों ओंतद्ब्रह्मओंतद्वायुः ओंतदात्मा ओंतत्सर्वंतरोर्नमः उत्तरेशिखरेदेवीभूम्यांपर्वत
मूर्द्धनि ब्राह्मणेभ्योह्यनुज्ञातागच्छदेवियथासुखं अंतश्चरसिभूतेषुगुहायांविश्वमूर्ति
षु त्वंयज्ञस्त्वंविष्णुस्त्वंवषट्कारस्त्वंरुद्रस्त्वंब्रह्मात्वंप्रजापतिः अमृतोपस्तरणमसि प्राणेनिवि
ष्टोमृतंजुहोमिप्राणायस्वाहा अपानेनिविष्टोमृतंजुहोम्यपानायस्वाहा व्यानेनिविष्टो
मृतंजुहोमिव्यानायस्वाहा उदानेनिविष्टोमृतंजुहोमिशिवोमाविशाप्रदाहायापानायस्वाहा

ने नि

समौ निविष्टोमृतं जुहोमि मृमानाय स्वाहा प्राणे निविष्टोमृतं जुहोमि शिवो मा विशाप्रदा
हाय प्राणाय स्वाहा अपाने निविष्टोमृतं जुहोमि शिवो मा विशाप्रदाहा समानाय स्वाहा व्या
ने निविष्टोमृतं जुहोमि शिवो मा विशाप्रदाहायापानाय स्वाहा व्याने निविष्टोमृतं जुहोमि
३५· शिवो मा विशाप्रदाहाय व्यानाय स्वाहा उदाने निविष्टोमृतं जुहोमि शिवो मा विशाप्रदाहा
७५ योदानाय स्वाहा समाने निविष्टोमृतं जुहोमि शिवो मा विशाप्रदाहाय समानाय स्वाहा
ब्रह्मणि म आत्मामृतत्वाय अमृतापिधानमसि १५ श्रद्धायां प्राणे निविश्यामृतं हुतं प्राण
मन्नेनाप्यायस्व अपाने निविश्यामृतं हुतमपानमन्नेनाप्यायस्व समाने निविश्यामृतं हु
तं समानमन्नेनाप्यायस्व ब्रह्मणि म आत्मामृतत्वाय प्राणानां ग्रन्थिरसि रुद्रो मा विशा
न्तकस्तेनान्नेनाप्यायस्व अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः ईशः सर्वस्य जगतः प्रभुः
प्रीणाति विश्वभुक् मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना त्वया जुष्टा
जुषमाणा दुरुक्तान् बृहद्वदेम विदथे सुवीराः त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागत
श्रीरुत त्वया त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणेन मेधे मेधां मे इन्द्रो ददातु मेधां
देवी सरस्वती मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजौ अप्सरासु च या मेधा गन्धर्वेषु च यन्म

नेदेवीमेधामनुष्यजासामांमेधासुरभिर्जुषतां १९ यामांमेधाप्सरसोभिर्विश्वरूपाहिरण्यवर्णा
जगतीजगम्याऊर्जस्वतीपयसापिन्वमानासामांमेधासुप्रतीकाजुषंतांसद्योजातंप्रपद्यामिस
द्योजातायवैनमः भवेभवेनातिभवेभजस्वमांभवोद्भवायनमः वामदेवायनमोज्येष्ठायनमः
श्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमोबलविकरणायनमोबलप्रम
थनायनमः सर्वभूतदमनायनमोनमोमनोन्मनायनमः अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः
सर्वतःशर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः तत्पुरुषायविद्महेमहादेवायधीमहितन्नोरु
द्रःप्रचोदयात् ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा
शिवोमेअस्तुसदाशिवोंब्रह्ममेधवामाब्रह्ममेधवामधुमेधवामाधास्तेसोमप्रजावत्सोभिसोअह
डःस्वप्नहन्दुरुष्षहायास्तेसोमप्राणेस्ताञ्जुहोमित्रिसुपर्णमयाचितंब्राह्मणायदद्यात्ब्र
ह्महत्यांवाएतेघ्नंतियेब्राह्मणास्त्रिसुपर्णंपठंतितेसोमंप्राप्नुवंतिआसहस्रात्पंक्तिंपुनंति
ॐब्रह्ममेधयामधुमेधयाब्रह्ममेवमधुमेधया अद्यानोदेवसवितःप्रजावत्सावीःसौभगंप
राडुःस्वप्न्यंसुव विश्वानिदेवसवितर्दुरितानिपरासुवयद्भद्रंतन्नआसुव मधुवाताऋताय
तेमधुक्षरंतिसिंधवःमाध्वीर्नःसंत्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तु

नः पितामधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतु नः य इमं त्रिसुपर्णमयाचितं ब्रा
ह्मणाय दद्यात् भ्रूणहत्यां वा एते घ्नंति ये ब्राह्मणास्त्रिसुपर्णं पठंति ते सोमं प्राप्नुवंति आसहस्रात्पंक्तिं
पुनंति ॐ ब्रह्म मेधया मधु मेधया ब्रह्ममेव मधु मेधया ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां
उप· महिषो मृगाणां श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् हंसः शुचिषद्वसुरंत
७५ रिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्
य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् वीरहत्यां वा एते घ्नंति ये ब्राह्मणास्त्रिसुपर्णं पठंति
ते सोममाप्नुवंति ॥ १० ॥ देवकृतस्यैनसोवयजनमसि स्वाहा मनुष्यकृतस्यैनसोवयजनमसि स्वाहा जनमसि।
स्वाहा पितृकृतस्यैनसोवयजनमसि स्वाहा आत्मकृतस्यैनसोवयजनमसि स्वाहा यद्दिवा च नक्तं चै
नश्चकृम तस्यावयजनमसि स्वाहा यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमसि स्वाहा य
द्वाहमेनो विद्वांसश्चाविद्वांसश्चैनश्चकृतम तस्यावयजनमसि स्वाहा स्वपंतश्च जाग्रतश्चैनश्च
कृतम तस्यावयजनमसि स्वाहा कामोकार्षीन्नाहं करोमि कामः करोति कामः कर्ता कामः कार
यिता एवं ते काम कामाय स्वाहा मन्युरकार्षीन्नाहं करोमि मन्युः कर्ता मन्युः कारयिता तत्ते मन्यो
मन्यवे स्वाहा ॥ ११ ॥ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः तिलाः पुनंतु मे पापं यत्किंचिद्दुरितं मयि म।

स्वाहा यन्मेमनसावाचाकर्मणा दुःकृतंकृतं दुःस्वप्नंदुर्जनस्पर्शोतिलाशांतिशमयंतुस्वाहा
चौरस्यान्नंनवश्राद्धंब्रह्महागुरुतल्पगः गोस्तेयंसुरापानंभ्रूणहत्यातिलाःशमयंतुस्वाहा
गणान्नंगणिकान्नंकष्टान्नंपतितान्नंभुक्त्वाहंबलिभोजनंश्रद्धाप्रज्ञाचमेधाचतिलाःशांतिशम-
यंतुस्वाहा श्रीश्चपुष्टिश्चानृण्यंब्रह्मण्यंबहुपुत्रिणं श्रद्धाप्रज्ञाचमेधाचतिलाशांतिशमयं
तुस्वाहा अग्नयेस्वाहा विश्वेभ्योदेवेभ्योस्वाहा ध्रुवायस्वाहा ध्रुवक्षितयेस्वाहा भूमायस्वाहा अ
च्युतक्षितयेस्वाहा अग्नयेस्विष्टकृतेस्वाहा धर्मायस्वाहा अधर्मायस्वाहा अद्भ्यःस्वाहा ओष
धीवनस्पतिभ्यःस्वाहा रक्षोदेवजनेभ्यःस्वाहा गृह्याभ्यःस्वाहा अवसानेभ्यःस्वाहा अवसा
नपतिभ्यःस्वाहा सर्वभूतेभ्यःस्वाहा अंतरिक्षायस्वाहा यदेजतिजगतियच्चचेष्टतिनाम्नोभा-
गोयंतात्मेस्वाहा पृथिव्यैस्वाहा अंतरिक्षायस्वाहा दिवेस्वाहा सूर्यायस्वाहा चंद्रमसेभ्यःस्वा
हा नक्षत्रेभ्यःस्वाहा इंद्रायस्वाहा बृहस्पतयेस्वाहा प्रजापतयेस्वाहा ब्रह्मणेस्वाहा स्वधापितृ
भ्यःनमोरुद्रायपशुपतयेस्वाहा देवेभ्यःस्वाहा पितृभ्यःस्वधास्तुभूतेभ्योनमः मनुष्येभ्योहंतः
परमेष्ठिनेस्वाहा ११ येभूताप्रचरंतिदिवानक्तंबलिमिच्छंतोवितुदस्यप्रेष्ठा तेभ्योबलिंपुष्टिका
मोहरामिमयिपुष्टिंपुष्टिपतिर्दधातुस्वाहा सजोषोइंद्रसगणोमरुद्भिः सोमंपिबवृत्रहाशूरविद्वा

त नहिशत्रुनपमयोनुदत्वायाभमयेकृणुहिविश्वतोनः त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंसूरमिंद्रं
हृयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः यतइंद्रभयामहेततोनो अभयंकृधिमघवञ्छ
ग्धितवतन्नऊतिभिर्विद्विषोविमृधोजहिस्वस्तिदाविशांपतिर्वृत्रहाम्रधोवशी वृषेंद्रःपुरएतुनः
सोमपाअभयंकरः ऊर्ध्वऊषुणऊतयेतिष्टादेवोनसविताऊर्ध्वोवाजस्यसनितायदंजिभिर्वाघद्भि
उप॰ ७८ र्विह्वयामहेतरणिर्विश्वदर्शितोज्योतिः कृदसिसूर्यविश्वमाभासिरोचनं उपयामगृहीतोसिसू
र्यायत्वाभ्राजस्वतएषतेयोनिः सूर्यायत्वाभ्राजस्वतेविश्वेभ्योदेवेभ्यः श्रीर्मेभजतुअलक्ष्मीर्मे
नश्यतुमहादेवोयजतुवाङ्मेधाश्रीश्चशर्मयच्छतुस्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मान्द्वे
ष्टिशरीरयज्ञःशमलंकुणपादंतस्मिन्सीदंतुयोस्मान्द्वेष्टि वरुणस्यस्कंभनमसिवरुणस्यस्कं
भसर्जनमसि उन्मुक्तोवरुणस्यपाशः योगिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः अतोधर्माणिधा
रयन् प्राणापानव्यानोदानसमानामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासंस्वाहा वाङ्मनश्च
क्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिसंकल्पामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासंस्वाहा
शिरःपाणिपादपार्श्वपृष्ठोदरजंघाशिश्नोपस्थपायवोमेशुध्यंतांज्योतिरहंविरजाविपाप्माभू
यासंस्वाहा त्वक्चर्ममांसरुधिरमेदोस्थिमज्जामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासंस्वाहा

श्री

शब्दस्पर्शरूपरसगंधा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा प्राणामय अन्नमयपृ
थिव्यप्तेजोवाय्वाकाशा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा मनोमयविज्ञानमया
नंदमया मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा विविट्यै स्वाहा स्वघोल्काय स्वाहा
उत्तिष्ठपुरुषहरितपिंगललोहिताक्षदेहि ददापयिता मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भू
यासं स्वाहा २ ओं स्वाहा शुक्रशाणितो जानासि मे शुध्यंतां ज्योतिरहं विरहं विरजा विपाप्मा भू
यासं स्वाहा सत्यं परं परं सत्यं सत्येन न स्वर्गाल्लोकाच्च्यवंते कदाचन सतां हि सत्यं तस्मात्सत्ये
रमंते तप इति तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तद्दुराधर्षं तस्मात्तपसि रमंते दम इति नि
यतं ब्रह्मचारिणस्तस्माद्दमे रमंते शम इत्यरण्ये मुनयस्तस्माच्छमे रमंते दानमिति सर्वाणि भू
तानि प्रशंसंति दानान्नातिदुःकरं तस्माद्दाने रमंते धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्ना
तिदुष्करं तस्माद्धर्मे रमंते प्रजनन इति भूयांसस्तस्माद्भूयिष्ठाः प्रजनने रमंते अग्नय इत्याह तस्मा
दग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमंते यज्ञ इति यज्ञो हि देवानां यज्ञेन
हि देवा दिवं गतास्तस्माद्यज्ञे रमंते मनसमिति हिद्वांस पवमानसे रमंते न्यास इति ब्रह्मा हि परः प
रो हि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्य एवं वेदेत्युपनिषत् ३

मथर्ववेदेबृहन्नारायणोपनिषत्समाप्ता ॥ ४ ॥ प्राजापत्योहारुणिःसौपर्णेयःप्रजापति
पितरमुपससारकिंभगवंतःपरमंवदंतीतितस्मैप्रोवाचसत्येनवायुरावातिसत्येनादित्योरोचा
तेदिविसत्यंवाचःप्रतिष्ठासत्येसर्वंप्रतिष्ठितंतस्मात्सत्यंपरमंवदंति तपसादेवादेवतामग्र
उप॰ आयन्तपसऋषयःसुवरन्विंदन्तपसासपत्नान्प्रणुदामारातीस्तपसिसर्वंप्रतिष्ठितंतस्मात्त
७७ पःपरमंवदंति दमेनदांताःकिल्बिषमवधुन्वंतिदमेनब्रह्मचारिणःसुवरगच्छन्दमोभूता
नांदुराधर्षंदमेसर्वंप्रतिष्ठितंतस्मात्तस्माद्दमःपरमंवदंति दमेनशांताःशिवमाचरंतिश
मेननाकंमुनयोन्वविंदन्शमोभूतानांदुराधर्षःशमेसर्वंप्रतिष्ठितंतस्माच्छमःपरमंवदंति
दानंयज्ञानांवरूथंदक्षिणालोकेदातारंसर्वभूतान्युपजीवंति दानेनारातीरपानुदंतदानेन
द्विषंतोमित्राभवंतिदानेसर्वंप्रतिष्ठितंतस्माद्दानंपरमंवदंति धर्मोविश्वस्यजगतःप्रतिष्ठा
लोकेधर्मिष्ठंप्रजाउपसर्पंतिधर्मेणपापमपनुदंतिधर्मेसर्वंप्रतिष्ठितंतस्मात्धर्मंपरमं
वदंति प्रजननंवैप्रतिष्ठासाधुप्रजायास्तंतुंतन्वानःपितृणामनृणोभवंतितदेवतस्यानृणंत
स्मात्प्रजननंपरमंवदंतिअग्नयोवैत्रयीविद्यादेवयानःपंथागार्हपत्यऋक्पृथिवीरथंतर
मन्वाहार्यपचनोयजुरंतरिक्षंवामदक्षिणाग्निर्वामदेव्यमाहवनीयसामसुवर्गोलोकोबृह

हतस्मादग्नीन्परमंवदंति अग्निहोत्रंसायंप्रातर्गृहाणांनिःकृतिःस्विष्टंसुहुतंयज्ञक्रतू
णांप्रायणांसुवर्गस्यलोकस्यज्योतिस्तस्मादग्निहोत्रंपरमंवदंति १२ यज्ञइतियज्ञोहिदेवानांय
ज्ञेनहिदेवादिवंगतायज्ञेनासुरानपानुदंतयज्ञेनद्विषंतोमित्राभवंतियज्ञेसर्वंप्रतिष्ठितंत
स्माद्यज्ञंपरमंवदंति मानसंवैप्राजापत्यंपवित्रंपवित्रंमानसेनमनसासाधुपश्यतिमनसा
वाऋषयःप्रजाअसृजंतमानसेसर्वंप्रतिष्ठितंतस्मान्मानसंपरमंवदंतिन्यासइत्याहुर्मनी
षिणोब्रह्माणंब्रह्माविश्वःकतमःस्वयंभूप्रजापतिसंवत्सरइतिसंवत्सरोसावादित्योयए
षआदित्येपुरुषःसपरमेष्ठीब्रह्मात्मायाभिरादित्यस्तपतिरश्मिभिस्ताभिपर्जन्योवर्षतिप
र्जन्येनौषधीवनस्पतयप्रजायंतऔषधिवनस्पतिभिरन्नंभवत्यन्नेनप्राणाप्राणैर्बलंबलेन
तपःतपसाश्रद्धाश्रद्धयामेधामेधयामनीषामनीषयामनोमनसाशांतिशांत्याचित्तंचित्तेन
स्मृतिःस्मृत्यास्मारंस्मारेणविज्ञानंविज्ञानेनात्मानंवेदयंतितस्मादन्नंददन्सर्वाण्येतानिददा
त्यन्नात्प्राणाभवंतिभूतानांप्राणैर्मनोमनसश्चविज्ञानंविज्ञानादानंदोब्रह्मयोनिसवाएष
पुरुषपंचधापंचात्मायेनसर्वमिदंप्रोतंपृथिवीचांतरिक्षंचद्यौश्चदिशश्चावांतरदिशश्चस
वैसर्वमिदंजगत् २४ सभूतंसभव्यंजिज्ञासक्लृप्तऋतजारयिष्ठःश्रद्धासत्योमहस्वांतत

षसोपनिषद् ज्ञात्वातमेवंमनसाहृदाचभूयोनमृत्युमुपयाहिविद्वांस्तस्मान्न्यासमेषांतपसाम
तिरिक्तमाहुः वसुरण्वोविभूरसिप्राणेत्वमसिसंधाताब्रह्मन्त्वमसिविश्वसृत्तेजोदास्त्वमसि
सूर्यस्यद्युम्नोदास्त्वमसिचंद्रमसउपयामगृहीतोसिब्रह्मणेत्वामहसेॐइत्यात्मानंयुंजीतेतद्वै ९
महोपनिषदंदेवानांगुह्यंयएवंवेदब्रह्मणोमहिमानमाप्नोतितस्माद्ब्रह्मणोमहिमानमि
३५· त्युपनिषत् २४ तस्यैवंविदुषोयज्ञस्यात्मायजमानश्रद्धापत्नीशरीरमिध्ममुरोवेदिर्लो
७८ मानिबर्हिर्वेदः शिखाहृदयंयूपः कामः आज्यंमन्युः पशुस्तपोग्निर्दमः शमयितादक्षिणा
वाग्घोताप्राणउद्गाताचक्षुरध्वर्युः मनोब्रह्माश्रोत्रमग्नीत्यावद्ध्रियतेसादीक्षायदश्नाति
तद्धविर्यत्पिबतितदस्यसोमपानंयद्रमतेतदुपसदोयत्संचरतिउपविशतिउत्तिष्ठतेचसप्रव
र्ग्योयन्मुखंतदाहवनीयोयाव्याहृतिराहुतिर्यदस्यविज्ञानंतज्जुहोतियत्सायंप्रातरत्तितत्स
मिधोयत्सायंप्रातर्मध्यंदिनंचतानिसवनानियेअहोरात्रेतेदर्शपूर्णमासौयेअर्धमासाश्चमासा
श्चतेचातुर्मास्यानियऋतवःतेपशुबंधायेसंवत्सराश्चपरिवत्सराश्चतेअहर्गणाः सर्ववे
दसंवाएतत्सत्रंयन्मरणंतदवभृथः एतद्वैजरामर्यमग्निहोत्रंसत्रंयएवंविद्वानुदगयनेप्र
मीयतेदेवानामेवमहिमानंगत्वादित्यस्यसायुज्यंगच्छतिअथयोदक्षिणेप्रमीयतेपितॄणामे

ब्रह्म हिमां नेतानावेदमसः सा पुत्रं मां गच्छत्येनो ह वा इदं मसो मे हिमाना ब्राह्मणाणां विद्वानभिज
पति तस्माद्ब्राह्मणो महिमानं ब्राह्मणो महिमानमाप्नोति तस्मात् कामात्मोऽस्युपनिषत् २५
इत्यथर्ववेदे महानारायणोपनिषत्समाप्तः ८८ वाच हनुमान् विभीषणाकारामपरि
चर्यायां मम सहस्राणि संस्कृतवाक्यानि सम सहस्राणि दण्डकाउत्येवमनुक्रमेण ताताकृतक्षे
त्रो भवेदिति हनुमदुपनिषत् हनुमानुवाच सिंहासने समासीने रामे पौलस्त्यसूदने प्रण
म्य दण्डवद्रामं पौलस्त्यवाक्यमब्रवीत् रघुनाथ महाबाहो केवलं कथितं मया अज्ञानात्सक
लं चैवं कथनीयं च सो लभे श्रीरामउवाच अथ पञ्चदण्डकाः पितृघ्नो मातृघ्नो ब्रह्मघ्नो राजाउ
रुद्रानेककोटिपतिघ्नो नेककृतपापो यो मम षण्णवतिकोटिकोटिनामानि जपति तेभ्यः पा
पेभ्यः प्रमुच्यते स्वयमेव यश्चिदानन्दस्वरूपो भवेन्नत्किं पुनर्हनूवाच विभीषणास्तत्राप्यशक्तो यः किं
करोति स होवाच रामः पञ्चाशल्लक्षमन्त्रमेव चापतत्रयं वमुन्मत्राहरणाः प्रणवो या जपते स
स्वयमेवाहं भवेन्नत्किं पुनर्हनूवाच कार्कशायस्तत्राप्यशक्तो पतेते किं ब्रुवीतीति स होवाच रामो
यश्रीणि याय्यानि श्रवणगोविधावशक्तो यो मम गीतां मन्त्रां मम सहस्रं महिम्नस्तवरूपं च महस्त्रोत्र
शताभिनं नारदोक्तं स्तवराजं हनुमत्कृतं मेरुराजात्मकं स्तवं च रामरहस्यादिभिस्स्तवैरन्तयोमा

नित्यःस्तोस्मिसमस्तस्येशोभवेन्नकिंभवेन्नकिमिति ॥ इत्यथर्वणवेदेरात्मोपनिषत्समाप्तः ४५
ॐकथंबंधःकथंमोक्षःकाअविद्याकाविद्येतिजाग्रत्स्वप्नसुषुप्तंतुरीयंकथमन्नमयःप्राणमयो
मनोमयोविज्ञानमयआनंदमयःकथंकर्ताजीवःक्षेत्रज्ञःसाक्षीकूटस्थोन्तर्यामीकथंप्रत्यगात्मा
परमात्माआत्मामायाचेति कथमात्मेश्वरोअनात्मनोदेहादीनात्मत्वेनाभिमन्यतेसोभिमानआ
३५ त्मनोबंधः।तन्निवृत्तिर्मोक्षः तमभिमानंकारयतियासाअविद्यासोभिमानोययाभिनिवर्ततेसा
७९ विद्यामनआदिचतुर्दशकरणैःपुष्कलैरादित्याद्यनुगृहीतैःशब्दादीन्विषयान्स्थूलान्यदा
दोपलभतेतदात्मनोजागरणंतद्वासनारहितश्चतुर्भिःकरणैःशब्दाद्यभावेपिवासनामया
न्शब्दादीन्यदोपलभतेतदात्मनःस्वप्नंचतुर्दशकरणोपरमाद्विशेषविज्ञानाभावात्यदातदा
त्मनःसुषुप्तं १ अवस्थात्रयभावाभावसाक्षीस्वयंभावरहितंनैरंतर्यंचैतन्यंयदातदातु
रीयंचैतन्यमित्युच्यते अन्नकार्याणांषण्णांकोशानांसमूहोन्नमयःकोशइत्युच्यते प्राणादि
चतुर्दशवायुभेदाअन्नमयेकोशेयदावर्त्ततेतदाप्राणमयःकोशइत्युच्यते एतत्कोशद्वया
संयुक्तोमनआदिचतुर्भिःकरणैःआत्माशब्दादिविषयान्संकल्पादिधर्मान्यदाकरोति
तदामनोमयःकोशइत्युच्यते एतत्कोशत्रयसंयुक्तस्तद्गतविशेषाविशेषज्ञोयदावभासते

तद्विज्ञानमयःकोशइत्युच्यते एतत्कोशचतुष्टयंतत्कारणाज्ञानेवटकणिकायामिववृक्षोय
दावर्ततेतदाआनंदमयःकोशइत्युच्यते सुखदुःखव्यवहारोपयोगदेहात्मातःकर्त्तायदातदाइष्टविष
येषुबुद्धिसुखबुद्धिरनिष्टविषयेषुबुद्धिर्दुःखं बुद्धिमात्रस्पर्शीकृष्णसंयोगाःसुखदुःखेहेतवःपुण्य
पापकर्मानुसारीभूत्वाआत्मशरीरसंयोगमप्राप्त्यशरीरसंयोगमिवकुर्वाणोयदादृश्यतेतदो
पहितत्वाज्जीवइत्युच्यतेमनआदिश्चप्राणादिश्चसत्त्वादिश्चपुण्यादिश्चेतेपंचवर्गाइत्येतेषांपंच
वर्गाणांधर्मीभूतात्मज्ञानादृतेनविनश्यति आत्मसंनिधौनित्यत्वेनप्रतीयमानआत्मापार्थिव
स्थूललिंगशरीरंहृदयग्रंथिरित्युच्यतेतत्रयत्प्रकाशतेचैतन्यंसक्षेत्रज्ञइत्युच्यते ज्ञातृज्ञानज्ञे
यानामाविर्भावतिरोभावज्ञातास्वयमेवमाविर्भावतिरोभाववर्जितः स्वयंज्योतिःसाक्षीत्युच्य
ते ब्रह्मादिपिपीलिकापर्यंतःसर्वप्राणिबुद्धिष्ववशिष्टतयोपलभ्यमानःसर्वप्राणिबुद्धिस्थो
यदातदाकूटस्थइत्युच्यते कूटस्थाद्युपहितःभेदानांस्वरूपलाभहेतुर्भूत्वामणिगणसूत्र
मिवसर्वक्षेत्रेष्वनुस्यूतत्वेनयदाप्रकाशतेआत्मातदांतर्यामीत्युच्यते सर्वोपाधिविनिर्मुक्त
सुवर्णाद्यवच्चविज्ञानचिन्मात्रस्वभाव आत्मायदाभासतेतदात्वंपदार्थःप्रत्यगात्मेत्युच्यते
सत्यंज्ञानमनंतमानंदंब्रह्मसत्यमविनाशिनामदेशकालवस्तुनिमित्तेषुविनश्यत्सुयन्नविन

यपतितनदाविनाशज्ञानमित्यभिधीयते अनंतनाममृद्विकारेषु स्वर्णविकारेषु सव
र्णमिवतंतुकार्येषु तंतुरिवअव्यक्तादिसृष्टिप्रपंचेषु पूर्वव्यापकं चैतन्यमनंतमित्युच्यते
आनंदोनामसुखचैतन्यस्वरूपअपरिमितानंदसमुद्रमविशिष्टसुखस्वरूपश्चआनं
दइत्युच्यते एतद्वस्तुचतुष्टयंयस्यलक्षणंदेशकालनिमित्तेष्वव्यभिचारित्वतत्पदा
३५ र्थः परमात्मापरब्रह्मेत्युच्यते त्वंपदार्थादौपाधिकात्तत्पदार्थादौपाधिकाद्विलक्षणः
८० आकाशवत्सूक्ष्मः केवलः सत्तामात्र तत्पदार्थस्यात्मेत्युच्यते अनादिमत्तमतोपुमाणाणु
प्रमाणासायासापानसतीनासतीनसदसतीस्वयमवधीकाद्विकारहेतोनिरूप्यमाणा
सती अनिरूप्यमाणासतीलक्षणशून्यासामायेत्युच्यते इतिसर्वोपनिषत्सारःसमाप्तः ८१
गौतमउवाच भगवन्सर्वधर्मज्ञसर्वशास्त्रविशारद ब्रह्मविद्याप्रबोधोहिकेनोपाये
नजायते सनत्कुमारउवाच विचार्यसर्ववेदेषुमतंज्ञात्वापिनाकिनः पार्वत्याकथि
तंतत्वंशृणुगौतमतन्मम अनाख्येयमिदंगुह्यंयोगिनीकोशसन्निभं हंसस्यागति
विस्तारंभुक्तिमुक्तिफलप्रदं अथहंसपरमहंसनिर्णयंव्याख्यास्यामो ब्रह्मचारिणे
शांतायदांतायगुरुभक्तायहंसहंसेतिसदाध्यायन्सर्वेषुदेहेषुव्याप्यवर्ततेयथाह्यग्निः

काष्ठेषु तिलेषु तैलमिव तं विदित्वा न मृत्युमेति गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठा
नं त्रिः प्रदक्षिणीकृत्य मणिपूरकं च गत्वा नाहतमतिक्रम्य विशुद्धौ प्राणान्निरुध्याज्ञामनुध्य
यायन् ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽहमित्येवं सर्वदा ध्यायन्नथो नादमाधाराद्ब्रह्मरन्ध्रपर्यन्तं शु
द्धस्फटिकसंकाशं स ब्रह्म परमात्मेत्युच्यते अथास्य हंस ऋषिरव्यक्तगायत्री छन्दः परमहंसो
देवता अहमिति बीजं स इति शक्तिः सोऽहमिति कीलकं षट्संख्ययाहोरात्रयोरेकविंशति
सहस्राणि षट्शतान्यधिकानि भवन्ति सूर्याय सोमाय निरंजनाय निराभासाय तनु सूक्ष्म
प्रचोदयादिति अग्नीषोमाभ्यां वौषट् हृदयाद्यंगन्यासकरन्यासौ भवतः एवं कृत्वा हृदयेऽष्ट
दले हंसात्मानं ध्यायेत् अग्नीषोमौ पक्षावोंकारः शिरो बिन्दुस्तु नेत्रं मुखं रुद्रो रुद्राणी चर
णौ बाहू कालश्चाग्निश्चोभे पार्श्वे भवतः पश्यत्यनागारश्च शिष्टोभयपार्श्वे भवतः एषोऽसौ
परमहंसो भानुकोटिप्रतीकाशो येनेदं व्याप्तं तस्याष्टधा वृत्तिर्भवति पूर्वदले पुण्ये मतिराग्ने
ये निद्रालस्यादयो भवन्ति याम्ये क्रूरे मतिर्नैरृते पापे मनीषा वारुण्यां क्रीडा वायव्ये गमना
दौ बुद्धिः सौम्ये रतिप्रीतिरीशाने द्रव्यादाने मध्ये वैराग्यं केसरे जाग्रदवस्था कर्णिकायां स्वप्ने
लिंगे सुषुप्तिः पद्मत्यागे तुरीयं यदा हंसो नादे लीनो भवति तदा तत्तुरीयातीतमुन्मना अजपो

एवंसंहारमित्यभिधीयते एवंसर्वंहंसवशात्तस्मान्मनोविचार्यते सएवयन्नजपकोवानादमनु
भवति एवंसर्वंहंसवशान्नादोदशविधोजायते चिणीतिप्रथमं चिंचिणीतिद्वितीयं घंटा
नादस्तृतीयं शंखनादश्चतुर्थं पंचमस्तंत्रीनादः षष्ठस्तालनादः सप्तमोवेणुनादोऽष्ट
मोमृदंगनादो नवमोभेरीनादो दशमोमेघनादोनवमंपरित्यज्यदशममेवाभ्यसेत् प्र
उप. ८१ थमेचिंचिणीगात्रंद्वितीयेगात्रभंजनं तृतीयेखेदनंयातिचतुर्थेकंपतेशिरः पंचमेस्र
वतेतालुषष्ठेमृतनिषेवणं सप्तमेगूढविज्ञानंपरावाचातथाष्टमे अदृश्यंनवमेदेहं
दिव्यचक्षुस्तथामलम् दशमेपरमंब्रह्मभवेद्ब्रह्मात्मसंनिधौ तस्मिन्मनोविलीयते
मनसिसंकल्पविकल्पेदग्धेपुण्यपापेसदाशिवः शक्त्यात्मासर्वत्रावस्थितः स्वयंज्यो
तिः शुद्धोबुद्धोनित्योनिरंजनः शांतःप्रकाशितः इत्येवंवेदप्रवचनंवेदप्रवचनमिति २
इत्यथर्ववेदेहंसोपनिषत्समाप्तः ४२ अथयोगिनोपरमहंसानांकोयंमार्गस्तेषां
कास्थितिरितिनारदोभगवंतमुपगम्योवाच तंभगवानाहयोयंपरमहंसमार्गोलोके
दुर्लभतरोनतुबाहुल्योयद्येकोभवति सएवनित्यपूतः स्थः सएववेदपुरु
षइतिविदुषोमन्यंतेमहापुरुषोयच्चित्तंतत्सदामय्येवावतिष्ठते तस्मादहंचतस्मिन्नवा

वावस्थीयते असौस्वपुत्रमित्रकलत्रबंध्वादीन्शिखायज्ञोपवीतंचयागसूत्रस्वाध्यायंच
सर्वकर्माणिसंन्यस्यायंब्रह्मांडंचहित्वाकौपीनंदंडमाछादनंचस्वशरीरस्योपभोगार्थाय
चलोकस्योपकारार्थायपरिग्रहीतंतच्चनमुख्योस्ति कोयंमुख्यइतिचेदयंमुख्योनदंडंनशि
खानयज्ञोपवीतंनाछादनंचरतिपरमहंसो नशीतंनचोष्णं नसुखंनदुःखं नमाना
पमानंचषडूर्मिवर्जितंनशाहंकारस्पर्शनरूपनरसनगंधेनचमनोप्येवंनिंदागर्वमत्सरो
दंभदर्पेछाद्वेषसुखदुःखकामक्रोधलोभमोहमदहर्षासूयाहंकारादींश्चहित्वा
स्ववपुःकुणपमिवदृश्यतयतस्तद्वपुरपध्वस्तंसंशयविपरीतमिथ्याज्ञानानांयोहेतु
स्तेननित्यनिवृत्तस्तन्नित्यबोधस्तत्स्वयमेवावस्थितिस्तंशांतमचलमद्वयानंदवि
ज्ञानघनएवास्मितत्स्वमेवपरमंधामतदेवशिखाचतदेवोपवीतंचपरापदेनिरंतरःस्तः
स्थः तदेवावस्थानंपरमात्मनोरेकत्वज्ञानेनतयोर्भेदएवविभग्नोयासासंध्यासर्वान्
कामान्परित्यज्याद्वैतेपरमस्थितिः ज्ञानदंडोधृतोयेनएकदंडीसउच्यते काष्ठदंडोधृ
तोयेनसर्वाशीज्ञानवर्जितः सयातिनरकान्घोरान्महारौरवमेवच इदमंतरंज्ञात्वा
सपरमहंसआशांबरोननमस्कारोनस्वधाकारोनस्तुतिर्नवषट्कारोभवेद्भिक्षुः नावा

हननंनविसर्जनंनमेंद्रेणध्यानंनोपवासनंच नलंहंतालंहंतनष्टश्यत्प्राश्यत्प्राहननमर्कंचानिकेत
स्थितिरेवसभिक्षुः हाटकादीनांनपरिग्रहोवावलोकनंचअथावलोकनमात्रेणानुवाधकइति
चेत् तद्वाधकोस्त्येव यस्माद्भिक्षुर्हिरण्यंपरमेनदृष्टंसब्रह्महाभवेद्यस्माद्भिक्षुर्हिरण्यंपरमेनस्पृ।
ष्टंसपौल्कसोभवेत् यस्माद्भिक्षुर्हिरण्यंपरमेनग्राह्यंसआत्महाभवेत् यस्माद्भिक्षुर्हिरण्यंपरेन
उप० दृष्टंचनस्पृष्टंनग्राह्यंचसर्वान्कामानात्मनोगतान्व्यावर्तेरन्दुःखेनोद्वेगःसुखेनस्पृहा
८२ त्यागोरागेसर्वत्रशुभाशुभयोरनभिस्नेहोनद्वेष्टिनप्रमोदश्चसर्वेषामिंद्रियाणांगतिरु
परमतिज्ञानेस्थिरस्थसदाआत्मा आत्मन्येवावतिष्ठतेसयतिःकथ्यतेसएवयोगीचसएव
ज्ञानीचयत्पूर्णानंदैकरूपरसबोधस्तद्ब्रह्माहमितिकृतकृत्योभवति इतिपरमहंसोपनि।
षत्समाप्ता ४३ ॐ शंनोमित्रःशंवरुणःशंनोभवत्वर्यमा शंनइंद्रोबृहस्पतिःशंनोवि
ष्णुरुरुक्रमः नमोब्रह्मणेनमस्तेवायोत्वमेवप्रत्यक्षंब्रह्मासित्वामेवप्रत्यक्षंब्रह्मवदिष्यामि
ऋतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्वक्तारमवत्ववतुमामवतुवक्तारंहि ॐ शां।
तिःशांतिःशांतिः शीक्षांव्याख्यास्यामःवर्णःस्वरःमात्राबलंसामःसंतानःइत्युक्तःशिक्षा
ध्यायःसहनौयशःसहनौब्रह्मवर्चसंअथातःसंहितायाउपनिषदंव्याख्यास्यामःपंचस्वधि

सतिर्वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिः एतत्ततो भवति आकाशशरीरं ब्रह्म सत्या
त्मप्राणारामं मन आनन्दं शान्तिसमृद्धममृतमिति प्राचीनयोग्योपास्व वायवान्नमेकं च पृथि
व्यन्तरिक्षं द्यौर्दिशोवान्तरदिशाः अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि आप ओषधयो वनस्पतय आ
काश आत्मा इत्यधिभूतं अथाध्यात्मं प्राणोपानो व्यानोदानः समानश्चक्षुः श्रोत्रं मनो वाक् त्वक्
चर्म मांसं स्नावास्थि मज्जा एतदधिविधाय ऋषिरवोचत् पांक्तं वा इदं सर्वं पांक्तेनैव पांक्तं स्पृणोती
ति ओ३ इतीदं सर्वं ओमिति ब्रह्म सर्वमेकं च ओमित्येतदनुकृतिर्ह स्म वाप्यो श्रावयेत्या श्रावयन्ति
ओमिति सामानि गायन्ति ओ३ शोमिति शस्त्राणि शंसन्ति ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति ओ
मिति ब्रह्मा प्रसौति ओमित्यग्निहोत्रमनुजानाति ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवा
नीति ब्रह्मैवोपाप्नोति ऋतं च स्वाध्यायप्रवचने च सत्यं च स्वाध्यायप्रवचने च तपश्च स्वाध्यायप्रव
चने च दमश्च स्वाध्यायप्रवचने च शमश्च स्वाध्यायप्रवचने च अग्नयश्च स्वाध्यायप्रवचने च अग्नि
होत्रं च स्वाध्यायप्रवचने चातिथयश्च स्वाध्यायप्रवचने च मानुषं च स्वाध्यायप्रवचने च प्रजा च
स्वाध्यायप्रवचने च प्रजनश्च स्वाध्यायप्रवचने च प्रजातिश्च स्वाध्यायप्रवचने च सत्यमिति स
त्यवचा राथीतरस्तप इति तपोनित्यः पौरुशिष्टिः स्वाध्यायप्रवचने एवेति नाको मौद्गल्यस्तद्धि त

एतद्धितपः अहंवृक्षस्यरेरिवाकीर्त्तिःपृष्ठंगिरेरिव ऊर्द्ध्वपवित्रोवाजिनीवस्वमृतमस्मिद्रविण
सवर्चसं सुमेधाअमृतोक्षितः इतित्रिशंकोर्वेदानुवचनं वेदमनूच्याचार्योन्तेवासिनमनुशा
स्ति सत्यंवदधर्मंचरस्वाध्यायान्माप्रमदःआचार्यायप्रियंधनमाहृत्यप्रजातंतुंमाव्यवच्छेत्सीः स
त्यान्नप्रमदितव्यं धर्मान्नप्रमदितव्यं कुशलान्नप्रमदितव्यं भूत्यैनप्रमदितव्यं स्वाध्याय
उप· प्रवचनाभ्यांनप्रमदितव्यं देवपितृकार्याभ्यांनप्रमदितव्यं मातृदेवोभवपितृदेवोभव
२५ आचार्यदेवोभवअतिथिदेवोभव यान्यनवद्यानिकर्माणितानिसेवितव्यानि नोइतरा
णि यान्यस्माकंसुचरितानितानित्वयोपास्यानि नोइतराणि येकेचास्मच्छ्रेयांसोब्राह्म
णास्तेषांत्वयासनेनप्रश्वसितव्यं श्रद्धयादेयं अश्रद्धयादेयं श्रियादेयंह्रियादेयंभियादेयंसंविदादेयं
अथयदितेकर्मविचिकित्सावावृत्तविचिकित्सावास्यात्येतत्रब्राह्मणाःसंमर्शिनोयुक्ता
आयुक्ताअलूक्षाधर्मकामास्युःयथातेतत्रवर्तेरन्तथातत्रवर्तेथाः अथाभ्याख्यातेषुयेत
त्रब्राह्मणाःसंमर्शिनोयुक्ताआयुक्ताअलूक्षाधर्मकामास्युर्यथातेतेषुवर्तेरन्तथातेषुवर्ते
थाः एषआदेशएषउपदेशएषावेदोपनिषत् एतदनुशासनमेवमुपासितव्यंएवमुचैत
दुपास्यं ॥ इतिशिक्षा अथब्रह्मवल्ली शंनोमित्रःशंवरुणःशंनोभवत्वर्यमाशंनइंद्रोबृह

स्तिः यो वै विस्मृह्कमः नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्र
ह्मावादिषं ऋतमवादिषं सत्यमवादिषं तन्मामावीत् तद्वक्तारमावीत् आवीन्माम् आवीद्वक्तारं ॐ शांतिः २१
सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्विनावधीतमस्तु मा विद्विषावहै ॐ
शांतिः शांतिः शांतिः २ ॐ ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता सत्यं ज्ञानमनंतं ब्रह्म यो वेद।
निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति तस्माद्वा
एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओ
षधयः ओषधिभ्योऽन्नम् अन्नात्पुरुषः स वा एष पुरुषोऽन्नरसमयः तस्येदमेव शिरः अयं दक्षिणः प
सर्वौषध क्षः अयमुत्तरः पक्षः अयमात्मा इदं पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति अन्नाद्वै प्रजाः प्रजायं
ते याः काश्च पृथिवीं श्रिताः अथो अन्नेनैव जीवंति अथैनदपि यंत्यंततः अन्नं हि भूतानां ज्येष्ठं त
सर्वं वै तन्न स्मात् सर्वौषधमुच्यते अन्नाद्भूतानि जायंते जातान्यन्नेन वर्द्धंते अद्यतेऽत्ति च भूतानि तस्मा
माप्नुवंति दन्नं तदुच्यत इति ४ तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः तेनैष पूर्णः
येऽन्नं ब्रह्मो स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य प्राण एव शिरः व्यानो द
पासते अन्न क्षिणः पक्षः अपान उत्तरः पक्षः आकाश आत्मा पृथिवी पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति
न्नं हि भूतानां ज्येष्ठं तस्मात्सर्वौषधमुच्यते इति

प्राणं देवा अनु प्राणंति मनुष्याः पशवश्च ये प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यते सर्वमे
व त आयुर्यंति ये प्राणं ब्रह्मोपासते प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यत इति ४ तस्यै
ष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्मात्प्राणमयादन्योंऽतर आत्मा मनोमयस्तेनैष पूर्णः
स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य यजुरेव शिरः ऋग्दक्षिणः प
३५ क्षः सामोत्तरः पक्षः आदेश आत्मा अथर्वांगिरसः पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति यतो वा
२५ चो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान् न बिभेति कदाचनेति ५ त
स्यैष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्मान्मनोमयादन्योंऽतर आत्मा वि
ज्ञानमयस्तेनैष पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधस्त
स्य श्रद्धैव शिरः ऋतं दक्षिणः पक्षः सत्यमुत्तरः पक्षः योग आत्मा महः पुच्छं प्रतिष्ठा तदप्येष
श्लोको भवति विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते
विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुत इति ६
तस्यैष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्माद्विज्ञानमयादन्योंऽतर आत्मानंदमयस्ते
नैष पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधस्तस्य प्रियमेव शिरो

मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति
असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति ७ तस्यै
ष एव शारीर आत्मा यः पूर्वस्य अथातोनुप्रश्नाः उताविद्वानमुं लोकं प्रेत्य कश्चन गच्छती ३
आहो विद्वानमुं लोकं प्रेत्य कश्चित्समश्नुते ३ सोकामयत बहु स्यां प्रजायेयेति स तपोत
प्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य
सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं च
अनृतं च सत्यमभवत् यदिदं किंच तत्सत्यमित्याचक्षते तदप्येष श्लोको भवति असद्वा इदमग्र
८८ ३० आसीत् ततो वै सदजायत तदात्मानं स्वयमकुरुत तस्मात्तत्सुकृतमुच्यत इति ८ यद्वै तत्सुकृतं
रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् ए
ष ह्येवानंदयाति यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयं प्रतिष्ठां विंदते अथ सो
भयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदु
षो मन्वानस्य तदप्येष श्लोको भवति भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्नि
श्चेन्द्रश्च मृत्युर्धावति पंचम इति ९ सैषानंदस्य मीमांसा भवति युवा स्यात्साधुयुवाध्याय

कआशिष्ठोदृढिष्ठोवलिष्टःतस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात् सएकोमानुषआनंदः तेये
शतंमानुषाआनंदाः सएकोमनुष्यगंधर्वाणामानंदः श्रोत्रियस्यचाकामहतस्यतेयेशतंम
नुष्यगंधर्वाणामानंदाः सएकोदेवगंधर्वाणामानंदः श्रोत्रियस्यचाकामहतस्य तेयेशतंदेवगं
धर्वाणामानंदाः सएकःपितॄणांचिरलोकलोकानामानंदः श्रोत्रियस्यचाकामहतस्यतेये
३५. शतंपितॄणांचिरलोकलोकानामानंदाः सएकआजानजानांदेवानामानंदः श्रोत्रियस्यचा
८९ कामहतस्य तेयेशतमाजानजानांदेवानामानंदाः सएकः कर्मदेवानांदेवानामानंदः ये
कर्मणादेवानपियंति श्रोत्रियस्यचाकामहतस्य तेयेशतंकर्मदेवानांसएकोदेवानामा
नंदः मानंदाः देवानां श्रोत्रियस्यचाकामहतस्य तेयेशतंदेवानामानंदाः सएकइंद्रस्यानंदः
श्रोत्रियस्यचाकामहतस्यतेयेशतमिंद्रस्यानंदाः सएकोबृहस्पतेरानंदः श्रोत्रियस्यचाका
महतस्यतेयेशतंबृहस्पतेरानंदाः सएकः प्रजापतेरानंदः श्रोत्रियस्यचाकामहतस्यतेये
शतंप्रजापतेरानंदाः सएकोब्रह्मणआनंदः श्रोत्रियस्यचाकामहतस्य सयश्चायंपुरुषे य
श्चासावादित्येसएकः सयएवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामति
एतंप्राणमयमात्मानमुपसंक्रामति एतंमनोमयमात्मानमुपसंक्रामति एतंविज्ञानम

यमात्मानमुपसंक्रामति एतमानंदमयमात्मानमुपसंक्रामति तदप्येष श्लोको भवति य
तो वाचो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति एतं ह वाव
न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति स य एवं विद्वानेते आत्मानं स्पृणु
ते य एवं वेदेत्युपनिषत् ९ अथर्ववेदे आनंदवल्युपनिषत्समाप्ता ४४ ॐ भृगुर्वै वा
रुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति तस्मा एतत्प्रोवाच अन्नं प्राणं चक्षुः
श्रोत्रं मनो वाचमिति तं होवाच यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्र
यंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति स तपोऽतप्यत स तपस्तप्त्वा अन्नं ब्रह्मेति व्यज
नात् अन्नाद्ध्येव खल्विमानि भूतानि जायंते अन्नेन जातानि जीवंति अन्नं प्रयंत्यभिसंविशंती
ति तद्विज्ञाय पुनरेव वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति तं होवाच तपसा
ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति स तपोऽतप्यत स तपस्पससार अधीहि भगवो ब्रह्मेति तं
स्माद्धि मनो ब्रह्मेति व्यजानात् मनसो ह्येव प्राणो ब्रह्मेति व्यजानात् प्राणाद्ध्येव ख
ल्विमानि भूतानि जायंते प्राणेन जातानि जीवंति प्राणं प्रयंत्यभिसंविशंतीति तद्विज्ञा
य पुनरेव वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति तं होवाच तपसा ब्रह्म विजिज्ञा

२

ससतपोब्रह्मेतिसतपोतप्यतसतपस्तप्त्वा मानिभूतानिजायंतेमनसाजातानिजीवंति
मनःप्रयंत्यभिसंविशंतीति तद्विज्ञायपुनरेववरुणंपितरमुपससार अधीहिभगवोब्र
ह्मेतितंहोवाचतपसाब्रह्मविजिज्ञासस्वतपोब्रह्मेति ४ सतपोतप्यतसतपस्तप्त्वावि
उप- ज्ञानंब्रह्मेतिव्यजानात् विज्ञानाद्ध्येवखल्विमानिभूतानिजायंते विज्ञानेनजाता
७८ निजीवंतिविज्ञानंप्रयंत्यभिसंविशंतीतितद्विज्ञायपुनरेववरुणंपितरमुपससार उ
अधीहिभगवोब्रह्मेतितंहोवाचतपसाब्रह्मविजिज्ञासस्वतपोब्रह्मेति ५ सतपोतप्य
तसतपस्तप्त्वाआनंदोब्रह्मेतिव्यजानात् आनंदाद्ध्येवखल्विमानिभूतानिजायंते
आनंदेनजातानिजीवंतिआनंदंप्रयंत्यभिसंविशंतीति सैषाभार्गवीवारुणीविद्या
परमेव्योमन्प्रतिष्ठितासयएवंवेदप्रतितिष्ठतिअन्नवानन्नादोभवतिमहान्भवतिप्र
जयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्या ६ अन्नंननिंद्यात्तद्व्रतंप्राणोवाअन्नंशरीरमन्ना
दंप्राणेशरीरंप्रतिष्ठितंशरीरेप्राणःप्रतिष्ठितः तदेतदन्नमन्नेप्रतिष्ठितंसयएतदन्न
मन्नेप्रतिष्ठितंवेदप्रतितिष्ठत्यन्नवानन्नादोभवतिमहान्भवतिप्रजयापशुभिर्ब्रह्मवर्च
सेनमहान्कीर्त्या ७ अन्नंनपरिचक्षीततद्व्रतमापोवाअन्नंज्योतिरन्नादमप्सुज्योतिःप्रति

ष्ठितंज्योतिष्यापःप्रतिष्ठिताः तदेतदन्नमन्नेप्रतिष्ठितं सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रति
तिष्ठत्यन्नवानन्नादोभवति महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्या: ८ अन्नं
बहुकुर्वीततद्व्रतम्पृथिवीवाअन्नमाकाशोन्नादः पृथिव्यामाकाशःप्रतिष्ठितः आ
काशेपृथिवीप्रतिष्ठिता तदेतदन्नमन्नेप्रतिष्ठितं सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रति
ष्ठत्यन्नवानन्नादोभवतिमहान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्या: ९ नकं
चनवसतौप्रत्याचक्षीततद्व्रतं तस्माद्ययाकयाचविधयाबह्वन्नंप्राप्नुयात् अराध्यस्मा
अन्नमित्याचक्षते एतद्वैमुखतोन्नंराद्धं मुखतोस्माअन्नंराध्यते एतद्वैमध्यतोन्नंराद्धंमध्यतोस्माअन्नंरा
ध्यतेएतद्वाअन्ततोन्नंराद्धमन्ततोस्माअन्नंराध्यतेयएवंवेदक्षेमइतिवाचियोगक्षेमइतिप्रा
णापानयोःकर्मेतिहस्तयोर्गतिरितिपादयोर्विमुक्तिरितिपायौइतिमानुषीःसमाज्ञाः
अथदैवीस्तृप्तिरितिवृष्टौबलमितिविद्युतियशइतिपशुषुज्योतिरितिनक्षत्रेषुप्रजातिर
मृतमानन्दइत्युपस्थेसर्वमित्याकाशेतत्प्रतिष्ठेत्युपासीतप्रतिष्ठावान्भवति तन्महइत्यु
पासीतमहान्भवति तन्मनइत्युपासीतमानवान्भवतितन्नमइत्युपासीतनम्यन्तेस्मैकामा
स्तद्ब्रह्मेत्युपासीतब्रह्मवान्भवतितद्ब्रह्मणःपरिमरइत्युपासीतपर्येणंम्रियन्तेद्विषन्तः

सपत्नाः परीमेप्रियाभ्रातृव्याः सयश्चायंपुरुषेयश्चासावादित्येसएकः सयएवंवेदास्माल्लो
कात्प्रेत्यएतमन्नमयमात्मानमुपसंक्रम्यएतंप्राणमयमात्मानमुपसंक्रम्यएतंमनोमयमा
त्मानमुपसंक्रम्यएतंविज्ञानमयमात्मानमुपसंक्रम्यएतमानंदमयमात्मानमुपसंक्र
म्यइमांल्लोकान्कामान्नीकामरूप्यनुसंचरन्नेतत्सामगायन्नास्ते ५ हा ३ वुहा ३ वुहा ३
उप· वु अहमन्नमहमन्नमहमन्नमन्नादो ३ अहंश्लोककृदहंश्लोककृदहंश्लोककृत् अहमस्मि
८८ प्रथमजाऋतस्यपूर्वंदेवेभ्योऽमृतस्यनाभिपियोमाददातिसइदेवमावान् अहम
न्नमन्नमदंतमा द्मिअहंविश्वंभुवनमभ्यभवांसुवर्ज्योतिर्यएवंवेदइत्युपनिषत् ॥
इतिभृगुवल्लीसमाप्ता ॥ इतितैत्तिरीयोपनिषत् ॥ ॐब्रह्मविद्यांप्रवक्ष्यामिब्रह्मानार
दायनारदोबृहत्सेनायबृहत्सेनइंद्रायइंद्रोभरद्वाजायभरद्वाजोजीवितकामेभ्यःशि
ष्येभ्यःप्रायच्छत् १ ॐनतकारीमकारीविषहारिणीविषसर्पिणीविषनाशिनीहतंवि
षमहाविषंविषघ्नेनहृतंविषंहतंतेब्रह्मणाविषंहतमिंद्रस्यवज्रेणस्वाहा नागानांसर्पाणां
वृश्चिकानांलूतानांगोधानांगृहगोधानांमूषकानांस्थावराणांजंगमानांयघनेनतको
हतंत्वंयदिवातत्तकःस्वयं पदिकर्कोटकहतंत्वंयदिवाकर्कोटकस्वयंयदिशाव

पुलिकहन्तस्त्वंपदिव्यशोवपुलिकः स्वंपदिपद्मकहन्तस्त्वंपदिवापद्मकः स्वंपदि
महापद्मकहन्तस्त्वंपदिवामहापद्मकः स्वंपदिचेलापत्रकहन्तस्त्वंपदिचेलापत्रक
स्त्वंपदिकालिकहन्तस्त्वंपदिवाकालिकः स्वंपदिकालिकहन्तस्त्वंपदिवाकालि
कः स्वंप २ य इमांमहाविद्याममावस्यांश्रृणुयात्तद्द्वादशवर्षेणनेदंशन्तिसर्प्पाः य
३ इमांमहाविद्याममावस्यायंमधीयानोधारयेद्यावज्जीवेननेदंशन्तिसर्प्पाः अक्षोब्राह्म
ग्रामे णान्नत्रयाणामविवानगोनमोहन्यन्तिकाष्ठेनमोहयन्तिभस्मनामोहयन्तीत्याहशनैब्राह्म
णाग्राहदिपित्वाचहत्मोहयन्तिचहत्तथामोहयन्तीत्याहभगवान् ब्रह्माग्राहभगवान्ब्र
ह्मेतिनिगमकत्रेयपनिषत् ३ इतिमाहात्म्योपनिषत्समाप्ता ४९ ॥ श्री अथ कालाग्निरुद्र
भगवंतंसनत्कुमारः पप्रच्छ अधीहिभगवन्त्रिपुण्ड्रविधिंसतत्त्वंकिंद्रव्यंकिंयत्स्थानंक
तिप्रमाणंकारेखाकिंदैवतंकेमन्त्राः काशक्तयःकिंफलमितितंहोवाचभगवान्यद्द्र
व्यंतदाग्नेयंभस्मसद्योजातादिपंचब्रह्ममन्त्रैःपरिगृह्याग्निरितिभस्मेत्यनेनाभिमन्त्र्यमानस्तो
केतिसमुद्धृत्यमानस्तोमहान्तमितिचालोड्य त्र्यम्बकं यजामहे इति शिरोललाटवक्षःस्क
न्धेष्वितितिसृभिस्त्र्यायुषैस्त्र्यम्बकैस्तिर्यक्तिसृभिर्विरेखाःप्रकुर्वीतव्रतमेतच्छांभवंसर्व

वेदेषु वेदवादिभिरुक्तं तत्समाचरेत् मुमुक्षुर्न पुनर्भवाय अथ सनत्कुमारः प्रपच्छ त्रिपुण्ड्रस्य
ललाटादावक्षुषोर्मध्यतः १ यास्य प्रथमा रेखा सा गार्हपत्यश्चाकारो रजो भूर्लोकश्चा
त्मा क्रियाशक्तिरृग्वेदः प्रातःसवनं महेश्वरो यास्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्व
मन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यंदिनं सवनं शिवो यास्य तृतीया रेखा साऽऽ

हवनीयो मकारस्तमो द्यौः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयसवनं देवतेति त्रिपुण्ड्रं
भस्मना करोति यो विद्वान् ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा स समस्तमहापातको
पपातकेभ्यः पूतो भवति स सर्वान् देवान् ध्यातो भवति स सर्वेषु तीर्थेषु स्नातो भवति स सर्वेषु तीर्थे
षु स्नातो भवति स सततं रुद्रजापी भवति स सकलभोगान्भुक्त्वा देहं त्यक्त्वा शिवसायुज्यमे
ति न स पुनरावर्तते इत्याह भगवान् कालाग्निरुद्रः यस्त्वेतदधीते सोऽप्येवमेव भवतीत्यों
सत्यमित्युपनिषत् इति कालाग्निरुद्रोपनिषत्समाप्ता ६० श्रीकृष्णाय परमं मंगल
मूर्तये नमः तत्र कृष्णः कृष्णात् कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचक तयोरैक्यं
परं ब्रह्म कृष्ण इत्यभिधीयते ॐ सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे नमो वेदान्तवे
द्याय गुरवे बुद्धिसाक्षिणे ॐ मुनयो ह वै ब्रह्माणमूचुः कः परमो देवः कुतो मृत्युर्बिभेति क

सविज्ञानेनाखिलं विज्ञातं भवति केनेदं विश्वं संसरतीति ततु होचुः कः कृष्णो गोविंदं कोसा
विंति गोपीजनवल्लभः कः का स्वाहेति तानुवाच ब्राह्मणः पापकर्षणो गोभूमिवेदविदितो
वेदिता गोपीजनाविद्याकलाप्रेरकः तन्माया चेति सकलं परं ब्रह्म तद्यो ध्यायति रसति
भजति सोऽमृतो भवतीति १ ते होचुः किं तद्रूपं किं रसनं कथं वाहो तद्भजनं तत्सर्वं विविदिषू
तामाख्याहीति तदु होवाच हैरण्यो गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितं तदिह श्लोका
भवंति सत्पुंडरीकनयनं मेघाभं वैद्युतांबरं द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरं गोप
गोपीगनावीतं सुरद्रुमतलाश्रयं दिव्यालंकरणोपेतं रत्नपंकजमध्यगं कालिंदीज ल
कल्लोलासंगिमारुतसेवितं चिंतयंश्चेतसा कृष्णं मुक्तो भवति संसृतेरिति तस्य पुना
रसनं भजनं भूम्यादुस्यात्तः कामादि कृष्णायेत्येकं पदं गोविंदायेति द्वितीयं गोपीजनेति तृ
तीयं वल्लभायेति तुरीयं स्वाहेति पंचमं पंचपदी मजपन् पंचांगं द्यावाभूमी सूर्याचंद्रमसौ साग्नी त
द्रूपतया ब्रह्म संपद्यत इति २ तदेष श्लोकः क्लीमित्येतदादावाद्यात्मेवैपरिश्रवाग्निरि
ति भूमेत्सनेनचाभिमन्यमानस्तोके तिसपुडूममानो महातमिति चालोच्य पंचकं नाम।
हेत्यंति शिरोललाटचहस्त दायकृष्णायगोविंदायेति गोपीजनवल्लभायस्वाहेत्यनयप

मेतदप्युच्चेरेतेयोगास्तिस्तस्यास्तिर्मुमुक्षुर्नीयांगातिसंभृतिभक्तिरस्यभजनेनतदिहामुत्रोपाधिनैराश्ये
नैवामुष्मिन्मनःकल्पनमेतदेववचनेः कर्मेक्तसंज्ञातेविप्राव्रज्यायजंतिगोविंदंसंतवज्ञथार
मेति गोपीजनवल्लभोभुवनानिदध्रेस्वाहाश्रितोजगदेजयत्स्वरेताः वायुर्यथैकोभुवनं
उ. प्रविष्टोजन्येपंचरूपोवभूवकृष्णस्तथैकोजगद्धितार्थंशब्देनासौपंचपदोविभातीतिउ
६०. होचुः उपासनमेतस्यपरमात्मनोगोविंदस्याखिलाधारिणोब्रूहीतितानुवाचयत्तस्यपी
ठंहैरण्यमष्टपलाशमंबुजंतदंतरालिकानलाश्रयुगंतदंतरार्णाखिलबीजंकृ
ष्णायनमइतिबीजंब्रह्मशब्दाणामाधायानंगगायत्रींयथावद्व्यालिख्यभूमंडलंशूलवे
ष्टितंकृत्वावासुदेवादिरुक्मिण्यादिस्वशक्तींद्रादिवासुदेवादिपार्थादिनिध्यावृतंयजे ।
त्संध्यासुप्रतिपत्तिभिरुपाचारैस्तेनास्याखिलंभवत्यखिलंभवतीति ४ तदिहश्लोका
भवंतीतिएकोवशीसर्वगःकृष्णईड्यएकोपिसन्बहुधायोविभातितंपीठस्थंयेनुयजं
तिविप्रास्तेषांसिद्धिःशाश्वतीनेतरेषांयतद्विष्णोःपरमंपदंयेनित्योदयुक्ताःसंजयंतेकामा
न्नतेषामसौगोपरूपप्रयत्नात्प्रकाशयेदात्मपदंतदेवयोब्रह्माणंविदधातिपूर्वंयोवि ।
द्यास्तस्मैगापयतिस्मकृष्णस्तंहदेवमात्मवृत्तिप्रकाशंमुमुक्षुर्वैशरणमनुव्रजेत ओंकारे

णांतरितंयोजयतिगोविंदस्यपंचपदंमंत्रंतंतंमेवासौदर्शीपदान्मध्येनस्मात्तत्पुरुहात्म्य
सेनित्यशोभे यतस्मादस्यपंचपदावभूवनूणांविंदस्यमनूंचोभ्मानवानांदृशीगांयास्मि
संकेदनोधेश्वश्यस्यतेभूतिकामेर्षयावत् तदेतत्स्यस्वरूपार्थवाचोवेदघेतेतेपश्चकुःतेडृहो
वाचश्रोत्रस्रणोसावनवरतंमेध्यातःस्तुतः परार्द्धांतमोवुध्यतगोपवेषोमेपुरस्तादाविर्भू
वततःप्रणतोमयानुकूलेनहृदामसमष्टादशार्णांस्वरूपंसृष्ट्येदत्वोतर्हितःपुनःसिसृ
क्षतोमाइभवेष्वरेश्वभविष्यजगद्रूपंप्रकाशयंतदिह आकाशाद्वायोजलान्पृथिवीततोग्नि
विंदोरिंडत्वसंपातादर्केउतोक्लिंकारादस्रजेकोसादाकाशवायूपृथिव्यतरासभरभि
विद्याःआहरकार्थतउत्तरात्सीपुंमादिचदसकलमिदसकलमितिपूतस्यवघजनेनच
ऋघूत्तोयात्मोहमान्मानवेदपिबोकारात्तरालिकमनुमावर्तयन्संरहितोध्यायतत्त ते
ह्लिसोःपरमंपदंमदापश्यंतिसूरयःदिवीवचक्षुरात्ततेनस्मादेतन्निस्यमभ्यसेन्नित्यमभ्यसे
दिति तदाहुरेकेयस्यप्रथमपदाभूमिर्द्वितीयपदोजलंतृतीयपदातैतस्चतुर्थोवायुःपंच
मोव्योमेतिवैस्सवंपंचव्याहृतमयमंत्रंकृत्स्नावभासंकैवल्यस्यमेसततमावर्तयदितितदत्र
गाथाःयस्यपूर्वपदाद्भूमिर्द्वितीयात्सलिलोद्भवस्तृतीयात्तेजउद्भूतंचतुर्थाद्गंधवाहनःपंच

मादवेशेत्पत्तिस्त्वमेवैकंसममभ्यसेत चंद्रध्वजोगमद्दिलोः परमंपदमव्ययं ततोविशुद्धवि
मलविशोकमंत्रोपलोभादिनिरस्तसंगायतत्पदंपंचपदंमवासुदेवोनयनोन्यदस्ति तमे
कंगोविंदंसच्चिदानंदविग्रहंपंचपदंवृंदावनेसुरभूरुहतलासीनंसततंमरुद्गणोहंपर
मयास्तुत्यातोषयामि ॐनमोविश्वरूपायविश्वस्थित्यंतहेतवे विश्वेश्वरायविश्वायगो
उ० विंदायनमोनमः १ नमोविज्ञानरूपायपरमानंदरूपिणे कृष्णायगोपीनाथायगो
१८ विंदायनमोनमः २ नमःकमलनेत्रायनमःकमलमालिने नमःकमलनाभायकम
लापतयेनमः ३ बर्हापीडाभिरामायरामायकुंठमेधसे रमामानसहंसायगोविंदायन
मः ४ कंसवंशविनाशायकेशिचाणूरघातिने वृषभध्वजवंद्यायपार्थसारथयेनमः ५
वेणुवादनशीलायगोपालायाहिमर्द्दिने कालिंदीकूललोलायलोलकुंडलवल्गवे ६
वल्लवीनयनांभोजमालिनेनृत्यशालिने नमःप्रणतपालायश्रीकृष्णायनमोनमः ७
नमःपापप्रणाशायगोवर्द्धनधरायच पूतनाजीवितांतायतृणावर्त्तासुहारिणे ८ निष्क
लायविमोहायशुद्धायाशुद्धवैरिणे अद्वितीयायमहतेश्रीकृष्णायनमोनमः ९ प्रसीद
परमानंदप्रसीदपरमेश्वरं आधिव्याधिभुजंगेनदष्टंमामुद्धरप्रभो १० श्रीकृष्णरुक्मि

णीकांतगोपीजनमनोहरः संसारसागरेमग्नंमामुद्धरजगद्गुरो ॥ केशवक्लेशहरणनारायण
जनार्दन गोविंदपरमानंदमांसमुद्धरमाधव ॥ अथहैवंस्तुतिभिराराधयामितेयूयंतथाप
चपदंजपंतःकृष्णंध्यायंतःसंसृतिंतरिष्यथेतिहोवाचहैरण्यःअमुंपंचपदंमंत्रमावर्त्तयेद्यःस
यात्यनायासतःकेवलंतत् अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्षदिति त-
स्मात्कृष्णएवपरोदेवस्तंध्यायेत्तंरसेत्तंभजेत्तंभजेत्तंदिमोंतत्सदिति इत्यथर्वणेगोपा
लपूर्वतापनिषत्समाप्ता ॥ ॥ एकदाहिव्रजस्त्रियःसकामाःशर्वरीमुषित्वासर्वेश्व
रंगोपालंकृष्णंहिताऊचिरे उवाचताःकृष्णअमुष्मैकस्मैब्राह्मणायभैक्ष्यंदातव्यंभवतिदुर्वास
सइतिकथंयास्यामोतीर्त्वाजलंयमुनायाःयतःश्रेयोभवतिकृष्णेतिब्रह्मचारीत्युक्त्वामार्गंवोदास्य-
तियंमांस्मृत्वा अगाधागाधाभवतियंमांस्मृत्वाऽपूतःपूतोभवति यंमांस्मृत्वाऽव्रतीव्रतीभवतितद्वा
वाचेरुद्रेवस्मृत्वातद्वाक्येनतीर्त्वातत्सौर्यांहिवैगत्वाऽश्रमंपुण्यतमंनत्वामुनिंश्रेष्ठंदिश्रेष्ठत
मंरौद्रंचेतिदत्वास्मैब्राह्मणायक्षीरमयंघृतमयमिष्टतमंमृष्टतमंदत्वातुष्टः स्ना-
त्वाभुक्त्वाशिषंप्रयोज्याज्ञांवाऽदात्कथंयास्यामोतीर्त्वासौर्यां सहोवाच मुनिर्दुर्वाससंमां
स्मृत्वावोदास्यतीतिमार्गंतासांमध्येश्रेष्ठागांधर्वीह्युवाच सहोवाच साहवैताभिरेवंवि-

चार्यं कथं कृत्स्नो ब्रह्मचारी कथं दुर्वासिनो मुनि तीर्हिमान्यां विधाय पूर्ववमनुकृत्वा कृष्णी-
माम्प्रशब्दवानाकाशः शब्दाकाशाभ्यां भिन्नस्तस्मिन्नाकाशे तिष्ठति स्याकाशस्तेन वेदस
स्तात्माहं कथं भोक्ता भवामि १ स्पर्शवान्वायुभ्यां भिन्नस्तस्मिन्वायौ तिष्ठति वायुर्न वेदिते
हि सस्तात्माहं कथं भोक्ता भवामि रूपवदिदं हि तेजो रूपाग्निभ्यां हि भिन्नस्तस्मिन्नग्नौ तिष्ठ-
३५. ति अग्निर्न वेद तेन सस्तात्माहं कथं भोक्ता भवामि २ रसवत्य आपो रसाद्भिन्नस्तास्वप्सु ति
८२ ष्ठत्यापो न विदुस्तेहि सस्तात्माहं कथं भोक्ता भवामि ३ गंधवती यं भूमिर्गंधभ्यो हि भिन्नस्त-
म्मा ० स्यां भूमौ तिष्ठति भूमिर्न वेद तेहि स स्तोहं कथं भोक्ता भवामि ४ [illegible] ग्रंधेभ्यो
हि भिन्नस्तस्यां भूमौ तिष्ठति भूमिर्न उदं हि मनस्तेषु वहि मनुते नानिंद्य इत्याति पत्रसर्वमा
त्मेवो भिषा[illegible]वा कुत्र भवते कवा गच्छतीति सस्तात्माहं कथं भोक्ता भवामि ५ अयं हि कृ
स्नो यो वा हि पुष्टः शरीरद्वयकारणी भवति हृस्वपरांगी भवतो ब्रह्मणो ज्ञाभूत स्वथैतरो भो
क्ता भवति अयं यो हि साक्षी भवति ६ हृदयमेतो तिष्ठतः अभोक्ता भोक्ता वा पूर्वो हि भोक्ता भ-
वति ७ यो हि वेकामेन कामान् कामयते सकामी भवति यो हि वेन्नकामान् कामयते सोऽका
मी भवति जन्मजराभ्यां भिन्नस्यात्तरयमच्छेयो यं पोसौ सूर्ये तिष्ठति यासौ गोपेषु तिष्ठति यो

सोसर्वेषुतिष्ठतियोसोसर्वैर्वेदैर्गीयतेयोसोसर्वेणाभूतेष्वासोपिपश्यैतिष्ठतिभूतानिविश्वा
तिसर्वोहिस्वामीभवतीति ८ सवोवाचगोपर्वीकथंवास्मात्सञ्जातोसोनयाम्नेन कुसाः
कोवास्यमंत्रः किंवास्यस्थानंकथंवादेवकाजातःकोवास्यज्ञायात्तरोमाभवतिकोह
षीपूज्यास्यगोपालस्यभवति साक्षात्प्रकृतिपरोयमात्मागोपालः कथंत्ववतीर्णोभू
म्योर्हि ९ सहोवाचताहिवैपकोतिवेष्टूर्वैनारायणोदेवयस्मिन्नलो काउताश्चप्रोताश्च
तस्यहृत्पद्माद्याजातोब्रह्मयोनिः सपितानसह्रवरंददौसकामप्रस्नमेववव्रतेतस्मैददौ स
होवाचावतारोघोनिरवतारणांमध्येश्रेष्ठोवतारः कोभवतिनायेनलोकाःतुष्टादेवास्तुष्टाभ
वंतियंस्मृत्वामुक्ताअस्मात्संसाराद्भवंतिकथंवास्यावतारस्यब्रह्मतानाभवति १० सहोवाच
तेहिवैनारायणोदेवःसकाम्यमेरोःशृंगेयथासप्तमस्यर्धीभवंतितथानिष्कामास्सकाम्या
श्वभूतानांभवति ११ यथाहिवैसरसिपद्मतिष्ठतचक्रेणारक्षितानाहिचैमथुराणंतस्मागोपाल
पुरीहिभवतीति बृहद्बृहद्वनंमध्यमधुवनंतालवनंतालवनंकाम्यंकाम्यवनं बकुलोबकुल
वने कुमुदंकुमुदवने खदिरःखदिरवनंभद्रोभद्रवनंभांडीरइतिभांडीरवनंलोहवनंवृंद
वावनंयतैराहताःपुरीभवति १२ तत्रेतेष्वेवगहनेष्वेवदेवामनुष्यानागागंधर्वाःकिंनरा

गायंतीति तत्र द्वादशादित्या एकादश रुद्रा अष्टौ वसवः सप्तमुनयो ब्रह्मा नारदश्च पं
च विनायका वीरेश्वरो रुद्रेश्वरो विश्वेश्वरो नीलकंठो नीलकंठेश्वरो गोपालेश्वरो भद्रेश्वरश्चत्वा
रि लिंगानि चतुर्विंशतिर्भवंति द्वे वने स्तः कृष्णवनं भद्रवनं तयोरंतर द्वादश वनानि पुण्या
नि पुण्यतमानि तेष्वेव देवास्तिष्ठंति सिद्धाः सिद्धा सिद्धिं प्राप्ताः तत्र हि रामस्य राममूर्तिः
उप· प्रद्युम्नस्य प्रद्युम्नमूर्तिरनिरुद्धस्यानिरुद्धमूर्ति कृष्णस्य कृष्णमूर्ति वनेष्वेवं मथुरास्वे
९३ वं द्वादश मूर्तयो भवंति २२ एकां हि रुद्रा यजंति द्वितीयां ब्रह्मा यजति तृतीयां ब्रह्मया
जयंति चतुर्थीं मरुतो यजंति दशमीं हि देवो यजंति दानेतिष्ठंति एकादश्यं तरिक्ष पदं ग
तात्द्वादशां तु भूम्यां तिष्ठंति तान्हि ये यजंति ते मृत्युं तरंति मुक्तिं लभंते गर्भजन्मजराम
रणतापत्रयात्मकं दुःखं तरंति तदप्येते श्लोकाः २४ प्रथमा मम युगपत्तीरस्या महाब्रह्मा
दिसेविता शंखचक्रगदाशार्ङ्गरक्षितां मेखलादिभिः यात्रासौ संस्थितः कृष्णस्त्रिभिः श श्री
क्त्यासमन्वितः रामानिरुद्धप्रद्युम्नैः रुक्मिण्या सहितो विभुः चतुः शब्दो भवेदेको ह्योंका
रः समुदाहृतः तस्मादेव परो रजसेति सोहमित्यवधार्य्य गोपालोहमिति भावयेत्
स मोक्षमश्नुते स ब्रह्मत्वमधिगच्छति स ब्रह्मविद्भवति गोपान्जीवानात्मत्वेना।
९३

स्यर्षिर्यंतिमालातिसगोपालोभवतिसोतह्येतमत्परंब्रह्मकृष्णात्मकोनित्यानंदै
करूपःसोहमितितगोपालएवपरंसत्यमबाधितंसोहमित्यात्मानमादायमनसैक्यंकु
र्यात्आत्मनागोपालोहमितिभावयेत् सएवाव्यक्तोऽनंतोनित्योगोपालः मथुरायांस्थिति
रस्मिन्सर्वदामेवभविष्यति शंखचक्रगदापद्मवनमालाधृतस्मृते विश्वरूपंपरंज्योतिः
स्वरूपंरूपवर्जितं सदामांसंस्मरन्ब्रह्मन्मत्पदंयातिनिश्चितं मथुरामंडलेयस्तुजंबूद्वीप
स्थितोऽपिवा योर्चयेत्प्रतिमांप्रतिमांचममप्रियतरोभवति २५ यस्यामपिष्ठितःकमल
योपूज्यस्त्वयासदा वनेष्ठाचास्याधिकारिभेदस्तेनपूजेतिमां यागानुवर्तिनालोकायजे
तोहंस्वमेवयमः गोपालेसानुजेरामेरुक्मिण्यांसहतत्परे गोपालोहमजोनित्यःप्रद्युम्नोहं
सनातनःरामोहंरुक्मिणिरुद्रोहमात्मानमर्चयेद्बुधः मयोक्तेनस्वधर्मेणानिष्कामेनविभाग
शःतेरघेपूजनीयोवैभद्रकृष्णनिवासिभिः तद्धर्मगतिहीनायेतस्यामपिपरायणाःक
लिनाग्रसितायेचतेषांतस्यामवस्थिति यथात्वंसहपुत्रैस्तुयथारुद्रोगणैःसह यथाश्रि
याभियुक्तोहंतथाभक्तोममप्रियः २८ सहोवाचाब्जजन्मानिचतुर्भिर्देवैःकथमेकोदेवःस्या
त् एकमक्षरंयद्विश्रुतंअनेकाक्षरंकथंभूतंसहोवाचतंहिवैसर्वेहामेवाद्वितीयावस्थिति

त तस्माद्व्यक्तं व्यक्तमेवाहं तस्मादहंकाराद्व्यक्तमहतो वै अहंकारः तस्मादेवाहंकारांसचेतना
मात्राणि तेभ्यो भूतानि तैराहंतमहत्वे भवति अतो हमोंकारो हमजो मरो भयामृतो ब्रह्म
भयं हि चैम: अजोहमस्मि अहरो हमस्मि सत्तामात्रं चित्स्वरूपप्रकाशं व्यापकं तथा यकमे
वाद्वयं ब्रह्म मायया त चतुष्टय रोहिणीतनयो रामो अकाराक्षरसंभव तैजसात्मक प्रद्युम्न
उकाराक्षरसंभव प्रज्ञात्मको निरुद्धो मकाराक्षरसंभवे अर्धमात्रात्मकः कृष्णो यस्मिन्वि
श्वं प्रतिष्ठितं कृष्णात्मिका जगत्कर्त्री मूलप्रकृति रुक्मिणी व्रजस्त्रीजनसंभूत श्रुतिभ्यो
ब्रह्मसंगत प्रणवत्वेन प्रकृतित्वं वदंति ब्रह्मवादिनः तस्मादोंकारसंभूतो गोपालो विश्वसं
स्थितिः क्लीमोंकारमेकत्वं पठ्यते ब्रह्मवादिभिः मथुरायां विशेषेण मां ध्यायन्मोक्षमश्नुते
अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितं शिवांकुजातयं स्त्रविश्लितं चरणाहयं श्रीवत्सला
ञ्छनं हृत्स्थ कौस्तुभप्रभया युतं चतुर्भुजं शंखचक्रशार्ङ्ग पद्मगदान्वितं सुकेयूरान्वितं बा
हुं कंठमालासुशोभितं द्युमत्किरीटमभयं स्फुरन्मकरकुंडलं हिरण्मयं सौम्यतनुं स्वभक्ता
याभयप्रदं ध्यायेन्मनसि मां नित्यं वेणुशृंगधरं तु वा मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन
वा तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते अष्टदिक्पालभिर्भूवपद्मं विकासितं जगत्सं

उ- ९८ क

सारांगीवंसेनांतेसेवितेसममानैसः चंद्रसूर्यौवौचित्तार्धजमेकाहिरण्यः आनतपंत्रेव
स्तलोकेसमेयोर्धचभगास्मते श्रीवत्सेचवस्वरूपेचवर्ततेलोक्ष्कैनेः सहश्रीवत्सलोक्ष्कनेन।
स्मात्कथ्यतेवुस्त्वादिभिः येनसूर्याग्निवाकचंद्रतेजसास्वस्वरूपधिणावर्तनेकोस्तुभा
ख्यमणिवर्तनीशमानिनः सर्वात्मसमस्तहकारस्थनविषयः पंचभूतात्मकः शाखः
परोजसिस्मरत चक्रस्वरूपमत्यंतेमनस्वश्चंनिगद्यते आयामायाभवेक्ताहं पद्मेवि
ष्वकरोस्थिते आयाविद्यागदावेधामवेदामेकरोस्थिता धर्मार्थकाममेकेपूर्वैर्दिव्यैनिनमम·
वारिते केवंख्यातिभूतांपोतेमालयतेअप्यपाजया मालानिगद्यतेव्रत्सत्ववपुत्रेलमान
सेः कूटस्थस्यस्वरूपेनकिरीटश्रवदंतिमे हरोदलवेप्रस्फुरितेकुंडलेयुगलेस्मृते या
येनमस्त्रिपीनिसंसमोलमयिगच्छति सन्मुक्तोभवतितस्मानेददामिवै पतन्मेवभ
विष्यतिवममवामोकेदुयेनवस्वरूपेद्विविधंचैवसगुणानिर्गुणंतथा ९ सत्योवाचाज्ञ
योनिःव्यक्तानामूर्तीनाश्रोकानाकथंवावधारणाभवति कथंवादेवयाजंतिहृदाय
जंतिअलाजेयतिविनायकायजंतिवसवोयजंतिअप्सरोयजंतिगंधर्वायजंतिपदंगा
यजंतियंतहांनेतिष्ठतिकथमनुष्यायजंति सत्योवाचतेनहूचेनारायणदेवआयाश्या

क्ताह्लादयामृर्तयः सर्वेषुलोकेषुसर्वेषुवेदेषुसर्वेषुमनुष्येषुनिष्ठेतिहृदिषुरोहींब्रह्माण्येवब्रह्माणीदेवे
षुदेवीमनुष्येषुमानुषीविनायकेषुविघ्ननाशिनी आदित्येषुज्योतिर्गंधर्वेषुगांधर्वीअप्सरःस्ववे
गेः वसुष्ववेकाम्या अंतर्हीनेप्रकाशिनी आविर्भावतिरोभावास्वपदेतिष्ठति तामसीसात्विकी
३५· राजसीमानुषीविज्ञानघनआनंदघनः रविनेदकारमेभक्तियोगेनिष्ठति १२ ॐप्राणात्मने॰
९५ ह्रांतत्सत्भूर्भुवः स्वः तस्मैप्राणात्मनेनमोनमः १ ॐह्रींकृष्णायगोविंदायगोपीजनवल्लभाय
ह्रांतत्सत्भूर्भुवः स्वस्तस्मैनमोनमः २ ॐह्रींअपानात्मनेह्रांतत्सद्भूर्भुवः स्वस्तस्मैअपानात्मनेन
मोनमः ३ ॐह्रींकृष्णायप्रद्युम्नायानिरुद्धायह्रांतत्सद्भूर्भुवः स्वस्तस्मैवेनमोनमः ४ ॐह्रींसमानात्म
नेह्रांतत्सद्भूर्भुवः स्वस्तस्मैसमानात्मनेनमोनमः ५ ॐह्रींकृष्णायसमानायह्रांतत्सद्भूर्भुवः स्व
स्तस्मैवेनमोनमः ६ ॐह्रींउदानात्मनेह्रांतत्सद्भूर्भुवः स्वस्तस्मैव्यानात्मनेनमोनमः ७ ॐह्रीं
कृष्णायदेवकीनंदनायह्रांतत्सद्भूर्भुवः स्वस्तस्मैवेनमोनमः ८ ॐह्रींव्यानात्मनेह्रांतत्सद्भूर्भुवः
स्वस्तस्मैव्यानात्मनेनमोनमः ९ ॐह्रींगोपालायनिजस्वरूपायह्रांतत्सद्भूर्भुवः स्वस्तस्मैवेनमो
नमः १० ॐह्रींयोसौप्रधानात्मागोपालः ह्रांतत्सद्भूर्भुवः स्वस्तस्मैवेनमोनमः ११ ॐह्रींयोसावविद्
यात्मागोपालाह्रांतत्सत्भूर्भुवः स्वस्तस्मैवेनमोनमः १२ ॐह्रींयोसौभूतात्मागोपालः ह्रांत
९५

त्स्मतभूर्भुवःस्वस्तस्मैनमोनमः १३ ॐढीयोसावुत्तमःपुरुषोगोपालःढीतत्स्मद्भूर्भुवःस्वस्त
स्मैनमोनमः १४ ॐढीयोसौपरंब्रह्मगोपालेढीतत्स्मतभूर्भुवःस्वस्तस्मैवैनमोनमः १५ ॐढी
योसौसर्वभूतात्मागोपालाढीतत्स्मतभूर्भुवःस्तस्मैवैनमोनमः १६ ॐढीयोसौजाग्रत्स्वप्नसुषु
प्तमतीत्यतुर्यातीतोगोपालःढीतत्स्मद्भूर्भुवःस्वस्तस्मैवैनमोनमः १७ एकोदेवःसर्वभूतेषु
गूढःसर्वव्यापीसर्वभूतांतरात्माकर्माध्यक्षःसर्वभूतांतरात्माधिवासःसाक्षीचेताकेवलो
निर्गुणश्च रुद्रायनमः आदित्यायनमः विनायकायनमः सूर्यायनमः विद्यायैनमः इंद्रा
यनमः अग्नयेनमः पित्रेनमः निर्ऋतेनमः वरुणायनमः मरुतेनमः कुबेरायनमः ईशा
नायनमः ब्रह्मणेनमः सर्वेभ्योदेवेभ्योनमः दत्वास्तुतिं पुण्यतमांब्रह्मणेस्वस्वरूपिणेकर्तृ
त्वंसर्वलोकानामंतर्धानंबभूवसःब्रह्मणोब्रह्मपुत्रेभ्योनारदाच्छ्रुतंयथा तथाप्रोक्तंतवगा
धर्वीमिच्छन्स्वालयांतिका इतिअथर्वणोपनिषदिगोपालतापिन्युत्तरखंडःसमाप्तः ५९ ते
होचुस्तस्वरासर्वेभगवंतंसनातनं नोवयमेवतावान्वेशृण्वंतेनैवभूतेल श्रुतपावनावास्ते हि
गोपालःसौभाग्यरूपवांन्याधिरूढ्यतेतावागस्पर्शनाद्विना शश्वत्स्पर्शापितेसाकंशृण्वते
प्रवतरान्वयं रुद्रादीनांवचःश्रुत्वाप्रोवाचभगवान्स्वयं अंगसंगंकरिष्यामिभवद्वाक्यंक

रोम्यहं मोदितास्तेसुराः सर्वेकृतकृत्याश्चुनावयं योनंदः परमानंदः यशोदामुक्तिगेहिनी मया
सावित्रीविद्यासोकामस्तवरानसत्तामसीप्रोक्तामतीचरुद्रशाभक्तेब्रह्मागारराजसी तामसीदेव्या
पत्नेश्रुमायाग्रथाप्युदाहृता अजप्याविन्नसर्वीमध्याप्यजेनसात्विनाभुरा देवकीब्रह्मविद्यासा
यावेदैरुपगीयते निगमोवसुदेवोपोवेदार्थकृष्णरामयोः श्रवंतिसततंयत्नेसोवतीर्णो
उप. ९९ महीतले वनेवृंदावनेक्रीडन्गोपगोपीसुरैःसह गोप्यागावऋचस्तस्ययष्टिकाकमला
सनः वंशश्चभगवान्रुद्रः शृंगमिंद्रः सखासुराः गोकुलंकुलवैकुंठेतापसास्तत्रतेद्रु
माः लोभक्रोधादयोदैत्याः कलिकालस्तिरस्कृतो गोपरूपोहरिःसाक्षान्मायाविग्रहधारि ली
दुर्बोधकुहकंतस्यमायायामोहितंजगत् दुर्जयासासुरैःसर्वैर्यदिरूपोभवद्विधिः रुद्रोयेन
कृतोवशातस्यमायाजगत्कथं बलंज्ञानंसुराणांवैतेषांज्ञानंहृतंक्षणात् शेषनागोभ
वद्रामःकृष्णोब्रह्मैवशाश्वतं अष्टावष्टसहस्रेद्वेशतंताधिकाःस्त्रियः तथाश्रुत्योपनिषद
दस्ताश्चेब्रह्मरूपास्तथास्त्रियः द्विषश्चाणूरमल्लोयंमत्सरोमुष्टिकोजयः दर्पःकुवल
यापीडोगर्वोरक्षोवकोवलादिभिर्यारुतेविलुचेद्दनंममोतोजतिदिनमालिनेगोपीभिः
प्रक्षालनांर्त्रायीचेदनमाल्येतमंगलेपने शोपचक्रातीर्थातस्थितचक्रसमाश्रुकोयो

तवांगेमुक्तिसायुज्यंभवति १ अथगोपीचंदनंनमस्कृत्वाहस्तगोपीचंदनपापघ्नविस्नदेहसमु
द्भवः चक्रांकितनमस्तुभ्यंधारणान्मुक्तिदोभवेतिअथैनंइमंमेगंगेतिजलमादायविस्नोर्नुकमि
तिमर्दयेत् अतोदेवाअवन्तुनइत्येताभिर्ऋग्भिर्विस्नविष्णुगायत्र्याचालिवातिमभिमंत्र्य शंख
चक्रगदापाणेद्वारकानिलयाच्युत गोविंदपुंडरीकाक्ष रक्षमांशरणागतमितिमंत्रेणहस्ता
हस्त्याललाटादिद्वादशस्थलेषुनामिकांगुल्याविस्नगायत्र्याकेशवादिद्वादशनामभिर्धा
रयेत् ब्रह्मचारीवानप्रस्थोवाललाटकंठहृदयवाहुमूलेषु वैस्नवगायत्र्याकृस्नादिपंचना
मभिर्वाधारयेत् यतस्त्वेमाशिरेललाटहृदयेषुप्रणवेनधारयेत् ब्रह्मादयोस्त्रयोमूर्त्तयोपि
स्त्रोव्याहृतयस्त्रीणिछंदांसित्रयोवेदास्त्रयःस्वरास्त्रज्योतिषंत्रयःत्रयःकालास्ति स्त्रोवव
स्थास्त्रयपुयात्मानः पुंड्रास्त्रयऊर्ध्वाअकारोकारमकाराएतेसर्वेप्रणवमयोर्ध्वपुंड्रत्रयात्मकोस्त्व
देहेदोमितेकथासममभवत् परमहंसोललाटेप्रणवेनैकमूर्ध्वपुंड्रंवाधारयेत् तद्दीपप्रका
शंस्वमात्मानंपश्यन्ब्रह्मैवाहमस्मीतिभावयन्योगीमेसायुज्यमवाप्नोति २ अथास्माद्
हृदयस्योर्ध्वपुंड्रमध्येवाहृदयकमलमध्येवास्वात्मानंभावयेत् तस्यमध्येवह्निशिखाग्र
णीयोर्ध्वाव्यवस्थितानीलतोयदमध्यस्थाविद्युल्लेखेवभास्वरानीलमस्तकवत्तन्वीपीताभा

स्वादराणयमानस्य: शिवायामध्येतु परमात्मा व्यवस्थितः सूर्यमंडलमध्यस्थं हृत्पद्मे ततनो ग्य
मेत् क्रमादेवं स्वमात्मानं भावयेन्मां परं हरिं एकाग्रमनसा योगी ध्यायेत परमव्ययं हंसं केय
स्वमात्मानं सम्यक् कोनात्र संशयः सद्रूपमद्वयं ब्रह्म मध्याद्यंतविवर्जितं स्वप्रभं सच्चिदानंदम
नन्यज्ञानानि चाव्ययं एको विष्णुरनेकेषु जंगमस्थावरेषु च अनंतरूपो वसात्यात्मा भूतेषु
३५: स हृव्यवस्थितः तैलं तिलेषु काष्ठेषु वह्निः क्षीरे घृतं यथा गंधः पुष्पेषु भूतेषु यथात्मा वस्थितोप्यहं स
१०७ स यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः देहादि
रहितः सूक्ष्मश्चिन्मयकाशो निरंजनः सर्वांतरः परमहंसः तं परं ब्रह्म भवाम्यहं एवं स्वं ब्रह्मवो मध्या
योगवित् स ऊर्ध्वपदमाप्नोति यत्र किंध्येचतत्पदान् अपेतं निश्चितं ज्ञानं मत्र न्यासिद्ध्यतिवे
ये नित्यमेकाग्रभक्तिस्तु गोपीचंदनधारणात् ब्राह्मणानां तु सर्वेषां वैदिकानामनुत्तमं गो
पीचंदनवारिभ्यामूर्ध्वपुंड्रं विधीयते योगोपीचंदनाभावे तुलसीमूलमृत्तिका मुमुक्षुर्धारये
न्नित्यमपरोक्षार्थसिद्धये गोपीचंदनलिप्तांगो देहस्थानं च तत्क्षयः अस्थीनि चक्रलक्ष्मीणि
भवंत्येव दिने दिने २ अथ यात्रावशिष्टोत्र भस्मना यत्रैभस्म रीदं विष्णु श्रीणि पदेति विष्णुगा॰
यत्राग्रप्रणावेनाहूलनं कुर्यात् एवं प्रथमा गोपीचंदनधारये यस्त्वदर्थाने वासमर्वमहापातः॰

दपे विं
तपेकुरिंगे
कोंवदनम
तिपाय
इधत्ता
कुपाम
॥ऊं द्धं
ऊषरेता
१०७ ५

केभ्यःपूतोभवति पापबुद्धिस्तस्यनजायतेसर्वेषुतीर्थेषुस्नातोभवति सर्वैर्यज्ञैर्याजीभ
वति यज्ञैःपूज्योभवति नारायणोऽस्याप्यचलाभक्तिश्चवर्द्धतेसम्यक्ज्ञानंलब्ध्वाविष्णुसा
युज्यमाप्नोतिचनचपुनरावर्त्ततेतद्विष्णोःपरमंपदंसदापश्यंतिसूरयःदिवीवचक्षुराततंतत्
द्विप्रासोविपन्यवोजागृवांसःसमिंधतेविष्णोर्यत्परमंपदं इतिवासुदेवोपनिषत् गोपी
कांतामसेरक्षणात्कृतःसंरक्षणात् लोकस्यनरकान्मृत्योर्भयाच्चसंरक्षणाच्चंदनेनत्रिकरणाच
किंनुत्रिकरणात्ब्रह्मानंदकारणाद्यएवंविद्वानेतद्धारयेत् यएतद्धारयेत्गोपीचंदनं
मृत्तिकापानिरुक्तानिधारणेनमात्रेणचब्रह्मलोकेमहीयतेब्रह्मलोकेमहीयतइति १ गोप्यो
नामविष्णुपत्न्यःसुलासोचंदनमाह्लादनेकस्माह्लादःएवब्रह्मानंदस्तस्यःकाश्चविष्णुपत्न्योगो
प्यानामजरासृष्टिस्थित्यंतकारिणःपाप्रकृतिमहदहंमायाणामहामायाःकश्चविष्णुःपरंब्रह्मैव
विष्णुकस्माच्छ्राह्लादोगोपीचंदनसंसक्तयाअनुपाणांपापसंहरणप्रबुद्धांतःकरणानांब्रह्मज्ञानप्र
सिद्धाप्यएवंवेदेत्युपनिषत् २ गोपीनामग्रउत्पत्तौचंदनंततःपश्चात्गोपीत्यत्राहयच्चंदनं
तद्विपत्तुं तस्मादहरहश्चैवंएवंविद्वान्गोपीचंदनंधारयेत् अक्षय्यंपदमाप्नोतियच्चैनन
पश्यतिततोमहत्वमश्नुतइति ३ अथमायाप्रावलितेब्रह्माशीक्तनतश्चमहदायाब्रह्मणामहा

मायासंमिलितास्त्वं च भूतिश्चांगं पवनीयं पृथिव्यामीत्पृथिव्यामेवैभवद्धाभिदपीमं वर्णामव
र्णामहोज्ञापेते लोकानुग्रहार्थी मायासहितब्रह्मसंयोगवशादेशपचंदनस्यैवैभवंयपवंवि
ह्यामितिसूत्रदयानुपमलवः सर्वमायेनिततः प्रजापतयेपोमत्ये शायस्यापंचयपतइदृस्य
उप. सापेप्रातर्ध्यायेद्दिवारात्रकृतपापनाशयतिमत्तोमोक्षमश्नुतइति ४ गोपीचंदनपंकेनल
लाटे [illegible] यस्तुलेपयेत् एकदंडी त्रिदंडी वा सर्वे मोक्षमश्नुते १ गोपीचंदनलिप्तांगो यं यं
५८ पश्यति चक्षुषा तं तं शुद्धं विजानीयाद्द्विजभिः सत्कृतो भवेत् २ ब्रह्महत्याकृतं त्रयं(?) यं यं पश्य
ति चक्षुषा तं तं शुद्धं विजानीयाद्द्विजभिः सत्कृतो भवेत् ३ भ्रूणहत्यादिपापानि गोब्रह्म
कृतानि तेषां पापानि नश्यंति गोपीचंदनधारणात् ४ गोपीचंदनलिप्तांगं पुरुषं य उपा
सते देवब्रह्मादयो देवाः सन्तुष्टास्तामुपासते ५ गोपीचंदनलिप्तांगः पुरुषो येन दृश्यते विष्णु
स्त्रिजितभूतितामयातिपरमांगतिः ६ गोपीचंदनलिप्तांगो म्रियते यत्र कुत्रचित् अभिव्याप्य
यतो भूत्वा देवेंद्रपदमश्नुते ७ सदाचारः शुभाकल्पो मिताहारो जितेंद्रियः गोपीचंदनलिप्तांगो
ब्रह्मेनयत्सुसमाचरेत् ततः कोटिगुणं पुण्यमेवं मुनिरब्रवीत् ८ गोपीचंदनमाग्रुष्य(?) ललाटे
ण विवर्द्धते कामदं मोक्षदं चैव रम्यमेवं मुनयो ब्रुवन् ९ गोपीचंदनलिप्तांगो नैवदानाय मेव

दिकेकृत्ते मूर्नेसंसृग्रीतोयातिवियानेनविशेषतः १० अग्निष्टोमसहस्राणिवाजपेयशता
नि च तेषां पुण्यमवाप्नोतिगोपीचंदनधारणात् ॥ गोपीचंदनदानस्य अश्वमेधकृतःफलं न
गंगायांसमतीर्थेनपुष्करेणापिचंदनात् १२ वहुनात्रकिमुक्तेनकृष्णसायुज्यप्रगोपिकाः सुत
योऽभवेदंततस्संभोगात्संभोगास्सेभूतेवेदनेगोपीचंदनेनमिति ५ इत्यथर्ववेदोपनिषद
गोपीचंदनोपनिषत्समाप्ता ॥५०॥ ॐब्रह्मवादिनोवदंतिकिंकारणंब्रह्मकुतस्स्मजाताजीवाम ति
केनक्वचसंप्रतिष्टा अधिष्ठिताःकेनसुखेतरेषुवर्तामहेसर्वभूतेषुगूढंविश्वस्यैकंपरिवेष्टितारं
ज्ञात्वादेवंमुच्यतेसर्वपाशैः १६ एषदेवोविश्वकर्मामहात्मासदाजनानांहृदयेसंनिविष्टःहृदा
मनीषामनसाभिक्लृप्तोयएतद्विदुरमृतास्तेभवंति यदातमस्तन्नदिवानरात्रिर्नसन्नवासन्नशि
वएवकेवलःतदक्षरंतत्सवितुर्वरेण्य प्रज्ञावतस्मात्प्रसृतापुराणी नैनमूर्ध्वनतिर्यंचननमध्येपरि
जग्रभन्नतस्यप्रतिमाअस्तियस्यनाममहद्यशः १९ नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्य
तिकश्चनैनं हृदामनीषामनसाभिक्लृप्तोयएतद्विदुरमृतास्तेभवंति २० अजातइत्येवंकश्चि
द्भीरुःप्रपद्यतेरुद्रयत्तेदक्षिणंमुखंतेनमांपाहिनित्यं मानस्तोकेतनयेमानआयुषिमानोगोषुमा
नोअश्वेषुरीरिषः वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे इतिश्वेताश्वतरोपनिषद
ने

द्वेअक्षरेब्रह्मपरेत्वनंतेविद्याविद्याविद्यानिहितेयत्रगूढे क्षरंत्वविद्याह्यमृतंतुविद्याविद्याविद्येईशतेयस्तु
सोन्यः १ योयोनिंयोनिमधितिष्ठत्येकोविश्वानिरूपाणियोनिश्चसर्वाः ऋषिंप्रसूतंकपिलं
यस्तमग्रेज्ञानैर्बिभर्त्तिजायमानंचपश्येत् २ एकैकंजालंबहुधाविकुर्वन्नस्मिन्क्षेत्रेसंहरत्येष
३५- देवः भूयःसृष्ट्वापतयस्तथेशःसर्वाधिपत्यंकुरुतेमहात्मा ३ सर्वादिशऊर्ध्वमधश्चतिर्यक्प्र
८८ काशयन्भ्राजतेयद्वनड्वान् एवंसदेवोभगवान्वरेण्योयोनिःस्वभावानधितिष्ठत्येकः ४
यच्चस्वभावंपचतिविश्वयोनिःपाच्यांश्चसर्वान्परिणामयेद्यः सर्वमेतद्विश्वमधितिष्ठत्ये
कोगुणांश्चसर्वान्विनियोजयेद्यः ५ तद्वेदगुह्योपनिषत्सुगूढंतद्ब्रह्मादेवोसर्पिर्दिवार्च्छिंते
आत्मविद्यातपोमूलंतद्ब्रह्मोपनिषत्परमिति इतिश्वेताश्वतरोपनिषदिप्रथमोध्यायः १ युं
जानःप्रथमंमनस्तत्वायसविताधियःअग्नेर्ज्योतिर्निचाय्यपृथिव्याअध्याभरत् १ युक्तेनमनसा
वयंदेवस्यसवितुःसवे सुवर्गेयायशक्त्या २ युक्त्वायसवितादेवान्सुर्यतोविधियादिवं बृह
ज्ज्योतिःकरिष्यतःसविताप्रसुवातितान् ३ युंजतेमनउतयुंजतेधियोविप्राविप्रस्यबृहतो
विपश्चितः विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुःपरिष्टुतिः ४ युजेवांब्रह्मपूर्व्यंनमो
भिर्विश्लोकएवनपाश्चितः विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुः ५ श्यवंतोवंशः

ण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ६ अग्निर्यत्राभिमथ्यते वायुर्यत्राधि
रुध्यते सोमो यत्रातिरिच्यते तत्र संजायते मनः सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यं तत्र योनिं कृ
णवसे न हि ते पूर्तमक्षिपत् ७ त्रिरुन्नतं स्थाप्य समं शरीरं हृदींद्रियाणि मनसा सन्निवेश्य ब्र
ह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ८ प्राणान् प्रपीड्येह संयुक्तचेष्टः
क्षीणे प्राणे नासिकयोच्छ्वसीत दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः ९ समे
शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनोनुकूले न तु चक्षुपीडने गु
हानिवाताश्रयणे प्रयोजयेत् १० नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिक
शशीनां एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ११ पृथ्व्यप्तेजो
निलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्नि
मयं शरीरं १२ लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च गंधः शुभो मूत्रपुरीषम
ल्पं योगप्रवृत्तिं प्रथमां वदंति १३ यथैव बिंबं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधान्तं त
द्वात्मतत्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः १४ यदात्मतत्वेन तु ब्रह्मतत्वं दी
पोपमेनेह युक्तः प्रपश्येत् अजं ध्रुवं सर्वतत्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः १५

एकोहदेवःप्रदिशोनुसर्वाःपूर्वोहजातःसउगर्भेअंतःसएवजातःसजनिष्यमाणःप्रत्यङ्ज-
नास्तिष्ठतिसर्वतोमुखः १६ योदेवोग्नौयोप्सुयोविश्वंभुवनमाविवेशायओषधीषुयोवनस्प-
तिषुतस्मैदेवायनमोनमः १७ इतिश्वेताश्वतरोपनिषदिद्वितीयोध्यायः २ यएकोजाल-
उप- वानीशतईशानाभिःसर्वांल्लोकानीशतईशनाभिः यएवैकउद्भवेसंभवेच यएतद्विदुरमृ-
१०० तास्तेभवंति १ एकोहिरुद्रोनद्वितीयायतस्थुर्यइमांल्लोकानीशतईशनीभिःप्रत्यङ्ज-
नास्तिष्ठतिसंचुकोचांतकालेसंसृज्यविश्वाभुवनानिगोपाः २ विश्वतश्चक्षुरुतविश्वतोमुखो
विश्वतोबाहुरुतविश्वतस्पात् संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ३
योदेवानांप्रभवश्चोद्भवश्चविश्वाधिकोरुद्रोमहर्षिः हिरण्यगर्भंजनयामासपूर्वंसनोबुद्ध्याशु-
भयासंयुनक्तु ४ यातेरुद्रशिवातनूरघोरापापकाशिनी तयानस्तन्वाशंतमयागिरिशंता-
भिचाकशीहि ५ यामिषुंगिरिशंतहस्तेबिभर्ष्यस्तवे शिवांगिरित्रतांकुरुमाहिंसीःपुरुषंज-
गत् ६ ततःपरंब्रह्मपरंबृहंतंयथानिकायंसर्वभूतेषुगूढं विश्वस्यैकंपरिवेष्टितारमीशंतं
ज्ञात्वामृताभवंति ७ वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तात् तमेवविदित्वाति
मृत्युमेतिनान्यःपंथाविद्यतेऽयनाय ८ यस्मात्परंनापरमस्तिकिंचिद्यस्मान्नाणीयोनज्यायो

स्मिन्किंचित् वृक्षवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वं ९ ततोयदुत्तरतरंत
दरूपमनामयंयएतद्विदुरमृतास्तेभवंति अथेतरेदुःखमेवापियंति १० सर्वाननशिरोग्रीवः
सर्वभूतगुहाशयः सर्वव्यापीसभगवांस्तस्मात्सर्वगतःशिवः ११ महान्प्रभुर्वैपुरुषःसत्वस्यैषप्रवर्तकःसु
निर्मलामिमांप्राप्तिमीशानोज्योतिरव्ययः १२ अंगुष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसं
निविष्टः हृदामनीषामनसाभिक्लृप्तोयएतद्विदुरमृतास्तेभवंति १३ सहस्रशीर्षाःसहस्र
पात् सभूमिःसर्वतोवृत्वात्यतिष्ठद्दशांगुलं १४ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं उतामृ
तत्वस्येशानोयदन्नेनातिरोहति १५ सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रु
तिमल्लोकेसर्वमावृत्यतिष्ठति १६ सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं सर्वस्यप्रभुमीशा
नंसर्वस्यशरणंसुहृत् १७ नवद्वारेपुरेदेहीहंसोलेलायतेबहिः वशीसर्वलोकस्यस्थावरस्य
चरस्यच १८ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः सवेत्तिवेद्यंनचतस्या
स्तिवेत्तातमाहुरग्र्यंपुरुषंमहांतं १९ अणोरणीयान्महतोमहीयानात्मागुहायांनिहितोस्यजं
तोः तमक्रतुंपश्यतिवीतशोकोधातुःप्रसादान्महिमानमीशं २० वेदाहमेतमजरंपुराणं
सर्वात्मानंसर्वगतंविभुत्वात् जन्मनिरोधंप्रवदंतियस्यब्रह्मवादिनोहिप्रवदंतिनित्यं २१

इति श्वेताश्वतरोपनिषदि तृतीयोध्यायः ३ य एको वर्णो बहुधा शक्तियोगाद्वर्णाननेकान्नि
हितार्थो दधाति विचैति चांते विश्वमादौ स देवः स नो बुध्या शुभया संयुनक्तु तदेवाग्निस्तदादित्यस्त
द्वायुस्तदु चंद्रमाः तदेव शुक्रं तद्ब्रह्म तदापस्तत्प्रजापतिः २ त्वं स्त्री त्वं पुमानसि त्वं कुमार उ
उप. त वा कुमारी त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुखः ३ नीलः पतंगो हरितो लो
१०२ हिताक्षस्तडिद्गर्भ ऋतवः समुद्राः अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा ४
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोनुशेते ज
हात्येनां भुक्तभोगामजोन्यः ५ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः
पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ६ समाने वृक्षे पुरुषो निमग्नोनीशया शोच
ति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ७ ऋचो अक्षरे पर
मे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समा
सते ८ छंदांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदंति अस्मान्मायी सृजते विश्वमेत
त्तस्मिंश्चान्यो मायया संनिरुद्धः ९ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं अस्यावयवभू
तैस्तु व्याप्तं सर्वमिदं जगत् १० यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च वि चैति सर्वं त

विचैति सर्वं तमीशानं वरदं देवमीड्यं ११ निचाय्येमां शांतिमत्यंतमेति यो देवानां प्रभवश्चो
द्भवश्च विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं पश्यत जायमानं स नो बुध्या शुभया संयुनक्तु १२
यो देवानामधिपो यस्मिन् लोका अधिश्रिताः य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय ह
विषा विधेम १३ सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवे
ष्टितारं ज्ञात्वा शिवं शांतिमत्यंतमेति १४ स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूते
षु गूढः यस्मिन् युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशान् छिनत्ति १५ घृतात्परं मं
डमिवाति सूक्ष्मं ज्ञात्वा शिवं ब्रह्मविदो वदन्ति कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः
पुरुष इति चिंत्यं संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः २ ते ध्यानयोगानुग
ता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढां यः कारणानि निखिलानि तानि कालात्मयुक्ता
न्यधितिष्ठत्येकः ३ तमेकनेमिं त्रिवृतं षोडशांतं शतार्धारं विंशतिप्रत्यराभिः अष्टकैः ष
ष्टाकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहं पंचस्रोतोंबुं पंचयोन्युग्रवक्रां पं
चप्राणोर्मिं पंचबुद्ध्यादिमूलां पंचावर्तां पंचदुःखौघवेगां पंचाशद्भेदां पंचपर्वामधीमः ५
सर्वाजीवे सर्वसंस्थे बृहंते तस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे पृथगात्मानं प्रेरितारं च मत्वा

जुष्टस्ततस्तेनामृतत्वमेति ६ उद्गीतमेतत्परमंतुब्रह्मतस्मिंस्त्रयंसुप्रतिष्ठाक्षरंच अत्रांतरंवेदवि
दित्वालीनाब्रह्मणितत्परायोनिमुक्ताः ७ संयुक्तमेतत्क्षरमक्षरंचव्यक्ताव्यक्तंभरतेविश्व
मीशः अनीशश्चात्माबध्यतेभोक्तृभावाज्ज्ञात्वादेवंमुच्यतेसर्वपाशैः ८ ज्ञाज्ञौद्वावजावी
उप. शानीशावजाह्येकाभोक्तृभोग्यार्थयुक्ता अनंतश्चात्माविश्वरूपोह्यकर्त्तात्रयंयदाविंदतेब्र
१०२ ह्मएतत् ९ क्षरंप्रधानममृताक्षरंहरःक्षरात्मानावीशतेदेवएकः तस्याभिध्यानाद्योजनात्त
त्वभावाद्भूयश्चांतेविश्वमायानिवृत्तिः १० ज्ञात्वादेवंसर्वपाशापहानिःक्षीणैःक्लेशैर्जन्ममृ
त्युप्रहाणिः तस्याभिध्यानात्तृतीयंदेहभेदेविश्वैश्वर्यंकेवलआप्तकामः ११ एतज्ज्ञेयंनि
त्यमेवात्मसंस्थंनातःपरंवेदितव्यंहिकिंचित् भोक्ताभोग्यंप्रेरितारंचमत्वासर्वंप्रोक्तंत्रि
विधंब्रह्मएतत् १२ वह्नेर्यथायोनिगतस्यमूर्तिर्नदृश्यतेनैवचलिंगनाशः सभूयएवेंधन
योनिगृह्यस्तद्वोभयंवैप्रणवेनदेहे १३ स्वदेहमरणिंकृत्वाप्रणवंचोत्तरारणिंध्याननिर्मथना
भ्यासाद्देवंपश्येन्निगूढवत् १४ तिलेषुतैलंदधिनीवसर्पिरापःस्रोतःस्वरणीषुचाग्निः एवमे
वात्मात्मनिगृह्यतेसौसत्येनैनंतपसायोनुपश्यति १५ सर्वव्यापिनमात्मानंविद्वांतेवस्मयो
निःसर्वेदेवाःअव्ययश्चतविडुस्तेनमयाअमृतावैवभवः गुणान्वयोयःफलकर्मकर्त्ताकृ

62